वीर सेवा मन्दिर
दिल्ली

★

क्रम संख्या 3680
काल नं० 294.11 Sut
खण्ड

एवंविधञ्च सूर्यञ्च स्मरणं कृत्वा ऋषिदेवतछन्दसामनुक्रमणं करिष्यामः। इत्यर्थः। तं विवस्वन्तमित्युक्तं। तच्च तं कमित्यपेक्षायामाह येन विवस्वता सूर्येण मण्डलं दक्षिणमक्षि हृदयं वाऽधिष्ठितं आश्रितं। मण्डल आकाशे जगत्प्रकाशकत्वेन परिदृश्यमानं तेजोमयं सूर्यमंडलं, दक्षिणमक्षीति पुरुषस्य दक्षिणं चक्षुः। पुरुषस्य हृदयं च। एतच्चमाक्रम्य यः स्थितवान्तमित्यर्थः। तथा च श्रूयते(१)। "स एषोऽएव मृत्युर्यऽएष एतस्मिन्मण्डले पुरुषो यस्यायं दक्षिणेऽक्षन्पुरुषस्तस्य हैतच्च हृदयं पादावति हृतीताविति"। पुनः कं तं। यतो यस्मादित्यस्त्री भगवान्याज्ञवल्क्यो मुनिः शुक्लानि विशुद्धानि अपौरुषेयत्वाद्दोषरहितानि यजूंषि प्राप प्राप्तवान्। तथा च श्रूयते(२)। "आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्त" इति। तत्र केषां चिन्मते यजुषां छन्दो नास्तीत्याह।

यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यते

एकेषामाचार्याणां मते यजुषा इषे त्वेत्यादीना छन्दो न विद्यते। गायत्र्युष्णिगादिनामकं छन्दो नास्ति, कुतो न विद्यते इत्यपेक्षायामाह। अनियताक्षरत्वादिति। गायत्र्यादि छन्दो हि नियताक्षर चतुर्विंशत्यक्षरा गायत्रीत्याद्यक्षरसङ्ख्यानियमश्रवणात्। न च यजुर्ष्वेषु नियताक्षराणि। अतस्तेषु नियताक्षरसङ्ख्यास्वरूपं छन्दो नास्तीत्यर्थः। एकेषामित्युक्तत्वात्केषां चिन्मते यजुषामपि छन्दोनास्तीति प्रतीयते। तच्च छन्दस्त्वाशयपत्ते। छन्दोगायत्री "द्वेयेक"मित्यादि षड्लादुक्तप्रकारेणैकाक्षरद्व्यक्षरत्र्यक्षरादीनि छन्दांसि यजुष्कल्पनीयानि। तानि चास्मिन्मते नोक्तानि अतः प्रथमं तान्यष्टप्रकाराणि गायत्र्यादीनि छन्दांसि प्रदर्श्यन्ते॥

(१) पूर्वकाण्डकायामस्मिन्द्रष्टव्येति॥

(२) शतपथब्राह्मणायचतुर्दशबृहदारण्यकाण्डस्य काण्डका ज्ञातव्येति॥

तच्च ऋग्वेदप्रातिशाख्ये। "गायत्र्युष्णिगनुष्टुप्च बृहती च प्रजापतेः। पङ्क्तिस्त्रिष्टुब्जगती च सप्त छन्दांसि तानिह। अष्टाक्षरप्रभृतीनि चतुर्भ्यः परं परं। दैवान्यपि च सप्तैव सप्त चैवासुराण्यपि। एकोत्तराणि देवानां तान्येवैकाक्षरावधि। एकादशान्यसुराणां ततः पञ्चदशाक्षरत्वात्। तानि त्रीणि सामगस्य समानानि स नामतः। एकं भवत्यृषिच्छन्दस्तथा गच्छति सम्पदं। एकं त्रिप्रभृतीन्याहुर्युक्तानि चतुरक्षरम्। ऋषिछन्दांसि तैः प्रायो मन्त्रः श्लोकश्च वर्तते। तत्पादो यजुषां छन्दस्साम्नां तु द्वादशं त्रयः। तत्पादस्तेषां ऋषिछन्दसां चतुर्थो भागो यजुषां छन्दो वेदितव्यं। साम्नां छन्दो द्वौ द्वौ पादौ वेदितव्यौ। ऋचां छन्दस्त्रयः। गायत्र्यादिजगत्यन्तमेकद्वित्र्यधिकं तु ततः। आर्षवत्तत्समाहारो ब्राह्मो वर्गः षडुत्तरः। अक्षराणि षड्विंशद्गायत्री ब्राह्मणो मिता। यजुषां षड्ऋचां त्रिः षट् साम्नां द्वादश सम्पदि। एकोत्तरो यजुर्वर्गः साम्नां वर्गस्तु द्व्युत्तरः। ऋचां तु त्र्युत्तरो वर्गो ब्राह्मो वर्गः षडुत्तरः। ऋषीणां तु त्रयो वर्गः सप्तका एव नेतरे। ऋषिछन्दांसि गायत्री सा चतुर्विंशत्यक्षरास्त्रयः पादाश्चत्वारो वा षडक्षरा इत्यादि प्रजापतिप्रभृतीनां छन्दांसि व्याख्यातानि, तेषु ऋषिछन्दांसि भोदाहरणानि वक्ष्यन्ते। गायत्री सा चतुर्विंशत्यक्षरेत्यादिगा। छंदोगानामपि। देवासुरप्रजापतीनां यजुःसामर्चो च छन्दांसि भवन्ति। दैव्येका गायत्री। पञ्चदशासुराणां। प्रजापतेरष्टौ। षड्वा दशाष्टादशा इतरेषां क्रमशोऽथ प्रतिछन्दोऽक्षरविद्विद्वैषयजुषोरेकैकेन तथा हानिरसुराणां प्रजापतेश्चतुर्भिर्विद्वद्विर्द्वाभ्यां साम्नामृचां विभिस्त्रिभिर्वा द्वौ त्रिवर्गौ छन्दसामाद्यस्य तु त्रयं त्रयं समेत्यार्थः, परस्ये ब्राह्म्यऋचां चद्विगुणा यजुषां च चतुर्गुणाऽदितस्तितयुक्ता। ऋग्यजुषां च साम्नाम्नो। प्राजापत्या च षोडशेति। तथा । पादभेदेन पादानां विभागोऽभिसमीक्षतु। छन्दसःसम्पदं तां तायायां मन्त्रेत

पादतइति। छन्दसां पादतो यांयां सम्पदं मन्येत तां तां संम्यक् पूर्वमभिसमीक्ष्य पादांश्च पदा नामभेदेन तु पादानां विभागः कर्त्तव्यः। प्रायोऽर्थो दृत्तमित्येते पादज्ञानस्य हेतवः। प्रायः अर्थः दृत्तं। दृत्तमेते त्रयः पादज्ञानस्य हेतवो भवन्ति। प्रायश्चिष्टुप्प्रायः, अनुष्टुप्प्रायइति। विशेषसन्निपाते तु पूर्वं पूर्वं परं परं। एषामेव प्रायोऽर्थदृत्तरूपाणां विशेषाणां सन्निपाते तु पूर्वं निमित्तं पूर्वं भवति। परं निमित्तं परं भवति पूर्वो हेतुरुत्तरादबलीयानित्यर्थः, प्रायोऽर्थयोर्विरोधे प्रायो बलीयः। प्रायो बलीयस्त्वा"दूर्ध्वो व्राजस्य सनिता यदञ्जिभिरित्यपादां जिघ्रासेत्। पिङ्गलोऽप्याह छन्दः। गायत्री दैव्येकं। आसुरी पञ्चदश। प्राजापत्याऽष्टौ। यजुषां षट्। साम्नां द्विः। ऋचां त्रिः। द्वौ साम्नां वर्धेत। त्रीं स्त्रीनृचां। चतुरश्चतुरः प्राजापत्यायाः। एकैकयैषे। जघ्नादासुरी। तान्युष्णिगनुष्ब्बृहतीपङ्क्तित्रिष्टुब्जगतीरित्येवं सज्ज्ञानि, एकविंशतिसंख्यान्यपराण्यपि छन्दांसि सन्ति। तत्र चतुर्विंशत्यक्षरा गायत्री अष्टाविंशत्यक्षरा उष्णिक्॥ द्वात्रिंशदक्षराऽनुष्टुप्षट्त्रिंशदक्षरा बृहती। चत्वारिंशदक्षरा पङ्क्तिः। चतुश्चत्वारिंशदक्षरा त्रिष्टुप्, अष्टाचत्वारिंशदक्षरा जगती। द्वापञ्चाशदक्षरा अतिजगती। षट्पञ्चाशदक्षरा शक्करी। षष्ट्यक्षरा अतिशक्करी। चतुःषष्ट्यक्षरा अष्टिः। अष्टषष्ट्यक्षरा अत्यष्टिः। द्वासप्तत्यक्षराधृतिः। षट्सप्तत्यक्षरा अतिधृतिः। अशीत्यक्षरा कृतिः। चतुरशीत्यक्षरा प्रकृतिः। अष्टाशीत्यक्षरा आकृतिः। द्वानवत्यक्षरा विकृतिः॥ षण्णवत्यक्षरा संकृतिः। शतात्तराऽभिकृतिः। चतुःशतात्तरोत्कृतिरिति। एकमेकाक्षरं छन्दो दैवी गायत्री। एकं द्व्यक्षरं दैव्युष्णिक्। एकं त्र्यक्षरंदैव्यनुष्टुप्। एकं चतुरक्षरं दैवी बृहती। पञ्चाक्षरं दैवीपङ्क्तिः। द्वे षडक्षरे यजुर्गायत्री दैवीत्रिष्टुप्। द्वे सप्ताक्षरे दैवी जगती। यजुरुष्णिक्। द्वे अष्टाक्षरे यजुरनुष्टुप्। प्राजापत्या गाय-

ची च । हे नवाक्षरे आसुरीजगती यजुर्बृहती च । हे दशाक्षरे आसुरी त्रिष्टुप् यजुः पङ्क्तिश्च । हे एकादशाक्षरदशाक्षरे आसुरीपङ्क्त्यर्षीबृषी त्रिष्टुप्च । चत्वारि द्वादशाक्षराणि सामगायत्री यजुर्जगती आसुरी बृहती ॥ प्राजापत्योष्णिक् । एकं त्रयोदशाक्षरं आसुर्यनुष्टुप् । हे चतुर्दशाक्षरे आसुर्युष्णिक् । सामोष्णिक् । एकं पञ्चदशाक्षरं आसुरी गायत्री । हे षोडशाक्षरे प्राजापत्यानुष्टुप् । सामानुष्टुप्च । सप्तदशाक्षरं नास्ति । हे अष्टादशाक्षरे सामबृहती ऋग्गायत्री च । एकोनविंशत्यक्षरं नास्ति । हे विंशत्यक्षरे प्राजापत्या बृहती सामपङ्क्तिः एकमेकविंशत्यक्षरं ऋग्गुष्णिक्, एकं द्वाविंशत्यक्षरं सामत्रिष्टुप् । त्रयोविंशत्यक्षरं नास्ति । चत्वारि चतुर्विंशत्यक्षराणि । प्राजापत्या पङ्क्तिः, सामजगती । ऋगनुष्टुप् । आर्षी गायत्री च । पञ्चविंशति-षड्विंशत्यक्षरे नस्तः । एकं सप्तविंशत्यक्षरं ऋग्बृहती । हे अष्टाविंशत्यक्षरे प्राजापत्या त्रिष्टुवार्षी उष्णिक् । एकोनत्रिंशदक्षरं नास्ति । एकत्रिंशदक्षरं ऋचां पङ्क्तिः । एकत्रिंशदक्षरं नास्ति । हे द्वात्रिंशदक्षरे प्राजापत्या जगती । आर्षी अनुष्टुप्च । एकं त्रयस्त्रिंशदक्षरं ऋचां त्रिष्टुप् । चतुस्त्रिंशदक्षरे नस्तः । त्रीणि षट्त्रिंशदक्षराणि ऋग्जगती । ब्राह्मी गायत्री आर्षी बृहतीच । अक्षरा न सन्ति । एकं चत्वारिंशदक्षरमार्षीपङ्क्तिः । एकं द्विचत्वारिंशदक्षरं ब्राह्मी उष्णिक् । एकं चतुश्चत्वारिंशदक्षरं आर्षी त्रिष्टुप् । हे अष्टाचत्वारिंशदक्षरे आर्षी जगती । ब्राह्मी अनुष्टुप्च । एकं चतुष्पञ्चाशदक्षरं ब्राह्मी बृहती । हे षष्ट्यक्षरे ब्राह्मी पङ्क्तिरतिशक्करी च । एकं षट्षष्ट्यक्षरं ब्राह्मी त्रिष्टुप् । हे द्वासप्तत्यक्षरे ब्राह्मी जगती धृतिश्चेति । एषु पठितैरक्षरैर्यावदक्षरसङ्ख्या न पूर्यते तत्र वक्ष्यमाणेन व्यूहेन पादपूरणार्थं तु क्षेपसंयोगैकाक्षरी भाव्यहेदित्यनेन पूरणं । तदसम्भवे न्यूनाधिकेनैकेन निचृद्भूरिजौ हास्यां विराड्स्वराजावि-

त्युपायेन छन्दःकल्पनीयं ॥ एवमेकाक्षरप्रभृत्येकैकाक्षरवृध्या षडधिकशताक्षरपर्यन्तानि छन्दांसि सन्ति । ततोऽप्यधिकाक्षराणां यजुषां छन्दो नास्ति छन्दोगपरिभिष्टेऽपि । सर्वछन्दःस्वेकेन पञ्चाक्षरेण गङ्कुमती भवति । अथैकाक्षरहीना निचृदेकाक्षराभूरिक् । न्यूना विराट् । द्व्यधिका स्वराट् । अल्पीयमध्यात्रिपात्पिपीलिकमध्या यवमध्येति । यताभ्यां यकारवकारविकर्षेण न्यूनानि छन्दांसि पूरयेत् । नगश्छेन च तदन्तवर्जं पदप्रकृत्या च । लघ्वक्षरेण च । न्यूनत्वे तु शब्दः पूरणइति । तदेवं सर्वयजुषामक्षराणि गणयित्वा गणयित्वा अनेन प्रकारेण यजुषु कल्पनीयं । सूत्रस्य चायमेवार्थः । यानि यजूंष्यनियताक्षराणि तेषां छन्दो नास्त्येव ॥ यानि च नियताक्षराणि तेषां छन्दोऽस्त्येव । यानि च नियताक्षराणि इषेत्वेत्यादीनि पिङ्गलाद्युक्तछन्दोलक्षणयुक्तानि तेषां छन्दो विद्यतएवेति । युक्तोऽयं पक्षः, अन्यथा एकाक्षरप्रभृतीनां चतुरधिकशताक्षरपर्यन्तानां छन्दसां पाक्तिकवैयर्थ्यापत्तेः । तस्मादेवमेव व्याख्येयं । एकेषां यजुषामनियताक्षराणां सप्ताधिकशताक्षरपर्यन्तानां छन्दो नास्त्येव । ततोऽर्वाचीनसङ्ख्याक्षराणां छन्दस्त्येवेति ऋषिदैवतछन्दाख्यमनुक्रमिष्यामइति पूर्वं प्रतिज्ञातं । तत्र के ऋषयइत्याकाङ्क्षायामाह ॥

द्रष्टारऋषयः स्मर्त्तारः परमेष्ठ्यादयः ।

परमेष्टि आदिः प्रथमो येषां ते परमेष्ठ्यादयः, संहितायामादौ दर्शपूर्णमासमन्त्राः पठिताः । तेषां च परमेष्ठी ऋषिः ॥ परमेष्ठ्यादयइति परमेष्ठीप्रजापतिप्रभृतयो मन्त्राणां द्रष्टारऋषयइत्युच्यन्ते । द्रष्टारइत्यस्यैव व्याख्यानं स्मर्तारइति । परमेष्ठ्यादयो हि पूर्वस्मिन्कल्पे नानाविधदुष्करतपश्चरणादिविशिष्टकर्मजनितस्मृतिसंस्कारादतिशयितधर्माणः, सुप्रतिबुद्धवत्कल्पादौ सह विषयाभिव्यज्यमानाः

कस्यान्तेऽध्येतृत्वादुक्तवाक्यान् वक्ष्यान्तरे स्मरन्तीति स्मार्तारइत्युच्यन्ते । अतश्च य परमेष्ठ्या दर्शे मन्त्रं स्मरन्ति तस्य मन्त्रस्य स ऋषिरित्युच्यते । अतएवाह यास्कः "ऋषिर्दर्शनादिति" । दर्शनमत्र मानसम् ॥ छन्दसां स्वरूपमाह ।

छन्दाꣳसि गायत्र्यादीनि ।

(१)अथ छन्दाꣳसि गायत्र्युष्णिगनुष्टुबित्यत्रोक्तानि गायत्र्यादीनि छन्दाꣳसि ज्ञेयानि । न ऋषिदैवछन्दसां ज्ञानं विनापि मंत्राणामध्ययनादिसिद्धेः किमर्थं तत्कथनमित्याशङ्क्य तदज्ञानेऽनिष्टमाह ।

एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजते तस्य ब्रह्म निर्वीर्यं यातयामं भवति ।

एतानि ऋषिदैवतछन्दांस्यविदित्वा अज्ञात्वा योऽधीते यो वेदं पठति योऽनुब्रूते अन्यं पाठयति रुद्राध्यायादिकं जपति व्याहृत्यादिमन्त्रेण यो यजते स्वार्थं यागं करोति याजयते स्वयमृत्विग्भूत्वा परान्याजयते तस्य पुरुषस्य ब्रह्म वेदो निर्वीर्यं स्वकार्यसाधने शक्तिहीनं यातयामाकिञ्चित्करं निष्फलं भवति । ऋष्यादिकमज्ञात्वाऽध्ययनेऽध्यापने जपे होमे यजने याजने वा प्रयुक्तो मन्त्रो निर्वीर्यत्वात्स्वकार्यसाधको न भवतीत्यर्थः । अनिष्टान्तरमाह ।

अथान्तरा स्वर्गं वाऽऽपद्यते स्थाणुं वृच्छति प्रमीयते वा पापीयान्भवति ॥

अथ ऋष्यादयज्ञात्वाऽध्ययनादिकरणानन्तरं स्वर्गमंतरा आपद्यते स्वर्गमध्यं प्राप्नोति । शुनां गतिः अशुचिस्थानं नरकमुच्यते ।

---

(१) गायत्र्यादिछन्दसां दैवतनिर्वचनानि सामगदैवतब्राह्मणे प्रतिपादितान्यतस्तस्माद्ग्रन्थानोक्तानि ।।

नसं । मन्त्राणां वर्णात्मकत्वेन चक्षुषा दर्शनासम्भवात् । अतएव ऋषीणां द्रष्टृत्व पर्यायोपादानम् । स्तुतिगतानामपश्यदित्यादीनां व्याख्यानार्थं द्रष्टारइत्युक्तम् । अथ देवताक्रममाह ।

देवता मन्त्रान्तर्भूता अग्न्यादिका हविर्भाजः स्तुतिभाजो वा ।

या मन्त्रान्तर्भूता मन्त्रमध्यपठिता मन्त्राक्षरश्रेयस्वरूपा हविर्भाजः स्तुतिभाजो वा । अग्न्यादिकास्ता देवताः । मन्त्रवर्णा देवता अग्निसोमेन्द्रविष्ण्वादयो देवता इत्यर्थः । तत्र कासाञ्चन हविर्भाजस्ते कासाञ्चन स्तुतिम् । तथा च यास्कः । "अग्नये सूक्तं यजते यस्मै हविर्निरुप्यतइति" । तथा इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाजइति । तथा यस्यामन्त्रस्यर्षेर्यस्यां देवता या सार्यऽऽपत्यमित्यं स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवतीति च । ननु भवतु महाप्रभावानामग्न्यादीनां देवात्वं अनः शाखादीनां त्वचेतनानां कथं । नहि तानि हविष्प्रतिग्रहणसमर्थानि । नच स्तुतां स्तुतिं जानन्तीत्यतआह ।

अनः शाखोखाश्मयोपवेषकपालेधमोलूखलादयश्च प्रतिमाभूताः ।

यथा विष्ण्वादिदेवतानां सुवर्णादिमय्यः प्रतिमा भवन्ति ताश्च देवतारूपा अपि देवतावत्पूज्यन्ते स्तूयन्ते वाञ्छितं प्रयच्छन्ति । एवमनः शाखादयो देवतारूपा अपि देवतानां प्रतिमाभूता देवता ज्ञेयाः । तथा च यास्कः॥ "अपि वा प्रदेवता देवतावत्स्तूयन्ते तथाऽश्वप्रभृतीन्यो ग्रहिपर्यन्तानीति" । अनःशाखादिषु प्रतिमाभूतासु विष्ण्वादिप्रतिमास्विवाधिष्ठात्र्यो देवताः सन्ति ताश्चाभिमतं सर्वं करिष्यन्तीत्यभिप्रायः । एतच्च देवतानां च विभक्तित्वाङ्गीकारे पक्षे । अग्न्यादिशब्दानामेव देवतात्वपक्षे त्वियमाशङ्कापि नास्ति । यथा अग्न्यादिशब्दानां देवतात्वं

तथाऽनः शाखादिशब्दानामपि भविष्यति शब्दत्वाविशेषात् ॥ अथ छन्दसां स्वरूपमाह ।

छन्दाएसि गायत्र्यादीनि ।

(१)अथ छन्दाएसि गायत्र्युष्णिगनुष्टुबित्यनोक्तानि गायत्र्यादीनि छन्दाएसि ज्ञेयानि । न ऋग्वेदेवछन्दसां ज्ञानं विनाऽपि मन्त्राणामध्ययनादिसिद्धेः, किमर्थं तत्कथनमित्याशङ्क्य तदज्ञाने ऽनिष्टमाह ।

एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजते तस्य ब्रह्म निर्वीर्यं यातयामं भवति ।

एतानि ऋग्वेदेवतछन्दांस्यविदित्वा अज्ञात्वा योऽधीते यो वेदं पठति योऽनुब्रूते अन्यं पाठयति रुद्राध्यायादिकं जपति व्याहृत्यादिमन्त्रेण यो यजते स्वार्थं यागं करुते याजयते स्वयमृत्विग्भूत्वा परान्याजयते तस्य पुरुषस्य ब्रह्म वेदो निर्वीर्यं स्वकार्यसाधने शक्तिहीनं यातयामाकिञ्चित्करं निष्फलं भवति । ऋष्यादिकमज्ञात्वाऽध्ययनेऽध्यापने जपे होमे यजने याजने वा प्रयुक्तो मन्त्रो निर्वीर्यत्वात्स्वकार्यसाधको न भवतीत्यर्थः । अनिष्टान्तरमाह ।

अथान्तरा श्वगर्तं वाऽऽपद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान्भवति ॥

अथ ऋष्यादिकमज्ञात्वाऽध्ययनादिकरणानन्तरं श्वगर्तमन्तरा आपद्यते श्वगर्तमध्यं प्राप्नोति । शुनां गर्तः अशुचिस्थानं नरकमुच्यते । अनेन पापेन नरके पततीत्यर्थः । तथा स्थाणुं वा ऋच्छति । ऋच्छगतीन्द्रियप्रयत्नमूर्तिभावे, स्थाणुं मूर्तिभावं स्थाणुरूपत्वं प्राप्नोति यातां-

---

(१) गायत्र्यादिछन्दसां दैवतनिर्वचनानि सामगदैवतब्राह्मणे प्रतिपादितान्यतस्तस्मादेतान्यवेत्यादि ॥

दिना मन्त्रग्राम: शुष्को वृक्ष: स्थाणुरित्युच्यते । एवंविधवृक्षयोनिं वा-तीत्यर्थ: । तथा प्रमीयते वा एतेन पापेन प्रमीयते अचिराच्चरणं प्राप्नोति। परमायुष: परैवापसृत्युना म्रियतइत्यर्थ: । "अध्यवा प्रमी-यते अन्धो वा बधिरो वा भवति" । एष ह वै प्रमायुकोऽन्धो वा बधिरो-भवति । प्रपूर्वस्यास्य धातोरेवमर्थत्वादर्शनात् । तथा । पापीयान्भ-वति । अतिशयेनपापाचारो भवति "पुण्यो वै पुण्येन कर्मणा भ-वति पाप: पापेनेति श्रुते." । अतिशयेन पाप: पापीयान् । अन्त्यज-म्लेच्छादिजातिषु जायतइत्यर्थ: । तथा च स्मृति: । अविदित्वा ऋ-षिं छन्दो दैवतं योगमेव च । अध्यापयेज्जपेद्यापि पापीयान्जायते तु स: । इति । तथा । ऋषिछन्दो दैवतानि ब्राह्मणार्थं स्वरानपि । अविदित्वा प्रयुञ्जानो मन्त्रकंटकउच्यते । इति । कंटक: पीडकइ-त्यर्थ: । तथा मन्त्राणां दैवतं छन्दो निरुक्तं ब्राह्मणानृषीन् । छ-न्दश्चितादींश्चात्वा यजंते यागकंटकाइति। छन्दोगानामार्षेयब्रा-ह्मणेऽपि श्रूयते । "यो ह वा अविदितार्षेयब्राह्मणेन मन्त्रेण याज-यति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वाऽऽपद्यते वा प्रमीयते पापीयान्भवति । यातयामान्यस्य छन्दांसि भवन्ति । तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति" । तदेवमृषाद्यज्ञानेऽनिष्टप्राप्तिमभिधायाथ तेषां ज्ञाने यद्भवति तदाह ॥

अथ विज्ञायैतानि योऽधीते तस्य वीर्यवत् ॥

एतानि ऋषिदैवतछन्दांसि विज्ञाय विशेषेण ज्ञात्वा योऽधीते वेदं पठति । तस्य मन्त्र वीर्य्यवद् भवति । प्रबलशक्तियुक्तं यदर्थं प्रयु-ज्यते तत्करणमर्थं भवति ॥ ब्रह्मशब्देन वेदमुच्यते । अर्थज्ञाने च फलविशेषमाह ॥

अथ योऽर्थविन्नस्य वीर्यवत्तरं भवति ॥

यो हिजो मन्त्राणामृष्यादिज्ञानवानर्थञ्च मन्त्राणां अर्थमभिजानाति । तस्य ब्रह्म वीर्यवत्तरं अतिशयेन वीर्यवत् । स्वार्थसाधने अतिप्रबलशक्तिमद्भवति वेदेऽप्यर्थज्ञानशून्यस्य निन्दा श्रूयते । अर्थज्ञानवतः प्रशंसा च । स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थवित्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मेति" । ऋष्यादिमन्त्रार्थज्ञातवता ज्ञातं जपादिकमपि सकलसाधकं भवतीत्यतआह ॥

जप्त्वा हुत्वेष्ट्वा
तत्फलेन युज्यते ॥१॥

ऋषिदैवतछन्दोमन्त्रार्थज्ञानवान्पुरुषो जपहोमयागान्कृत्वा तत्फलेन जपादिफलेन युज्यते सम्बन्धं प्राप्नोति । तादृग्वैर्वीर्यवत्तरैर्ज्ञातार्थैर्ज्ञातऋषिदैवतछन्दस्कैश्च मन्त्रैः ज्ञातं जपहोमयागादिकमवश्यं फलदं भवतीत्यर्थः । अथ संहितापठितं सर्वमन्त्रसाधारणमेकं ऋषिमाह ॥

इषे त्वादि खमब्रह्मानृतं विवस्वानपश्यत् ॥ (१)

इषे त्वोर्ज्जे त्वेत्यतआरभ्यो३खं ब्रह्मेत्यनृतं सर्वं मन्त्रजातं विवस्वानपश्यत् । उदसृजत् । "आदित्यानीमानि यजूंषि वा आहुरिति श्रुतेः" ॥

ततः प्रतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो वेदितव्याः ॥

तत इति सर्वकर्मसु सर्वसाधारणं विवस्वन्तं ऋषिं विदित्वा ततोऽनन्तरं प्रतिकर्म कर्मणि कर्मणि सर्वकर्मसु विभागेनेति । ए-

---

(१) इषे त्वादिखमब्रह्मेति विधमेत्यन्तमाति कारावशास्त्रीपुस्तकानुक्रमपाठः ॥

तत्कर्मसम्बन्धिमन्त्रगणस्याय ऋषिरस्यायं मन्त्रस्यायमित्येवं रूपेण विभागेन ब्राह्मणानुसारेणेति तत "एतं परमेष्ठीप्राजापत्यो यज्ञमपश्यत्तेनर्क्षं दर्शपूर्णमासौ प्रजापतिः प्रथमां चितिमपश्यदित्यादि" ब्राह्मणवाक्यानुसारेण वक्ष्यमाणा ऋषयो वेदितव्या ज्ञातव्या। अथ सर्वेषां दर्शपूर्णमासमन्त्राणां साधारणमृषिमाह ॥

परमेष्ठी प्राजापत्यो दर्शपूर्णमासमन्त्राणामृषिः ॥

प्रजापतेरपत्यं प्रमेष्ठीत्यृषिः। सर्वेषां दर्शपूर्णमासमन्त्राणामृषिर्ज्ञातव्यः। "तत एतं परमेष्ठीप्राजापत्यो यज्ञमपश्यत्तेनर्क्षं दर्शपूर्णमासाविति श्रुतेः"। यत्र तु ऋषिविशेषोऽभिधीयते ॥ तथा पुरा। अग्नयेऽन्वाहार्यपचनायेत्यादौ तत्रोभावृषी भवतः। दर्शपूर्णमासमन्त्राणामेव पुनरपि वैकल्पिकानृषीनाह ॥

देवा वा प्राजापत्याः ॥

अथ वा प्रजापतेः पुत्रा देवा दर्शपूर्णमासमन्त्राणामृषयः। ते देवा अकामयन्तेत्युपक्रम्य "एतꣳ ह्यविर्यज्ञं ददृशुर्यद्दर्शपूर्णमासाविति श्रुतेः" ॥ अत उभयत्रवणाद्विकल्पः ॥ (१)

इषे त्वा शाखाऽनुष्टुप् ॥

इषेत्वेत्यस्य यजुषः शाखादेवता अनुष्टुप्छन्दः इयं दैव्यनुष्टुप् व्यक्षरत्वात्। एतच्च यजुषां छन्दःसद्भावपक्षे ज्ञेयम् ॥

विनियोगः कल्पकारोक्तः ॥

वेदितव्याऽइति शेषः। अस्य मन्त्रस्य। तत्तत्कर्मणि विनियोगः। अनेन मन्त्रेणेदं कर्म कर्त्तव्यं। अनेनेदमित्येवं विधो मन्त्रा-

---

(१) अत्राप्यादौ विशेषऽउक्तः पद्धतिकारेण। ममाग्ने वर्चो विहवेष्वस्तु वयस्वेन्धानास्तन्वं पुषेम ॥ मन्त्रमन्तो ग्रंदशशतसस्त्वयाध्यक्षेण पृतना जयेम। इत्यन्यन्वाधानमन्त्रस्य परमेष्ठी प्राजापत्यऋषिर्देवा वा प्राजापत्या ऋषयः ज्ञात्वा देवता दैव्यनुष्टुपछन्दः ज्ञात्वाछेदने विनियोगः ॥ इति ज्ञातव्यः। तैत्ति०सं०४का० ७ प्रपा० अ०१४ ॥

यां विनियोगः । कल्पकारोक्तएवेह वेदितव्यः । कर्मोद्धारजन्वेलायां मन्त्राणां विनियोगकालयावत्त्वं । तदज्ञाने दोषस्य प्रागुक्तत्वात् । यतः कल्पकारेण चात्वालमनेन इषेत्वेति शाखां छिनत्ति । ऊर्जे त्वेत्यनुमार्ष्टि वायवस्थेति वत्सानपाकरोति इत्यादिषूक्तैः अतः स इह नोच्यते । तत एव ज्ञेय इति भावः । तत इषे त्वेत्यस्य शाखाछेदने विनियोगः ॥

एवमूर्ज्जे त्वा ॥

पूर्वोक्तस्य शाखानुष्टुवित्यस्यैवमित्यतिदेशः तेनोर्ज्जे त्वेत्यस्यापि यजुषः शाखादेवता वैश्वानुष्टुप्छन्दः व्यत्ययत्वात् । शाखाया अनुमार्ज्जने पर्णादिपातनेन समीकरणे विनियोगः ॥

वायवो वायव्यं ॥

वायवस्थेतादं यजुर्वायव्यं वायुर्देवता यस्य तद्वायव्यं "वायवृतुपितुषसो यदिति यत्" । दैवी हृहा।छन्दः। चतुरक्षरत्वात् । वत्सापाकरणे विनियोगः ॥

देवो वऽऐनद्रम् ॥

देवा वः सवितेतादं यजुरैन्द्रं इन्द्रो देवता यस्य तदैन्द्रं । अत्र हाषट्यक्षरत्वात् । हाभ्यामक्षराभ्यामूना विराडष्टिश्छन्दः। अथ वा हाभ्यामधिका अतिशक्करी वा खराट् हाभ्यामधिका त्राष्ट्रीपङ्क्तिर्वा खराट् । गाः शाखयोपस्पर्शने विनियोगः ॥ (१)

यजमानस्य शाखा ॥

यजमानस्य पयूनित्यस्य शाखादेवता यजुर्हृतौ वा आसुरी जगती वा । नवाक्षरत्वात् । शाखोपगूहने विनियोगः ॥

---

(१) अत्र पद्धतिकारेण विशेषोऽभिहितः । वेषोऽस्युपवेषो द्विषतोऽउपवेवेष्टु-वेशौ ॥ ऽअग्ने सुभगधारय ॥ ऋद्धाः कर्म्मण्या ऽअनपायिनो यथासन्नुपवेषः । इति मन्त्रस्य परमेष्ठी ऋषि उपवेषो देवता ब्राह्मी उष्णिक् छन्द उपवेषकरणे विनियोगः । इति बोध्यः ॥

वसोर्वायव्यं ॥

वसोः पवित्रमसीत्येतद्यजुर्वायव्यं वायुदेवतं देवीजगती यजुरृष्णिग्वा । स्वराचरत्वात् । स्रुवायां पवित्रबन्धने विनियोगः ॥

द्यौर्मातरिश्वनऽउखा ।

द्यौरसि मातरिश्वनस्त्वयीदमुखा देवता । द्यौरिति देवीजगतीऋष्णिग्वा । स्वराचरत्वात् । स्रुवाद्दाने विनियोगः । मातरिश्वनइति द्वाविंशदक्षरत्वात्त्वार्षानुष्टुप्प्राजापत्या जगती वा स्रुवाधिश्रयणे विनियोगः ॥

वसोर्वायव्यम् ॥ (१)

द्वितीयं वसोः पवित्रमिति वायव्यं वायुरस्य देवता प्राजापत्या पंक्तिर्वा सामजगती वा ऋचामनुष्टुब्वा । चतुर्विंशदक्षरत्वात् । उखा याऽपरि पवित्रस्य निधाने विनियोगः ॥

देवस्त्वा पयः ॥

देवस्त्वा सवितेत्यस्य यजुषः पयो देवता सामत्रिष्टुप् द्वाविंशत्यक्षरत्वात् । दोग्ध्र्याउखायामासिच्यमाने पयसि जपे विनियोगः॥

कामधुक्षः प्रश्नः ॥

कामधुगित्यस्य यजुषः प्रश्नो देवता देवी बृहतीछन्दः । चतुरक्षरत्वात् गोनामप्रश्ने विनियोगः ।

सा विश्वायुरित्योषि गव्यानि ॥

सा विश्वायुरित्यादीनि चौषि यजूंष्यि गव्यानि । एषां गोदैवतेत्यर्थः । आद्यस्य देवीबृहती चतुरक्षरत्वात् उत्तरयोर्दैवीपङ्क्तिः पञ्चाक्षरत्वात् गोरायीक्षणे विनियोगः ।

---

(१) द्वितीय काण्डका खण्डपञ्चकरूपपाठः कौरावसर्वानुक्रमे नास्तीति बोध्यः ॥

इन्द्रस्येन्द्रय ।

इन्द्रस्य त्वा भागांसीत्येतदैन्द्रं इन्द्रदेवतं द्वादशाक्षरत्वात् । प्राजापत्योष्णिक्सामगायत्री वा यजुर्ज्जगती वा आसुरी ह्रस्वा वा आतञ्चने विनियोगः ॥

विष्णो पवः ॥ २ ॥

विष्णो हव्यं इत्यस्य पयो देवता । दैवीबृहत्यनुष्टुभौ वा षडक्षरत्वात् ।(१) अभिधाने विनियोगः ॥ २ ॥

अग्नऽइदमाग्नेयं ॥

अग्ने व्रतपते इदमहमित्येते यजुषी आग्नेयो अनयोरग्निर्देवतेत्यर्थः । प्रथमा ऋगुष्णिक् एकविंशत्यक्षरत्वात् ॥ द्वितीया प्राजापत्योष्णिक् सामगायत्री वा । आसुरी ह्रस्वा वा प्राजापत्योष्णिग्वा । द्वादशाक्षरत्वात् । व्रतयज्ञे पर्यायेण च विनियोगः ।

कस्त्वा प्राजापत्यम् ।

कस्त्वेत्येतत्प्रजापतिदेवतं । सान्त्वां त्रिष्टुब्द्वाविंशत्यक्षरत्वात् । प्रणीतानामाहवनीयस्योत्तरतो निधाने विनियोगः ।

कर्म्मणे स्रुक्शूर्पम् ।

कर्म्मणे वामित्य स्रुक्शूर्पं देवता स्रुक्च शूर्पंच स्रुक्शूर्पं द्वैकवदभावे निर्देशः । अष्टाक्षरत्वात् । प्राजापत्यागायत्री यजुष्यनुष्टुब्वा । शूर्पाग्निहोत्रहवणीदाने विनियोगः ॥

प्रत्युष्टं हे राक्षसे ।

प्रत्युष्टं निष्टप्तमिति हे यजुषी राक्षसे । अनयोरग्नी देवतेत्यर्थः । द्वादशाक्षरत्वात् सामगायत्री । यजुर्जगती वा आसुरी ह्रस्वा वा । प्राजापत्योष्णिग्वा शूर्पाग्निहोत्रहवणीदानयोः व्रतयज्ञे विनियोगः । अन-

(१) अभिधाने इति पद्धतिपुस्तकपाठः ॥

वोदधारणमन्तरं अपां अर्थः कार्यः राजसमन्वयात् ॥

उरु अन्तरिक्षं सर्वत्र ।

उर्वन्तरिक्षमन्वेमीत्येतस्य-

तुर्वश्च रक्षोघ्नं । एतेन यजुषा ब्रह्मरक्षसोः क्षयणं क्रियतइत्यर्थः । न केवलमत्र किं तु सर्वत्रैतद्यजुरित्येवं विधमेवेत्यर्थः । त्रिष्टुबन्तरिक्षं देवता । अत्र वा अयमर्थः । उर्वन्तरिक्षमित्यत्र रक्षोघ्नं ब्रह्मदेवतेति एवं ब्रह्मसंहिताभाष्ये व्याख्यातमस्ति । प्राजापत्या गायत्री यजुरनुष्टुब्वा । षडक्षरत्वात् । अन्नः प्रतिगमने विनियोगः ।

धूरसि धूः ।

धूरसीत्यस्य धूर्देवता । चतुर्विंशत्यक्षरत्वात् । प्राजापत्या पंक्तिर्वा । आमन्त्रणतो वा । षट्चामनुष्टुब्वा । युगधुरोऽभिमर्शने विनियोगः ।

देवानां विष्णुस्त्वा नः ।

देवानामसि विष्णुस्त्वा क्रमतामित्यनयोरग्नो देवता । देवानामिति ब्राह्मी अनुष्टुप् अष्टाचत्वारिंशदक्षरत्वात् । ईषाभिमर्शने विनियोगः । विष्णुस्त्वा देवो त्रिष्टुप् । यजुर्गायत्री वा । षडक्षरत्वात । अन्नसमारोहणे विनियोगः । पात्नीवतो हविर्यज्ञपक्षे धूरसि देवानां विष्णुस्त्वेत्येषा पात्नीवते जपे विनियोगः ॥

उरु हविष्मतः ॥

उरुवातायेत्यस्य यजुषो हविष्मती व्रीहियवादयो देवताः दैवीपंक्तिः पञ्चाक्षरत्वात् । हविःप्रक्षेपे विनियोगः ।

अपहतर्० रक्षः ।

अपहतमित्यस्य रक्षोदेवता देवीत्रिष्टुप् यजुर्गायत्री वा । षडक्षरत्वात् । अपद्रव्यनिरसने तद्भावे हविरभिमर्शने वा विनियोगः ।

राक्षसत्वादपां अर्घः ॥

यच्छन्तां हविष्याः ।

यच्छन्तां पञ्चेत्यस्य हविषा देवताः । पङ्क्त्यन्तत्वादैवीपंक्तिश्छंदः । हविर्दाने विनियोगः ।

देवस्य त्वा सावि मृ० ।

देवस्य त्वा सवितुरित्येतत्सावित्रं सवितृदेवतं ॥ न केवलमत्र । किंतु सर्वत्र देवस्येत्येतत्सवितृदेवत्यमेव। प्राजापत्यानुष्टुभी सामपंक्तिर्वा विंशत्यक्षरत्वात् । अत्र हविर्मार्जने विनियोगः ॥

अग्नये लिंगोक्ते ।

अग्नये जुष्टमग्नीषोमाभ्यां जुष्टमित्यनयोर्लिंगेनैवाग्निरग्नीषोमौ च यथाक्रमं देवते उक्ते,अग्नये प्राजापत्या गायत्री याजुषी अनुष्टुब्वा । अष्टाक्षरत्वात् । अग्नीषोमाभ्यां आसुरीविष्टुप् । याजुषी पंक्तिर्वा । हयोर्हविर्निर्वापे विनियोगः ॥

भूताय त्वा हविः

भूतायत्वेत्यस्य हविर्देवता । अष्टाक्षरत्वात्प्राजापत्या गायत्री-छंदः यजुषीअनुष्टुब्वा । प्रेषाभिमर्शने विनियोगः ॥

स्वः सूर्यः

स्वरित्यस्य सूर्यो देवता । षडक्षरत्वादैवीविष्टुप् यजुर्गायत्री वा प्राजीयत्वे विनियोगः ॥

दृढं० हन्तां गृध्राः ।

दृढं०हन्तान्दुर्याइत्यस्य गृध्रा देवता नवाक्षरत्वादासुरी जगती । यजुर्बृहती वा छंदः अनसोहविर्धानपक्षे अनसोऽवरोहणे विनियोगः । पाचीतो ग्रहणपक्षे तूष्णीं ॥

पृथिव्यास्त्वा हव्यम् ।

ध्रुविष्यास्त्वेत्यस्य ध्रुवं देवता प्राजापत्या हविष्मती सामपंक्तिर्वा छंदः। विंशत्यक्षरत्वात्। अग्नयेऽग्नीषोमाभ्यां विनियोगः॥

पवित्रे लिंगोक्तं।

पवित्रे स्थइत्यस्य यजुषो लिंगेनैव पवित्रे देवतमुक्तं। सप्ताक्षरत्वाद्देवी गायत्री यजुरुष्णिग्वा पवित्रच्छेदने विनियोगः।

सवितुर्देवीः प्रोक्षिताभ्यापानि।

सवितुर्वः देवीरापः। प्रोक्षितास्थेत्येतानि त्रीणि यजूंष्याप्यानि एतामापो देवता इत्यर्थः। सवितुर्वः प्राजापत्या पङ्क्तिः सामजगती वा। ऋचामनुष्टुब्वा। चतुर्विंशत्यक्षरत्वात् प्रोक्षण्युत्पवने विनियोगः। देवीरापश्चतुर्विंशदक्षरत्वादृग्भ्यां न्यूना आर्षी पङ्क्तिः। उद्धिक्षणे विनियोगः। प्रोक्षिता देवीर्हविष्मती चतुरक्षरत्वात्। प्रोक्षणीनाम् प्रोक्षणे विनियोगः।

अग्नये लिङ्गोक्ते।

अग्नये त्वाऽग्नीषोमाभ्यां त्वेत्यनयोर्लिंङ्गेनैवाग्नीरग्नीषोमौ च क्रमेण देवते उक्ते। अग्नये त्वा आसुरीजगती। यजुर्हविष्मती वा। नवाक्षरत्वात्। हविःप्रोक्षणे विनियोगः।

अग्नीषोमाभ्यान्त्वा।

एकादशाक्षरत्वादासुरीपङ्क्तिः। याजुषी त्रिष्टुब्वा हविःप्रोक्षणे विनियोगः॥

दैव्याय पात्राणि

दैव्याय कर्मणेत्यस्य पात्राणि देवताः, अष्टाविंशदक्षरत्वात् प्राजापत्यानुष्टुप् पात्रप्रोक्षणे विनियोगः॥ २॥

धर्मासीत्याः कृष्णाजिनम्।

(१) इदं सूत्रखण्डं कारवीयसर्वानुक्रमे नास्ति पाठः॥

मर्मासि अदित्यास्त्वगित्यनयोः ऋष्यार्ज्यं देवता । मर्मदेश्यनुष्टुप्छन्दस्त्वात् । ऋष्यार्ज्यनादाने विनियोगः, आदित्या आसुर्यनुष्टुप्छन्दोदृग्याचरत्वात् । ऋष्यार्ज्यनाहरणे विनियोगः ॥

अवधूतꣳ रक्षसम् ।

अवधूतमित्यस्य रक्षोदेवता आसुर्यनुष्टुप्छन्दोदृग्याचरत्वात् । रक्षसत्वादुदात्तस्वरः । अवधूतने विनियोगः ॥

अद्रिर्ग्रावोलूखले

अद्रिरसि ग्रावासि इत्येते द्वे यजुषी उलूखले । अनयोरुलूखलम् देवता । षोडशाक्षरत्वात्प्राजापत्यानुष्टुप्सामानुष्टुभ्वा उलूखलस्थापने विनियोगः ॥

अग्नेर्हविः

अग्नेस्तनूरित्यस्य हविर्देवताएकविंशत्यक्षरत्वात् । ऋगुष्णिक् हविरावपने विनियोगः ॥

बृहद्रथन्तरे मौसले, ।

बृहद्ग्रावासि स बृहद्देवेभ्य इत्येते यजुषी मौसले । मुसलदेवते । बृहत्प्रासुरी जगती यजुर्बृहती वा नवाक्षरत्वात् । मुसलादाने विनियोगः । सबृहद् प्राजापत्यानुष्टुप्सामानुष्टुभ्वा मुसलावघाते विनियोगः ॥

हविष्कृदधिदैवतं वागधियज्ञं पत्नी ।

हविष्कृदेहीत्यस्याधिदैवतं देवतेषु वा देवता । अनियतम् यज्ञविषये पत्नी देवता । पञ्चाक्षरत्वादैवीपङ्क्तिः परोक्षाभ्यीप्रत्यक्षं वा आज्ञाने विनियोगः ॥

कुक्कुटो वाक् ।

कुक्कुटोसीत्यस्य वाग्देवता । सप्तविंशत्यक्षरत्वाद्बृहती हविर्यज्ञवीरा इत्यने विनियोगः ॥

वर्षवृद्धमसि० सूर्यम् ।

वर्षवृद्धमसीत्यस्य सूर्यो देवता देवीबृहतीछन्दो मध्यमः स्वरः षड्जस्वरत्वात् सूर्यदाने विनियोगः ॥

प्रतित्वा० कविः

प्रतित्वेत्यस्य कविर्देवता आसुरीजगती छन्दो धैवतः स्वरः नवाक्षरत्वात् । कविवरणे विनियोगः ॥

परापूतमप्रहृतर्ठं० रक्षसे

परापूतर्ठं० रक्षोऽप्रहृतर्ठं० रक्षस्त्वेते यजुषी राक्षसे रक्षोदेवते प्रथमा सामोष्णिक् आसुर्युष्णिग्वा चतुर्थ्याक्षरत्वात् । निष्क्रयणे विनियोगः । अपहृतम् षडक्षरत्वाद्यजुर्गायत्री देवीबृहती वा तुषनिरसने विनियोगः । राक्षसत्वादुदकालम्भने ॥

वायुर्वो देवो वस्सवितोत्पुनात्विति ।

वायुर्वो विविनत्तु ॥ देवो वः सविता पुनात्वित्यनयोस्सन्दंशादेवता । वायुर्वः । दैवी जगती यजुरुष्णिग्वा समाक्षरत्वात् । विवेचने विनियोगः । देवो वः सामबृहती छन्दो विंशत्यक्षरत्वात् । अभिमन्त्रणे विनियोगः ॥

धृष्टिरुपवेषः ।

धृष्टिरसीत्यस्योपवेषो देवतादैवी बृहती चतुरक्षरत्वात् उपवेषादाने विनियोगः ॥

अपाग्नऽआदेवयजमाग्नेये ।

अपाग्ने अग्निं आदेवयजमित्येते यजुषी अग्निदेवते । अपाग्ने प्राजापत्यानुष्टुप् । सामानुष्टुब्वा । अङ्गाराणाम् प्राकरणे विनियोगः । आदेवयजं दैवी जगती यजुरुष्णिग्वा समाक्षरत्वात् । अङ्गारोद्धरणे विनियोगः ॥

ध्रुवमसि षण्णाम् कपालानि ।

ध्रुवमसि; धरुणमसि । धर्त्रमसि विश्वाभ्यस्त्वा । चितस्थ । भृगूणामित्येतेषाम् षण्णाम् यजुषाम् कपालानि देवता । आग्नेयानाम् षण्णाम् कपालोपधाने विनियोगः । भृगूणामित्यङ्गारेष्वभ्यूहने । ध्रुवमसि ऋक् त्रिष्टुप् । एकाधिका चतुस्त्रिंशदक्षरत्वात् । धरुणमसि ब्राह्मी गायत्री ऋग्जगती वा षट्त्रिंशदक्षरत्वात्, धर्त्रमसि । ऋचान्त्रिष्टुप्त्रयस्त्रिंशदक्षरत्वात्, विश्वाभ्यस्त्वा याजुषीत्रिष्टुप् आसुरी पङ्क्तिर्वा । एकादशाक्षरत्वात् । चितस्थ दैवीत्रिष्टुप्यजुर्गायत्री वा षडक्षरत्वात् । भृगूणाम् । आसुर्यनुष्टुप् त्रयोदशाक्षरत्वात् ॥

अग्ने व्रतपाग्नेयम् ।

अग्ने व्रतपाग्नटभ्णीष्वेत्येतदग्निदेवतम् । मध्यमकपालस्योपर्यङ्गारनिधाने विनियुक्तम् । दैवीजगती याजुषी उष्णिग्वा । समाक्षरत्वात् ॥

धिषणाऽसि दार्षदम् ।

धिषणासीत्येतदृषदेवतम् । कृष्णाजिनस्योपरि दृषदुपधाने विनियुक्तम । आसुरी गायत्री पञ्चदशाक्षरत्वात् । अग्न आयाहीत्यवधूतम् अदित्यास्त्वगित्येतेषाम् सर्वं प्रागुक्तमिति । पुनर्नोक्तम् ॥

दिवः श्येना ।

दिवस्कम्भनीरित्यस्य श्येनादेवता दृषदोऽधस्ताच्छम्योपोहने विनियोगः । दैवी जगती यजुरुष्णिग्वा समाक्षरत्वात् ।

धिषणोपलम् ।

धिषणाऽसि पार्वतेयीत्येतदुपलदेवतम् । उपलदेवतं । उपलनिधाने विनियुक्तं प्राजापत्यानुष्टुप् । सामानुष्टुप् षोडशाक्षरत्वात् ।

धान्यमसि घर्मार्थ० ऋषिः ।

धान्यमसि । प्राणाय । उदानाय । व्यानाय । दीर्घामनु । चक्षुषे त्वा इत्येतेषां षण्णां यजुषां ऋषिर्दैवता धान्यमसि आसुरीजगती यजुर्बृहती वा । नवाक्षरत्वात् । प्राणाय देवी बृहती चतुरक्षरत्वात्, उदानाय देवीपंक्तिः पञ्चाक्षरत्वात्, व्यानाय देवीबृहती चतुरक्षरत्वात् । दीर्घामनु त्रिष्टुप् । चतुश्चित्वादक्षरत्वात् । चक्षुषे त्वेति देवीबृहती चतुरक्षरत्वात् । धान्यमसीत्यस्य तण्डुलावापे विनियोगः । प्राणायेत्यादित्रयाणां पेषणे । दीर्घामित्यस्य प्रोक्षणे । चक्षुषे त्वेत्यस्येक्षणे ।

मक्षीनामाज्यम् ।

मक्षीनां पयोऽसीत्यस्याज्यं देवता । यजुर्गायत्री दैवीत्रिष्टुब्बा षडक्षरत्वात् । आज्यनिर्वापे विनियोगः ॥ ४ ॥(१)

सँव्वपामि ऋषिः ।

संव्वपामीत्यस्य ऋषिर्देवता । दैवीबृहती चतुरक्षरत्वात् । पाण्यां संवापे विनियोगः । देवस्य त्वेत्यस्य प्रागुक्तम् ।

समापऽओषधीभिरम् ।

समापऽओषधीभिरित्येतद्यजुरापं । आपोऽस्य देवताइत्यर्थः । एकोनाषार्षीपङ्क्तिः एकोनचत्वारिंशदक्षरत्वात् । उपसर्जनीप्रतिग्रहे विनियोगः ।

जनयत्यै त्वेदर्थ० ऋषिः

जनयत्यै त्वा । इदमग्ने रिदं अग्नीषोमयो रित्येतेषां त्रयाणां ऋषिर्दैवता । जनयत्यै त्वा । प्राजापत्या गायत्री याजुषीअनुष्टुब्बा अष्टाक्षरत्वात् । संपवने विनियोगः । इदमग्नेः, दैवीबृहती चतुरक्षर-

(१) वेदोऽसि वेदवर्षा० इति करावशात्सीयसर्वानुक्रमपाठः ॥

त्वात् । इदमग्नीषोमयोरिति दैवीजगती यजुरन्त्यिका सप्ताक्षरत्वात् । उभयोर्वैश्वदेवाग्नेऽग्नि विनियोगः ।

इषे त्वाऽऽज्यम् ।

इषे त्वेत्यस्याज्यम् देवता । दैव्यनुष्टुप्पञ्चाक्षरत्वात् आज्याभिमर्शने विनियोगः ॥

घर्मोऽसि पयसां पुरोडाशः । (१)

घर्मोऽसि विश्वायु, उरु प्रथाः । अग्निष्टे । देवस्त्वा । मा भेः । अतमेरुः, इत्येषाम् पयसाम् पुरोडाशो देवता । घर्मोऽसि यजुर्गायत्री । दैवी त्रिष्टुब्वा । षडक्षरत्वात् । पुरोडाशाभिमर्शने विनियोगः । उरुप्रथाः । सामबृहती कृत्स्नायत्री वा अष्टाक्षरत्वात् । अग्नेऽग्नि विनियोगः । अग्निष्टे । प्राजापत्या गायत्री । यजुरनुष्टुब्वा अष्टाक्षरत्वात् । अङ्गुलिरभिमर्शने विनियोगः । देवस्त्वा । प्राजापत्यानुष्टुप् । सामानुष्टुब्वा । षोडशाक्षरत्वात् अपरे विनियोगः, मा भेः यजुर्गायत्री दैवी त्रिष्टुब्वा । षडक्षरत्वात् आलम्भने विनियोगः । अतमेरुः । सामबृहती गायत्री अष्टाद्याक्षरत्वात् घृताभिघारणे विनियोगः ॥

चिताय चयाणाम् चितो द्वित एकतः क्रमेण

चितो द्वित एकतः । क्रमेण । चिताय त्वेत्यादीनाम् चयाणाम् यजुषां क्रमेण चितो द्वित एकतः चयाणाम् देवताः । चिताय त्वेत्यस्य चितः, द्वितायेत्यस्य द्वित., एकतायेत्यस्यैकतः । आद्ययोर्दैवीबृहती चतुरक्षरत्वात् । एकताय दैवी पङ्क्तिः पञ्चाक्षरत्वात् । अग्न्युद्वासनेऽग्निचयने विनियोगः ॥

आददऽइन्द्रस्य स्फ्यः ।

---

(१) अन्तरिक्षदे०राक्षसम् । इति करावशात्वीयसर्वानुक्रमपाठः ॥ अन्तरिक्षमित्यस्य परमेष्ठी ऋषिरग्नो देवताऽऽसुर्यनुष्टुप्छन्दः पर्यग्निकरणे विनियोगः ॥

आददेऽश्वरजतम्, इन्द्रस्य बाहुरसीत्यनयोः रुक्मो देवताः । आद्यस्य दशाक्षरत्वादासुरीविष्टुप् । यजुः पङ्क्तिर्वा रुक्मदाने विनियोगः, इन्द्रस्य प्राजापत्या जगती भार्षी त्वनुष्टुब्वा जपे विनियोगः ॥

पृथिवि वेदिः। (१)

पृथिवि देवयजनीत्यस्य वेदिर्देवता सामबृहतीऋग्गायत्री वा । जघोपदशाक्षरत्वेन यज्यूढेनाष्टादशाक्षरत्वात् । वेदरचने विनियोगः ।

व्रजम् पुरीषम् ।

व्रजक्षित्यस्य पुरीषं देवता । दैवी जगती यजुरुच्चिख्वा । सप्ताक्षरत्वात् । पुरीषादाने विनियोगः ॥

बर्हत ब्रेदिः ।

बर्हत ते इत्यस्य वेदिर्देवता । दैवी पङ्क्तिः पञ्चाक्षरत्वात् । वेदिप्रोक्षणे विनियोगः ॥

बधान सावित्रम् ।

बधान देव सवितरित्येतद्यजुःसावित्रम् । सविताऽस्य देवता इत्यर्थः, ऋग्जगती वा । ब्राह्मी गायत्री वा । योऽग्नित्यनैकादशपूर्वरूपव्यूहेन षट्त्रिंशदक्षरपूरणात् । (२) पुरीषमोत्करे प्रक्षेपे विनियोगः ॥

अपारुक्मरुरोऽआसुरे ।

अपारुक्म । अररो दिवमिति द्वे यजुषी आसुरे अनयोरसुरो देवता । अतउदकालभ्यः, अपारुक्म् आसुरीगायत्री पञ्चदशाक्षर-

---

(१) पृथिव्यै पृथिवि वेदिरिति कात्यायनशाखीयसर्वानुक्रमपाठः । पृथिव्यै वर्मासीत्यस्य परमेष्ठी ऋषिस्तृणम् देवता दैवी त्रिष्टुप्तृणनिधाने विनियोगः ॥ पृथिव्यै वर्मोऽसि पृथिवि देवयजनि ।

(२) पुरीषस्योत्करे इति "क" पुस्तकपाठः ॥

त्वात्, चरटो प्राजापत्या गायत्री यजुरनुष्टुभा । अष्टाक्षरत्वात् । प्रथमस्य प्रहरणे (१) विनियोगः । द्वितीयस्योच्चारणविधावे विनियोगः ॥

द्रुण्वद्धे वेदिः

द्रुण्वद्धे वानित्वस्य वेदिर्देवता । देवी पीष्टुप् यजुर्गायत्री वा चतुरक्षरत्वात् द्वितीयप्रहरणे विनियोगः ॥

गायत्रेण त्वौषि वैष्णवानि ।

गायत्रेण त्वा, त्रैष्टुभेन त्वा, जागतेन त्वेत्येतानि त्रीणि यजूंष-पि वैष्णवानि विष्णुदेवतानि पूर्वपरिधौ विनियुक्तानि । चयाणामपि चतुरक्षरत्वादाद्यर्चनुष्टुप्छन्दः ॥

सुक्षा चयाणाम् वेदिः

सुक्षा वानि । स्योना वानि । ऊर्ज्जस्वती वेत्येषाम् चयाणाम् वेदिर्देवता । उत्तरपरिधौ विनियोगः । सुक्षा प्राजापत्यागायत्री यजुरनुष्टुभा अष्टाक्षरत्वात् स्योना नवाक्षरत्वादासुरीजगती यजुर्ज्ञेया । ऊर्ज्जस्वती एकादशाक्षरत्वात् । यजुस्त्रिष्टुप् आसुरी पङ्क्तिर्वा ॥

पुराऽक्रूरꣳसोऽप्यश्वान्ऋभसं विष्टभम् ।

पुराक्रूरस्येत्येतान्यृचम् चान्द्रमसम् चन्द्रमो देवताम् त्रिष्टुप्छन्दस्काम्, अवभृथसंस्कृषिरपश्यत् । दृष्टवान् । अनुमार्जने चास्या विनियोगः, यस्मादेकादशाक्षरत्वात्रयः पादाः सा चतुश्चत्वारिंशद्वा त्रिष्टुभ्यन्येनोच्यते, अक्षर्यः पादो द्वादशाक्षरत्वेनैवाक्षराधिक्यात् ॥

प्रोक्षणीः प्रैषः ।

प्रोक्षणीरासादयेत्ययम् प्रैषः । तस्य सम्बोध्यत्वात् । एवम् स-

---

(१) प्रहारे इति 'स, पुस्तकपाठश्च ॥

वैदे वाचाम् वेदम् । वसुदेवीवसुदेवी वसती वा छन्दःसाम्यात् । वसोर्धारेवसो विनियोगः ॥

द्विषतऽपाभिचारिकम् ।

द्विषतो वर्णोक्तीलेतदयजुरभिचारिकम् । अभिचारसाधकमित्यर्थः । लिङ्गादस्य स्फ्यो देवता । कर्मणा यस्य पीडनमभिचारः सप्रयोजनमस्य तदाभिचारिकम् । "प्रयोजनमिति ठक्" । यदा चाभिचारबुद्धा द्विषतइत्यस्य स्थाने यजुर्नान गृह्यते तदा तस्योच्चारणानन्तरमुदकस्पर्शः कर्तव्यो, न परथा । इयम् दैवीबृहती यजुर्गायत्री वा । षडक्षरत्वात् । स्फ्यस्योल्लेखे प्रक्षेपे विनियोगः ॥ (१)

अनिग्रित स्रुवः ॥

अनेग्रितोऽसीत्यस्य स्रुवोदेवता स्रुवसम्मार्जने विनियोगः । प्राजापत्या बृहती सामपङ्क्तिर्वा विंशत्यक्षरत्वात् ॥

अनिग्रिताः स्रुचः ।

अनिग्रिताऽसीत्यस्य स्रुग्देवता प्राजापत्या बृहती सामपङ्क्तिर्वा विंशत्यक्षरत्वात् स्रुक्संमार्जने विनियोगः ।

अदित्यै विष्णोर्योक्त्रम् ।

अदित्यै रास्ना, विष्णोर्वेष्यदित्यनयोर्योक्त्रम् देवता, अदित्यै देवीबृहती यजुर्गायत्री वा षडक्षरत्वात् । योक्त्रपरिहरणे विनियोगः । विष्णोः । दैवीपङ्क्तिः । पञ्चाक्षरत्वात् । ऊर्ध्वमुद्गूहने विनियोगः ।

ऊर्जे त्रयाणामाज्यम्

ऊर्जे त्वा, अदब्धेन, त्वा सवितुस्त्वा, इत्येतेषाम् त्रयाणाम् यजुषामाज्यम् देवता । ऊर्जे त्वा दैव्यनुष्टुप् । त्र्यक्षरत्वात् आज्यावेक्षणे

---

(१) प्रत्युष्ट रक्षोऽग्निरित्यनयोः परमेष्ठी देवता रक्षो देवता सामगायत्री छन्दः प्रतपने विनियोगः ॥ इति पद्धत्याः पाठः ॥

विनियोगः, अदब्धेति एकाक्षराधिकाक्षक त्रिष्टुप्पक्ष वा सैप्तसंयोगैकाक्षरीभावव्यूहेन षट्त्रिंशदक्षरा ब्राह्मी गायत्री वा षडङ्गगती वा आर्षी बृहती वा । आज्यावेक्षणे विनियोगः ॥

सवितुराप्रम् ।

सवितुर्वइत्येतद्यजुराप्रम् । अप्यापो देवता इत्यर्थः । छन्दस्तु प्राजापत्यादिपूर्वोक्तम् चतुर्विंशत्यक्षरत्वात् । (१) प्रोक्षण्युत्पवने विनियोगः ॥

तेजोऽसि धामाज्यम् ॥५॥(२)

तेजोऽसि, धाम नामासीत्येतयोराज्यम् देवता । तेजोऽसि यजुस्त्रिष्टुबासुरी पङ्क्तिर्वा । एकादशाक्षरत्वात् । आज्यावेक्षणे विनियोगः । धाम नाम एकविंशत्यक्षरा ऋषुष्णिक् आज्यग्रहणे विनियोगः ॥

कृष्णोऽसीध्मः ।

कृष्णोऽसीत्यस्येध्मो देवता चतुर्दशाक्षरा आसुर्युष्णिक्प्रामोष्णिग्वा । इध्मप्रोक्षणे विनियोगः ॥

वेदिर्बर्हिर्लिङ्गोक्ते ।

---

(१) आज्योत्पवने इति पद्धतिपाठः । सवितुरित्यस्यापो दे० प्राजा पं० प्रो० ॥

(२) अत्र काण्वीयसर्वानुक्रमे यस्ते प्राणश्च त्रिष्टुप् प्रथमाकण्डिका ॥ यस्ते प्राणः पशुषु प्रविष्टो देवानां विष्टाम्नयो वितस्थे ॥ आत्मन्वात्सोम घृतवन्हि भूत्वाऽग्निं गच्छ स्वर्यजमानाय विन्द ॥ इति शुक्लयजुःकाण्वशाखीयसंहितायां दशानुवाके षड्चाशत्कण्डिका ॥ मया माध्यन्दिन्याः शाखायाः संहितायाः अनुवाकसूत्रमात्रं मुद्रितं, परन्तु कात्यायनशाखीयसंहितायाः अनुवाकक्रमसूत्राणि सर्वाध्यायशेषे लिख्यन्ते । इषे त्वा तिस्रो वाचस्रि चतस्रोऽग्नेस्तनूपाऽष्टौ पवित्रे स्थश्चतस्रः शर्मासि सप्त धृष्टिरसि चतस्रः शर्मासि पुनः पञ्च देवस्य त्वा चतस्रो देवस्य त्वा पुनः षट् प्रत्युष्टं रक्षः षड्च प्रथमे, दश, पञ्चाशत् ॥१।१०।५०॥ इत्यनुवाकः ॥

वेदिरसीत्यस्य वेदिर्देवता । बर्हिरसीत्यस्य बर्हिर्देवता लिङ्गोक्तो वेदिरसि यजोदशाक्षरा भासुर्यनुष्टुप्वेदिसंस्कारे विनियुक्ता । बर्हिरसि बर्हिःसंस्कारे विनियोगः ॥

अदित्याऽज्यम् ।

अदित्ये व्युन्दनमसीत्येतद्यजुराज्यम् । आपोऽस्य देवताः । अष्टाक्षरा यजुरनुष्टुप्प्राजापत्या गायत्री वा मूलोपसेचने विनियोगः ॥

विष्णोः प्रास्तरम् ।

विष्णोः स्तुपोऽसीत्येतत्प्रास्तरम् । प्रस्तरदेवतम् । प्रस्तरप्रहरणे विनियुक्तम् । पञ्चाक्षरा दैवी पङ्क्तिः ॥

ऊर्णम्रदसं वेदिः ।

ऊर्णम्रदसमित्येतस्य वेदिर्देवता । पञ्चदशाक्षरा भासुरी गायत्री वेदिस्तरणे विनियोगः ॥

भूपतये त्रीण्याग्नेयानि । (१)

भूपतये स्वाहेत्यादीनि त्रीणि यजूंष्याग्नेयानि । एषामग्निर्देवता । आद्यस्य दैवीजगती यजुरुष्णिग्वा सप्ताक्षरत्वात् । अन्तरयोरष्टाक्षरा यजुरनुष्टुप् । प्राजापत्या गायत्री वा करम्भाभिमर्शने सर्वेषां विनियोगः ॥

गन्धर्वस्त्वयाणाम् परिधयः

गन्धर्वस्त्वा । इन्द्रस्य बाहुरसीत्यादयस्त्रयाणाम् यजुषाम् परिधयो देवताः । आद्या सप्तपदीर्घत्रयादेयव्यूहने षड्विंशदक्षरा भुरिगनुष्टुभी ब्राह्मी गायत्री वा । द्वितीया यथादेयव्यूहने द्वात्रिंशदक्षरा ब्राह्मी उष्णिक् । त्रयाणाम् परिधिपरिधाने विनियो

(१) भूपतये इति करम्भपाठः ॥

मः ॥

वीतिहोत्रम् त्वा कवेः ।

वीतिहोत्रम् त्वेत्येतामृचमाग्नेयीमग्निदेवताम् गायत्रीछन्दस्काम् विश्वावसुरृषिरपश्यत् । यस्माच्चतुरक्षराण्यादाः सा चतुर्वर्णत्वेन चतुरा गायत्री शब्देनोच्यते । अत्र प्रथमपादे त्रयोदशे तु वा इति व्यूहेनाष्टाक्षरपूरणम् । समिदाधाने विनियोगः ॥

समिदाग्नेयम् ।

समिदसीत्येतद्यजुराग्नेयम् । अग्निरस्य देवता । चतुरक्षरा देवीबृहती समिदाधाने विनियोगः ॥

सूर्यस्त्वा शिङ्गोक्षम् ।

सूर्यस्त्वेत्येतच्छिङ्गोक्षम् देवतम् । आहवनीयाग्निदेवतमित्यर्थः । पञ्चदशाक्षरासुरी गायत्री आहवनीयप्रोक्षणाभ्यर्जने विनियोगः ॥

सवितुर्विधृती ।

सवितुर्बाहूस्थइत्यस्य विधृतिर्देवता । यजुर्गायत्री । विधृत्योस्तरणे विनियोगः ॥

ऊर्णम्रदसमात्वा प्रास्तरे

ऊर्णम्रदसं । आत्वा वसवइत्येते प्रास्तरे प्रस्तरदेवते ऊर्णम्रदसम् पञ्चदशाक्षरा आसुरी गायत्री । प्रस्तरस्तरणे विनियोगः । आत्वा वसोदशाक्षरा आसुर्यनुष्टुप् । प्रस्तराभिघासे विनियोगः ॥

घृताच्यसि जुहूपभृद्ध्रुवाः क्रमेण ।

घृताच्यसि जुहूरित्यादिचयाणाम् यजुषां क्रमेण जुहूपभृद्ध्रुवाः देवताः । घृताच्यसि जुहूरित्यस्य जुहूर्देवता जुह्वाघासादने विनियोगः । घृताच्यसुपभृदित्यस्योपभृद्देवता उपभृदासादने विनियो-

मः । ध्रुवा मात्रेत्यस्य ध्रुवादेवता ध्रुवासादने विनियोगः । तिस्रोपि द्वाविंशत्यक्षराः सामचिष्टुप् ।

प्रियेण धाम्नेति ऋषिः ।

प्रियेण धाम्नेत्यस्य ऋषिर्देवता । द्वात्रिंशदक्षरा सामगायत्री यजुर्जगती वा आसुरी हविष्मती वा । प्राजापत्योक्षिण्वा । आसन्दीसादनाभ्यामाहवने विनियोगः ॥

ध्रुवाऽस्यऽसद—न्वाहि मांव्वैष्णवे ।

इमे द्वे यजुषी विष्णुदेवते पञ्चविंशत्यक्षरत्वादेकाक्षराधिका प्राजापत्या पङ्क्तिर्वा सामजगती वा । ऋचामनुष्टुब्वा । सर्वहविरासन्दीसादने विनियोगः । पाहि मां षडक्षरादेवी विष्टुप् । यजुर्गायत्री वा आसन्दीसादने विनियोगः ॥

अग्ने वाजजिदाग्नेयम् ।

अग्नेव्वा जजिदित्येतदग्निदेवतम् । एकोनविंशत्यक्षरत्वादेकाक्षराधिका सामबृहती । ऋग्गायत्री वा । अग्निसंभारे विनियोगः ।

नमो दैवम् ।

नमो देवेभ्यइत्येतद्यजुर्दैवम्, देवा देवता अस्येत्यर्थः । पञ्चाक्षरा दैवीपङ्क्तिः । अञ्जलिकरणे विनियोगः ॥

स्वधा पित्र्यम् ।

स्वधा पितृभ्यइत्यस्य पितरो देवताः पञ्चाक्षरा दैवीपंक्तिः अञ्जलिकरणे विनियोगः । पितृत्वादुदकस्यार्थः

सुयमे स्रुचौ ।

सुयमे मे इत्यस्य स्रुचौ देवता एकविंशत्यक्षरा त्रयुष्णिक् । स्रुचोरादाने विनियोगः ॥

अङ्घ्रिणा वैष्णवम् ।

अङ्घ्रिणा विष्णवित्येतद्यजुर्वैष्णवम् । विष्णुरस्य देवता । एकाद्याक्षरा याजुषी त्रिष्टुब्वा । आसुरीपंक्तिर्वा छन्दः । सौत्रामणी विनियोगः ॥

वसुमतीमाग्नेयम्

वसुमतीरित्येतदग्निदेवतम् । एकोनविंशत्यक्षरत्वादेकाक्षराधिका सामबृहती । पङ्क्तिर्वा । सौत्रामणी (१) ममस्थाने विनियोगः ॥

दृतऽऐन्द्रम् ।

दृतऽइन्द्रइत्येतद्यजुरैन्द्रदेवतम् । एकाक्षराधिका प्रकृतिश्छन्दः । सप्तपञ्चाशदक्षरत्वात् उत्तराधारहोमे विनियोगः ॥

संज्योतिषाऽऽज्यम् । (२)

अस्याज्यम् देवताः षडक्षरा देवीत्रिष्टुप् यजुर्गायत्री वा । धुवासमञ्चने विनियोगः ॥

मयोदमाग्नेयः प्रतिग्रहणम् ।

मयोदमित्येतद्यजुराग्नेयः प्रतिग्रहणम् आग्नामनमाग्नेयः अग्नेरस्य वस्तुनः प्राप्तीच्छा आग्नेयः प्रतिगृह्यते प्रार्थ्यते येन तत्आग्नेयः प्रतिग्रहणम् । लिङ्गादिन्द्रो मघवा देवता अथवाऽग्नेयः प्रतिग्रहणे देवता जपे वा रूपकयजनस्याप्रस्तुतत्वात् । सवर्णदीर्घयणादेशयोरन्यतरव्यूहेन षड्विंशदक्षरा । ब्राह्मीगायत्री ऋग्जगती वा

उपहूता द्यावापृथिव्यम् ।

---

(१) मवस्थाने इति भाष्यपाठः ।

(२) अत्राभीमदन्त पित्रत्रे इति कारवीयसर्वानुक्रमपाठः ॥ एतस्यामे उपहूता तस्यामे मयोदमाग्नेस्तस्यामे अग्ने वाजजिदित्यत्रापि व्युत्क्रमेण पाठः ॥

उपहूता पृथिवी उपहूतो द्यौरितीदं यजुर्दयम् व्युत्क्रमेण द्यावा पृथिव्यौ अस्य देवते । द्यावापृथिव्यां प्रथमस्य पृथिवीदेवता ऋग्बृहती । द्वितीययोः सामत्रिष्टुप्पञ्चदशस्तोमाग्ने अग्नयेविनियोगः ॥६॥

ब्रह्मत्वं प्रतिष्ठान्तं बृहस्पतिराङ्गिरसोऽपश्यत्

देवस्य त्वेत्यस्य प्राग्निवपनविधये विनियोगः, अत्र देवस्य त्वेत्यस्य प्रागुक्तम् । प्रतिगृह्णामीति पञ्चाक्षरा दैवी पंक्तिः

अग्नेष्ट्वा प्राग्नित्रम् । (१)

अग्नेष्ट्वाऽत्यस्य प्राग्नित्रम् देवता । अष्टाक्षरा यजुरनुष्टुप्प्राजापत्या गायत्री वा । प्राग्नये विनियोगः ॥

एतं ते वैश्वदेवम् ।

---

(१) एतस्मात्सूत्रखण्डात्पूर्वं कारावीयसर्वानुक्रमण्याम् "देवसवितरेतमित्यादीनि सर्वाणि यजूंष्यृषि लिङ्गोक्तदेवत्यानि बृहस्पतिर्देवानां बार्हस्पत्यं निरस्तः पाप्मा-राक्षोन्निरदहद्बार्हस्पत्य मित्रस्य त्वा मैत्रम्,, । इति पाठो मन्त्रश्चाधिकः ॥ पुनरस्मादग्रे "याऽअप्सु नाभ्य प्रजापतेर्भागोऽन्वाहार्यम् ॥ ते मनवा यथा देव सवितरेतं त्वा वृणते बृहस्पतिर्ब्रह्मायम् ॥ तदहम्मनसे प्रब्रवीमि ॥१॥ मनो गायत्र्यै गायत्री त्रिष्टुभ त्रिष्टुब्जगत्यै जगत्यनुष्टुभे ॥ अनुष्टुप्प्रजापतये प्रजापतिर्देवेभ्यो देवेभ्यः ॥२॥ बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम् ॥ भूभुवः स्वर्निरस्तः पाप्मेदमहं बृहस्पतेः सदसि सीदामि ॥3॥ मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ देवस्य०पृथिव्यास्त्वा एतस्याग्रे कारावीयानामिदं सूत्र "याऽअप्सु नाभ्यं प्रजापतेर्भागोऽन्वाहार्यम्,, ॥ देव सवितुः प्रसवे ॥ ४ ॥ आददेऽग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन ॥ याऽअप्स्वन्तर्देवतास्ताऽइदर्ठ० शमयन्तु ॥५॥ स्वाहा कृतं जठरमिन्द्रस्य गच्छ ॥ घसिता मे मांसम्पृक्था ऊदध्वम्मे नाभेः सीद ॥ ६ । इन्द्रस्य त्वा जठरे सादयामि ॥ प्रजापतेर्भागोस्यूर्जस्वान्पयस्वान् ॥ ७ ॥ प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाहि ॥ ऊर्गस्यूर्जम्मयि धेह्यक्षितिरसि मा मेष्टा अमुत्रामुष्मिंल्लोकेहं च ॥ ९ ॥ एते मन्त्राः स्वशाखातोऽधिकाः कारावशाखायां समधिकाः सन्ति ॥

एतन्मइत्येतद्यजुर्वैश्वदेवम् विश्वे देवास्य देवतेत्यर्थः । तनोत्वरिष्टमित्यत्र यणा व्यूहेन चतुरश्रीत्यक्षरा प्रकृतिप्रकृतौ विनियोगः ॥

एषा तेऽनुष्टुवाग्नेयी । (१)

एषा तइत्येषा ऋगनुष्टुप्पुरस्काः । आग्नेयी अग्निरस्या देवतेत्यर्थः । समिद्भनुमन्त्रणे विनियोगः, अस्याश्चाष्टाक्षरास्चत्वारः पादाः सा द्वात्रिंशदक्षराऽनुष्टुबित्युच्यते । अत्र तु प्रथमः । पादसप्तकः । द्वितीये दृयकः, ततोऽष्टकः, ततः सप्तकइति । इयमानुष्टुप्पादानामनियताक्षरत्वात् ॥

अग्ने वाजजिदाग्नेयम् । (२)

अग्ने वाजजिदित्येतदाग्नेयम् । अग्निदेवतम् । एकाक्षराधिका ऋग्गायत्री वा सामबृहती वा एकोनविंशत्यक्षरत्वात् । अग्निसम्मार्जने विनियुक्तम् ॥

अग्नीषोमयोश्चत्वारि लिङ्गोक्तानि ।

अग्नीषोमयोरुज्जितिम् । अग्नीषोमो तमप । इन्द्राग्न्योरुज्जितिम् । इन्द्राग्नीतमपेत्येतानि चत्वारि यजूंषि लिङ्गोक्तानि । पूर्वयोर्द्वयोरग्नीषोमो देवता । उत्तरयोर्द्वयोरिन्द्राग्निदेवतेत्यर्थः । प्रथमस्य एकादेशव्यूहेन चतुर्विंशत्यक्षरत्वात् । आर्षी गायत्री द्वितीयस्यैकादशव्यूहेन द्वात्रिंशदक्षरत्वात्प्राजापत्या जगती । तृतीयस्य ऋगुष्णिक् । एकविंशत्यक्षरत्वात् । चतुर्थस्य त्रिंशदक्षरत्वादार्षी पंक्तिश्छन्दः प्रथमतृतीययोर्जुह्वाव्यूहने विनियोगः, द्वितीयचतुर्थयोरुपभृद्व्यूहने ॥

वसुभ्यस्त्वयाणाम् परिधयः ।

वसुभ्यस्त्वा, रुद्रेभ्य, आदित्येभ्यइत्येतेषाम् त्रयाणाम् परिधयो दे-

---

(१) एतस्याग्रे एतन्ते वैश्वदेवमिति व्युत्क्रमेण पाठो बोध्यः ॥

(२) एतस्याग्रे यत्सूत्रमवाप्तं तत्पूर्वमुक्तम् ॥

वताः अग्निष्टोमे विनियोगः ॥

सज्ञानाथाम् व्यन्तु प्रास्तरे ।

सज्ञानाथाम् व्यन्तु वयोनामित्येते हे यजुषी प्रास्तरे । प्रस्तरदेवते । प्रस्तरदाने प्रस्तराङ्गने च यथाक्रमं विनियुक्ते आद्यस्य व्यूहेन विंशत्यक्षरत्वात् प्राजापत्या बृहती सामपंक्तिर्वा । द्वितीयस्याष्टाक्षरत्वाच्चानुष्टुप् ।

मरुतां कपिर्बृहतीं प्रास्तरीं । (१)

मरुतां पृषतीरित्येतामृचम् कपिर्ऋषिरपश्यत् । कीदृशीं बृहतीं बृहतीछन्दस्काम् । पुनः कीदृशीं प्रास्तरीं प्रस्तरदेवताम् । नीचैर्हरणेऽस्या विनियोगः, इयमेकाधिकाक्षरार्षी बृहती । पादानामनियताक्षरत्वात् ।

चक्षुष्पाऽआग्नेयम् ।

अन्त्यः पादऽआग्नेयः (२)

अन्त्यश्चक्षुष्पादित्ययम् पादः,आग्नेयोऽग्निदेवतः आज्यालभने विनियुक्तः ।

यं परिधिं (३)देवलऽआग्नेयीं, त्रिष्टुभम् विराड्रूपां यजुरन्ताम् ।

य परिधिमित्येतामृचम्यजुरन्ताम् देवलऋषिरपश्यत्। आग्नेयीमग्निदेवताम् । विराड्रूपाम् । त्रिष्टुभम् । एकादशिनस्त्रयोऽष्टाक्षश्च विराड्रूपेति, विराड्रूपालक्षणम् । तेन यस्याएकादशाक्षरास्त्रयः

---

(२) बृहतीमित्यत्र बार्हतमिति कारावपाठः प्रास्तरीमित्रापि प्रास्तरामिति पाठश्च ॥

(२) इदं सूत्रशकलं कारावशाखीयसर्वानुक्रमे नास्ति ॥

(३) देवलमाग्नेयमित्येव तत्र पाठः । एतत्सूत्रीयैकादशाक्षराणि न सन्ति कारावशाखायामिति ॥

पादा एकोऽष्टाक्षरः सा विराड्रूपा । अत्र पादानाम् क्रमनियमो न । तेन प्रथमोऽष्टाक्षरः अन्यत्र यएकादशाक्षरः । चतुर्थश्च न, इत्यादौत्रिकाक्षराभावघटितेन पूरणम् । तथा च यजुरन्ताम् । यजुरन्ते यस्याः सा यजुरन्ता ताम् यजुःपर्यन्तायाएवैव देवताएषएव च ऋषिर्दृष्टेत्यर्थः । किं तद्यजुरित्यपेक्षायामाह ॥

अग्नेः प्रियम् (१) यजुः ।

अग्नेः प्रियम्पार्थापीतमित्येतद्यजुः । अष्टाक्षरत्वात् । प्राजापत्या गायत्री यजुरनुष्टुब्वा परिस्तरणप्रहरणे विनियोग उभयोः ॥

सर्वं०स्वभागाः (२) सोमसूक्ष्मो वैश्वदेवी त्रिष्टुप् यजुरन्ता ।

इत्यनेन यजुषोऽप्येष एव ऋषिर्देवता चेति गम्यते किं तद्यजुरित्याकांक्षायामाह ॥

स्वाहा वाड्यजुः ।

स्वाहा वाडित्यनेन यजुःप्रत्येतव्यम् देव्यनुष्टुप्यक्षरत्वात् । संस्रवे हौमेऽस्या यजुःसंहितायाम् विनियोगः ॥

घृताची स्रुचौ ।

घृताचीस्थइत्यस्य स्रुचौ देवता षोडशाक्षरा प्राजापत्यानुष्टुप् । सामानुष्टुब्वा । अन्तपदे ध्रुवनिधाने । पात्रीपदे स्रुवनिधाने विनियोगः ॥

यज्ञनमः शूर्पं (३)यवमान्ऋषिरुद्वालवान्धानान्वर्षी-

---

(१) प्रियं चेति कारावशास्त्रीयसर्वानुक्रमणाठः । यजुरिति पदमधिकमस्ति ॥

(२) सोमसुक्ष्म इति "ख., पुस्तकपाठः । सोमशूक्ष्म इति कारावपाठः ॥ वैश्वदेवामिति च, त्रिष्टुब् यजुरन्ता इति पदन्नास्ति ॥

(३) यवमान्ऋषिरिति कारावशास्त्रीयसर्वानुक्रमणाठः ॥

निति पञ्चार्षेयो यज्ञो देवता ।

यज्ञ नमस्य तदृत्येष मन्त्रः । पञ्चार्षेयः पञ्चार्षेयानि ऋषयो यस्यासौ पञ्चार्षेयः । के ते पञ्चऋषयइत्यतआह । भृगुः, यवमान् । ऋषिः । उद्दालवान् । धानान्तवोनित्येते । एतस्य मन्त्रस्य यज्ञो देवता वेद्यामालभ्ये विनियोगोऽस्य पञ्चविंशत्यक्षरत्वादेकाधिका आर्षी गायत्री ॥ सामजगती वा ॥

अग्नेदब्धायो गार्हपत्यः ।

अग्ने दब्धायोशीतमेत्यस्य गार्हपत्योग्निर्देवता । पञ्चचत्वारिंशदक्षरत्वादेकाधिका आर्षी त्रिष्टुप् । संस्रवहोमे विनियोगः ॥

अग्नये दक्षिणाग्निः ।

अग्नये संवेशपतयइत्यस्य दक्षिणाग्निर्देवता । आसुरीपङ्क्तिः याजुषी त्रिष्टुब्वा । एकादशाक्षरा दक्षिणाग्निहोमे विनियोगः ॥

सरस्वत्यै लिङ्गोक्तम् ।

सरस्वत्याइत्येतल्लिङ्गोक्तम् । लिङ्गेनैवोक्तदेवतमित्यर्थः । दक्षिणाग्निहोमे विनियुक्तः । छन्दःपूर्वसूचोक्तम् ॥

---

(१) उलूखल हविराज्यायतां ध्रौव्याज्यमिति कारावानां सर्वानुक्रमेऽधिकः पाठः ॥ उलूखले मुसले इति परमेष्ठी ऋषिर्निर्ऋतिर्देवता देवता त्रिष्टुपछन्दः प्रायश्चित्तहोमे विनियोगः । उलूखले मुसले यच्च शूर्पे आशिरश्चेष दृषदि यत्कपाले ॥१॥ उत्पूतो विपरूषः सज्जुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥ आज्यायतां ध्रुवा हावषा घृतेन यज्ञं यज्ञे प्रति देवयद्भ्यः ॥ सूर्याया ऊर्वोऽदित्या उपस्थ ऽऊरूधारा पृथिवी यज्ञेऽआस्मन् ॥ ३ ॥

वेदोऽसि वेदः । (१)

वेदोसि येनत्वमित्यस्य वेदो देवता । अक्षरद्वयस्थूपेन सप्तविंशत्यक्षरा कृतिः (२) वेदविमोके विनियोगः ॥

देवा मनसस्पतिर्वातदेवत्याम् विराजम् । (३)

देवा गातुविदइत्येतामृचम् वातदेवत्याम् विराट्छन्दस्कां मनसस्पतिऋषिरपश्यत् । द्वाभ्यामक्षराभ्यामूना विराडनुष्टुबियम् त्रिंशदक्षरा विराडिति श्रुतेः, ऋचां पङ्क्तिर्वा । पादानामक्षरनियमाभावात् । आर्षं नुष्टुब्वा । सा च द्वाभ्यामूनत्वाद्विराडुच्यते । (४)

(५) सम्बर्हिर्लिङ्गोक्ता त्रिष्टुब्विराड्रूपा ।

सम्बर्हिरित्येषा ऋक् लिङ्गोक्तदेवता दिध्म नमोऽस्या देवता । बर्हिर्देवता वेत्यर्थः, विराड्रूपात्रिष्टुप्छन्दोऽस्याः । त्रयः पादाएकादशाक्षराः : एकोऽष्टाक्षरइति । विराडरूपालक्षणम् । अत्र तृतीयो दशाक्षरः । तेनैकोना बर्हिर्होमेऽस्या विनियोगः ॥

कस्त्वा प्राजापत्यम् ।

कस्त्वा विमुञ्चतीत्येतत्प्रजापतिदेवतम् । एकोनत्रिंशदक्षरत्वादेकाक्षरोना ऋचां पङ्क्तिः प्रणीतानिनयनेस्य विनियोगः ।

---

(१) इदं सूत्रखण्डं कारावीयसर्वानुक्रमे नास्ति ॥

(२) वेदबन्धविमोके इति पद्धत्याः पाठः ॥

(३) देवा गातुविदो मनसस्पतिर्वातदेवत्या विराजमिति कारावशाखीयपाठः ॥

(४) अनयोर्मन्त्रयोः सम्मृज्यजुर्होमे विनियोगः । इतिपद्धत्या. पाठः ॥

(५) सम्बर्हिर्लिङ्गोक्तदेवत्यामिति तस्यैव पाठश्चेति ॥

रक्षसाठ० राक्षसम् । (१)

रक्षसां भागइत्येतद्राक्षसं रक्षोदेवतम् । अस्योच्चारणानन्तरमयां अग्नेः कार्यः । षडक्षरा देवीबृहती यजुर्गायत्री वा कवायमाने विनियोगोऽस्य ॥ ७ ॥

अथ याजमानम् ।

अथानन्तरम् याजमानमेतेदम् याजमानकर्म । तत्सम्बन्धीनि ऋषिदेवतच्छन्दांसि । वक्ष्यन्तइति शेषः । अत्र याजमानयज्ञेन तन्मन्त्रा लक्ष्यन्ते ।

संवर्चसा त्वाष्ट्री त्रिष्टुप् । (२)

संवर्चसेत्येषा त्वाष्ट्री । त्वष्टाग्निर्देवता । त्रिष्टुप्छन्दः अत्र चतुर्थे व्यूहः । पूर्णपात्रजलप्रतिग्रहणे विनियोगः ॥

दिवि विष्णुस्त्रीणि वैष्णवानि ।

दिवि विष्णुः । अन्तरिक्षं विष्णुः, पृथिव्यां, विष्णुरित्यादीनि त्रीणि वैष्णवानि विष्णुदेवतानि । प्रथमा ऋचा पङ्क्तिः । योऽस्मानिति । पूर्वरूपव्यूहेन त्रिंशदक्षरत्वात् द्वितीया व्यूहेन द्वात्रिंशदक्षरा आर्ष्यनुष्टुप्प्राजापत्या जगती वा तृतीया त्रिंशदक्षरा ऋचां पङ्क्तिरेव

---

(१) एतस्य सत्रस्यादौ "वेषोऽसि जुहोम्युपवेषः ॥ अस्य मन्त्रस्य परमेष्ठी ऋषिरुपवेषो देवता ब्राह्मी उष्णिक्छन्दः उपवेषकरणे विनियोगः ॥ वेषोऽस्युपवेषो द्विषतो मावा उपयंवडहि ॥ वेशा ॥ २ ॥ ऽअग्ने सुभग धारयेह ॥ १ ॥ ऋद्धाः कर्मण्या अनपायिनो यथासन् ॥ जुहोमि त्वा सुभगसौभगाय पुरुत्तम पुरुहूतध्रुवस्थन् ॥ २ ॥ इति कारावशाखिनां मन्त्रद्वयाधिकपाठः ॥

(२) यज्ञ शूर्पो यवमानित्याद पूर्वोक्तसूत्रभत्र पठितं पाठभेदेन मन्त्रोऽपि यज्ञ शूर्पत उपच ॥ शिवे मे सान्तिष्ठ स्वाहरिष्टे मे सान्तिष्ठस्व स्विष्टे मे सान्तिष्ठ स्व ॥१॥ इति ॥

विष्णुक्रमयो वैषाम् विनियोगः ॥

अस्मादृभागः । (१)

अस्मादन्नादित्यस्य भागो देवता व्यूहनाष्टाक्षरत्वात् । सानुषङ्गस्य ऋग्गायत्री सामबृहती छन्दो भागावेक्षणे विनियोगः ॥

अस्यै भूमिः ।

अस्यै प्रतिष्ठाया इत्यस्य भूमिर्देवता, व्यूहने विंशत्यक्षरत्वात् । सामपङ्क्तिः प्राजापत्या बृहती वा । भूम्यवेक्षणे विनियोगः ॥

अगन्म देवम् ।

अगन्म स्वरित्येतद्यजुर्देवो देवाग्नस्य देवता । देवी बृहती, चतुरक्षरत्वात् । प्राङ्नीक्षणे विनियोगः ॥

संज्योतिषाऽऽहवनीयः ।

सज्ज्योतिषेत्यस्याहवनीयो देवता । यजुर्गायत्री दैवी त्रिष्टुब्वा । षडक्षरत्वात् आहवनीयेक्षणे विनियोगः ॥

स्वयम्भू. सूर्यस्य (२) सौरे ।

स्वयम्भूरसि सूर्यस्यावृतमित्येते द्वे यजुषी सौरे सूर्यदेवते । यथाक्रमं सूर्यवेक्षणे प्रदक्षिणावर्त्तने वा विनियुक्ते., स्वयम्भूः एकोनविंशत्यक्षरत्वात् एकाधिका ऋग्गायत्री वा एकोना सामपङ्क्तिर्वा सूर्यस्येते नवाक्षरत्वाद्यजुर्बृहती आसुरी जगती वा ॥

अग्ने गृहपते गार्हपत्यः

अग्ने गृहपते सुगृहपतिरित्यस्य गार्हपत्यो देवता । चतुःपञ्चाक्षरा त्राह्मी बृहती गार्हपत्योपस्थाने विनियोगः ॥

---

(१) अस्मादन्नाद्वा ऽस्यै भूमिरग्न स्वर्देवर्ठ० इति कुत्रचिदधिकः पाठस्तत्र बोध्यः ॥

(२) द्वे इत्यधिक- पाठः ॥

सूर्यस्य सौरम् । (१)

सूर्यआतत्रित्येतत्सौरम् । छन्दः पूर्वोक्तम्, सूर्यदेवतम् । अङ्गविभावर्त्ते विनियुक्तम् ॥

अग्नयऽइदमाग्नेये ।

अग्ने व्रतपते व्रतमचारिषम् । इदमहमित्येते यजुषी । आग्नेये । अग्निदेवते व्रतविसर्गे विनियोगः, अग्ने विंशत्यक्षरा प्राजापत्या बृहती सामपङ्क्तिर्वा । इदमहमन्द्याक्षरा आसुरी त्रिष्टुप् यजुःपङ्क्तिर्वा । एतावत्पर्यन्ता दर्शपूर्णमासमन्त्राः ॥ अथ पिण्डपितृयज्ञमन्त्राणाम् साधारणमृषिमाह ॥ ८ ॥

पितृयज्ञः प्रजापतेरार्षम ।

अथ पितृयज्ञप्रकरणेन तन्मन्त्रा लक्ष्यन्ते । पितृयज्ञमन्त्राणाम् प्रजापतिर्ऋषिरित्यर्थः ॥

अग्नये सोमाय इदं देवे स्वधाकारश्रुतेः ।

---

(१) एतत्सूत्रस्थाने "उरु विष्णो वैष्णव्यनुष्टुप् ततोऽसीति यजुरन्तेदमग्ने पौष्णमग्न इदमाग्नेये,, अत्र मन्त्रपाठभेदेन "अग्ने गृहपते सुगृहपतिरहं त्वया गृहपत्या भूयासम् ॥ सुगृहपतिस्त्वमग्ने मया गृहपत्या भूयाः ॥ अस्थूरि नौ गार्हपत्यानि सन्तु शतꣳहिमाः ॥ शिग्मेन नस्तेजसा सꣳशशाधि सूर्यस्यावृतमन्वावर्ते ॥ स्वाहा विवर्जित उरु विष्णो इति पञ्चमाध्यायस्थाष्टत्रिंशब्राह्मणे पठितः । तदग्ने ततोऽसि तन्तुरस्यनुमातनुहि ॥ अस्मिन्यज्ञेसार्धं सꣳधुकृत्यायामाहमिन्द्रान्नाहमेल्लोके ॥ इदमग्ने कर्म्मेदं वाचेयमपुत्रोऽनृतन्तनोतु ॥ तदग्ने व्रतपतेऽइति मन्त्रो बोध्यः । उरुविष्ण इत्यस्य परमेष्ठीऋषिर्विष्णुर्देवता अनुष्टुप्छन्दः प्राग्गमने विनियोगः । ततोऽसीत्यस्य यज्ञो देवता त्रिष्टुप्छन्दः पुत्रनामग्रहणे विनि० ॥ अग्नेव्रत० अग्निर्दे० प्राजापत्या बृहतीछन्दो व्रतविसर्गे वि० ॥ इदमह परमे० अग्निर्दे० यजुः पंक्तिश्छन्दो व्रतविसर्गे वि० ॥ इति दर्शपूर्णमासमन्त्राः समाप्ताः ॥ २ । तदग्ने पितृयज्ञमन्त्राणां कृष्यादिकमुच्यते ॥

अग्नये कव्यवाहनाय, सोमाय पितृमते द्वे यजुषी दैवे । दैवदेवत्ये । कस्मात् स्वाहाकारयुते: । अनयोर्यजुषोरन्ते स्वाहाकारश्रवणात् । स्वाहाकारश्च देवे एव हवि: प्रदानार्थत्वात्, वषट्कारेण वा स्वाहाकारेण वा देवेभ्योऽन्नं प्रहीयते युते:„ । चतुर्होमे अनयोर्विनियोग: । अग्नये । एकादशाक्षरत्वात् । यजुस्त्रिष्टुप्आसुरीपङ्क्तिर्वा, सोमाय नवाक्षरा यजुर्हृती आसुरी जगती वा ।

अपहताऽआसुरम् ।

अपहताइत्येतदासुरम् असुरदैवतम् । उक्तेऽग्नौ विनियुक्तम् । आसुरत्वादस्योच्चारणानन्तरमपां स्पर्श: कार्य:, चतुर्दशाक्षरा सामीषणक् आसुर्युष्णिग्वा ॥

ये रूपाणि कव्यवाहनोऽग्निस्त्रिष्टुप् ।

ये रूपाणीत्यस्या ऋच: कव्यवाहनोऽग्निर्देवता त्रिष्टुप्छन्द: अत्र चतुर्थस्य व्यूहेन पूरणम्, प्रथमो दशाक्षरएव । तेनैकोना प्रजापतिऋषि: उल्मुकनिधाने विनियोग: ॥

अवामीमदन्त पितरे ।

अत्र पितर:, अमीमदन्त, पितरइत्येते द्वे यजुषी पित्र्ये । अनयो: पितरो देवताइत्यर्थ: । द्वयोरप्यष्टाक्षरत्वात्सामह्रस्वो ह्रस्वान्यश्चो वा ऋचे विनियोग: । अनयोश्चारणानन्तरमपां स्पर्श:कार्य: ।

नमो व: षट्लिङ्गोक्तानि ।

नमो व: पितरइत्यादीनि यजूंषि लिङ्गोक्तानि एषाम् स्वगतलिङ्गेनैव देवतोक्ता: । तत्र परे पित्र्ये इति । परयो: पित्र्यत्वस्य पृथगुक्तत्वादिमानि पित्र्याणि न भवन्तीति प्रतीयते, न रक्षसोघजीवधाधोरमन्युदेवतानीत्यर्थ: । अद्यानाम् पञ्चानाम् नवाक्षराणां यजुर्हृती आसुरी जगती वा । षष्ठस्य एवम् विंशत्यक्षरा ऋगु-

[illegible] । परे पित्र्ये । एतद्वः पितर, एतद्, इत्येते द्वे हे यजुषी पितृदेवत्ये गायत्राः षोडशाक्षरा प्राजापत्यानुष्टुप् । एतद्वःअष्टाक्षरा यजुरनुष्टुप् । प्रजापतिर्गायत्री वा अग्ने सूर्योमन्ने च क्रमेण विनियुक्ते ॥ (१)

आधत्त पितरो गायत्री ।

आधत्त पितरस्तीयमृक् पित्र्या पितृदेवत्या गायत्रीछन्दस्का । अत्र तृतीयस्य व्यूहेन पूरणम् । पुत्रकामायाः पत्न्या अध्वर्युणा प्राशनेऽस्या विनियोगः ॥

ऊर्ज्जापो विराट् ।

ऊर्ज्जं वहन्तीरितीयमृक् आपी अद्भैवत्या अप्या आपी देवता विराट्छन्दः । दशकास्त्रयी विराडिति विराडनुष्टुभा । द्वितीयो नवकैकेन न्यूना । इति पित्र्यमन्त्राणामृष्यादिकमुक्तम् । (२) अथाग्न्याधेयमन्त्राणाम् साधारणऋषिमाह ॥ ६ ॥

आग्न्याधेयम् प्रजापतेरार्षम् ।

अथाग्न्याधेयग्रहणेन तन्मन्त्रा लक्ष्यन्ते । आग्न्याधेयमन्त्राणाम् सर्वेषाम् सामान्येन प्रजापतिऋषिरित्यर्थः अत्र तु ऋषिविशेषोऽभिधीयते तत्रोभावपि ऋषी भवतः अत्रैव विकल्पेनैतानृषीनाह ॥

देवानामग्नेर्गन्धर्वाणाम् वा ।

देवानामग्नेर्गन्धर्वाणाम् वा । आग्न्याधेयमार्षमित्यनुवर्तते आग्न्याधेयमन्त्राणाम् देवा ऋषयः अग्निर्वा ऋषिः । गन्धर्वा वा ऋषयः

(१) कव्यवाहनोऽनुष्टुप् तत्रैवमेव पाठः ॥ एतद्वः परे पित्र्ये, एतत्सूत्रस्थाग्ने "उदायुषामृतदेवत्यम्,, ॥

(२) कृष्णोऽसि नराग्ने याज्ञिकस्य देवसवितर्मेकादशाग्नाधिभ्यो षडग्ने दक्षाय्योऽष्टौ सेध्यवर्चसा दक्षाग्नये कव्यवाहनाहनाय सप्त हिताय सप्तधाहितत्यनुवाकसूत्रकारावशाखीयानाम्बोध्यम् ॥

प्रजापतिर्वा पूर्वसूक्तोक्तदृष्टि सर्वमन्त्रेषु चत्वारो विनियोगाः ॥

समिधाग्नेयऋचस्रो गायत्र्यः ।

समिधाग्निं सुसमिद्धाय । तन्त्वा । उपत्वाग्ने दिवेदिवे ऋचः आग्नेय्यो अग्निदेवताः । गायत्रीछन्दस्काः ।

समिधा विरूपाङ्गिरसः ।

समिधाग्निमित्यस्या अङ्गिरसः पुत्रो विरूपस्तत्प्रकृषिः समिदाधाने विनियोगः ॥

सुसमिद्धाय वसुश्रुतः ।

सुसमिद्धाय शोचिषेत्यस्य वसुश्रुतऋषिः । अध्वर्योर्जपे विनियोगः ॥

तन्त्वा भरद्वाजः ।

तन्त्वा समिद्भिरित्यस्या भरद्वाजऋषिः समिदाधाने विनियोगः अत्र तृतीये व्यूहः । उपत्वेत्यस्य पूर्वोक्तोऽएवऋषयः ॥

भूर्भुवः स्वस्तिस्रो महाव्याहृतयोऽग्निवायुसूर्या देवत्याः क्रमेण ।

भूरित्यस्याग्निर्देवता । भुवरित्यस्या वायुः स्वरित्यस्याः सूर्यइति । भूरिति देवी गायत्री आसां तिसृणामप्यग्निस्थापने विनियोगः ॥

द्यौरिव यजमानाग्नीलिङ्गोक्तदेवता

द्यौरिव भूम्नेतीयं यजमानस्याग्नीलिङ्गोक्तदेवता । पृथिवी अस्या देवतेति यावत् । व्यूहेन षट्त्रिंशदक्षरा षट्पदजगती वाक्षी गायत्री वा पार्थी त्रिष्टुप् वा यजमानकर्तृके अपे विनियोगः ॥

आयङ्गौः सार्परराज्ञस्तृचो गायत्रोऽग्निः परावररूपेश्व देवता ।

आयङ्गौः, अन्तश्चरति, चिठे-यदासित्यवम् छन्दः सार्परराज्ञः सर्पीणाम् राज्ञः कद्रूः पृश्निर्वाभिमाजिनीति तस्या अयं सार्परराज्ञः सार्परात्री: यच्चक्षुषा दृष्टौ इत्यर्थः। गायत्रीछन्दः षरूपेषावरूपेण च स्तूयमानोग्निरत्र छन्दश्च देवता। आयं गौरित्यनेनादित्यरूपेणाग्निः स्तूयते। अन्तश्चरतीत्यनेन वायुरूपेण। आदित्यः परः। दिवि वा एष श्रितो दिवि प्रतिष्ठितः। "दिवो ह्यसौ प्रतिष्ठितो ज्योतिषामादित्यइति श्रुतेः"। अवरो वायुः अन्तरिक्षं यस्तिर्यग्वायुः पवतइति अर्वाचीनं च"तद्दिवो वायुं दधाति। अन्तरिक्षस्य ह्यपाम् एष ज्योतिषान्वायुरित्यादिश्रुतेः"। आयङ्गौरित्यस्यास्तृतीयः समाचरणेनैकोना अन्तरित्यत्र तृतीयस्य व्यूहेन पूरणम्। प्रथमद्वितीयपादसम्यो व्यूहेन छन्दः पूरणम् पादत्रयीयाम्नु पस्थाने विनियोगः। इत्यन्वाधेयमन्त्राः॥ अथाग्निहोत्राधानम् साधारणमभिधाय ॥१०॥

अग्निहोत्रम् प्रजापतेरार्षम् ॥

अथाग्निहोत्रपदेन तन्मन्त्रा लक्ष्यन्ते। अग्निहोत्रमन्त्राणाम् यच्च ऋषित्वं शेषेऽभिधीयते तच्चोभावृषी भवतः प्रजापतिर्ऋषिः सर्वेषाम् ॥

अग्निर्ज्योतिः सप्त लिङ्गोक्तदेवता गायत्र्यः। (१)

---

(१) अग्निर्ज्योतिर्य त्वा सामिदाग्नि ज्योतिर्लिङ्गोक्त देवतर्ङ० सूर्यो ज्योतिर्य त्वा सूर्यो ज्योतिर्द्वेसमित्सौरे सर्जूर्देवेन हे आग्नेयसौरे इह पुष्टि लिङ्गोक्तदेवतमग्नयेऽन्नादाय दक्षिणाग्निमनमित्रमाग्नेयमिन्द्रः पश्चादैन्द्री बृहतां सामिदसि लिङ्गोक्ताम् इत्यधिकः पाठः कारणशाखायाम् ॥ इह पुष्टमित्यस्य प्रजापतिर्ऋषिरग्निगृहपतिः रयिमान्पुष्टिर्मौश्च देवता पङ्क्तिछन्दो गार्हपत्ये पूर्वाहुतिहोमे विनियोगः। इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजाठ० रमयतु प्रजापतिः॥ अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा॥ अग्नयेऽन्नादायान्नपतये स्वाहा। अनमित्रम्मे अधरादगन्मित्रमुदकृषि ॥ इन्द्रोनमित्रम्पश्चान्मेऽनमित्रं पुरस्कृषि ॥ इन्द्रः पश्चादिन्द्रः पुरस्ता-

अग्निर्ज्योतिः । सूर्यो ज्योतिः । अग्निर्वर्चः । सूर्यो वर्चः । ज्योतिः सूर्यः । सजूर्देवेन । द्वितीया सजूर्देवेन एता सप्तऋचः त्रिष्टुब्देवता यथा लिङ्गमग्निसूर्यदेवता इत्यर्थः । आसां सप्तानाम् गायत्री-छन्दः । अत्रैव विशेषमाह ॥

आद्याः पञ्चैकपदा ।

अग्निर्ज्योतिरित्यारभ्य ज्योति.सूर्यइत्येतत्पर्यन्ताः पञ्चएकपदा गायत्र्यः,"अष्टाक्षरा गायत्रीति श्रुतेः„ । प्रजापत्या गायत्र्य एताः प्राजापत्याष्टाक्षरित्युक्तेः स्वाहाकारस्तु पृथगयजुः । षष्ठीसप्तम्यौ त्रिपदे-गा च्यौ त्रिपदा वै गायत्री चतुर्विंशत्यक्षरा वै गायत्री इत्यपि श्रवणात् । तत्र द्वितीयपादस्य व्यूहेन पूरकम् प्रथमायाम् । तृतीयपादस्तु-भयोः सप्तकस्तेनैकोने ॥

अग्निर्वर्चो ह्ये तच्चापश्यत् ।

अग्निर्वर्चः सूर्यो वर्चइति ह्ये एकपदे तच्चासञ्जऋषिरपश्यत् । दृष्टवान् । "तदुहैतदेवाऋषये ब्रह्मवर्चसकामाय तच्चाय वाचाग्नि-र्वर्चइत्यादिश्रुतेः ।

पराञ् जीवलश्चैलकिः ।

परामिति पूर्वोक्ताभ्यां परा ज्योति. सूर्य इत्येताम् चैलकस्य पुत्रो जीवलऋषिरपश्यत् । "तदुहो वा च जीवलश्चैलकिरिति प्रक्रत्या

दिन्द्रो अस्मान् ॥ ऽआनिषात्विषतः । इन्द्रे जिजीवसतो मानिमाति विषे विनित्य-स्यताम् ॥ अग्नयेइत्यस्य प्रजापति ऋ० अग्निरन्नादोऽन्नपतिर्देवता सामगायत्री छन्दो दग्निगाग्नौ पूर्वाहुतिहोमे विनियोगः । समिदसि इत्यस्य प्रजा० अग्निर्दे० दैवी बृहतीछन्दः समिद्धामे विनियोगः । समिदसि समिद्धोमे अग्ने दीदिहि ॥ समे-द्धाते अग्ने दीद्यासम् ॥ समिदसीत्यस्य प्रजा०ऋ०आसुरी जगती वा समिद्धोमे वि-नियोग । समग्नस्य सामगायत्रीत्रिष्टुप विदयुदसि प्रजा०ऋ०आपोदे०ऋक्पांक्तश्छन्दः आचमने विनियोगः ॥ इति पद्धत्या. पाठो बोध्य. ॥

ऽथ प्रातर्ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहेति श्रुतेः„॥ अथ यजमानाग्न्युपस्थानकर्तृकं हृदयग्न्युपस्थानमाह ॥ ११॥

यजमानाग्न्युपस्थानम् हृदयम् ।

अत्र यजमानाग्न्युपस्थानशब्देन तन्मन्त्रा लक्ष्यन्ते । सायमग्निहोत्रे यजमानस्याग्न्योर्गार्हपत्याहवनीययोर्हृदयोपस्थाने उच्यतइति शेषः ॥

देवानामार्षम् ।

तच्च हृदयग्न्युपस्थानम् । देवानामार्षम् । हृदयोपस्थानमन्त्राणाम् देवा ऋषयइत्यर्थः ॥

उपप्रयन्तोऽध्वरमित्यनुवाकस्याद्ये ऽर्हआग्नेय्यौ गायत्र्यौ ।

उपप्रयन्तोऽध्वरमित्यस्मिन्नुवाके आद्ये द्वे ऋचौ, उपप्रयन्तोऽध्वरम् । अग्निमूर्धा दिवइत्येते गायत्र्यौ गायत्रीछन्दस्के । इयोरपि द्वितीयपादयोर्व्यूहेन पूरणम्, अनयोरेव ऋषिविशेषमाह ।

उपत्वा गोतमो राहूगणः ।

उपेत्वयम् शब्दोऽस्ति अस्यामित्युपत्वती । उपप्रयन्त इत्येषाम् । तस्या राहूगणस्य पुत्रो गोतमसञ्ज्ञकऋषिः ॥

मूर्धन्वत्या विरूपः ।

मूर्धशब्दोऽस्त्यस्यामिति मूर्धन्वती । अग्निर्मूर्धेति इयमृक् । तस्या विरूपऋषिः आहवनीयोपस्थाने उभयोर्विनियोगः ॥

उभा वां भारद्वाजऐन्द्राग्नीत्रिष्टुभम् ।

उभावामिन्द्राग्नीइत्येताम् इन्द्राग्नीदेवताकाम् त्रिष्टुप्छन्दस्काम् भरद्वाजऋषिरपश्यत् । अत्र प्रथमतृतीयौ दशाक्षरौ तेन दृब्यूना ॥

अयन्ते देवत्थवा देववातश्च भारतावाग्नेयीमनुष्टु-

भम् ।

अयम् ते योनिरितीमामृचम् अग्निदेवत्याम् । अनुष्टुप्छन्दस्काम् भारतो भरतस्य पुत्रो । देवश्रवा देववातश्चेतौ द्वौ ऋषी द्रष्टारौ अपश्यताम् । पादसन्धौ व्यूहेन छन्दःपूरणीयम् ॥

अयमिह वामदेवो जगतीम् ॥

अयमिह प्रथमदिति इमामृचम् जगतीछन्दस्काम् वामदेव ऋषिरपश्यत् । आग्नेयीमित्यनुवर्तते तेनास्या अग्निर्देवता: षष्ठ्या द्वादशाक्षरायत्वारः पादाः साऽष्टाचत्वारिंशदक्षरा जगत्युच्यते । "अष्टाचत्वारिंशदक्षरा जगतीति श्रुतेः", अत्र तु आद्यो द्वादशकः । द्वितीयो व्यूहेनैकादशकः । तृतीयो द्वादशकः एकोना ॥

अस्य प्रक्लाम्यत्सारो गव्यां (१) वाऽऽग्नेयीं वा पयो देवत्याम् वा गायत्रीम् ।

अस्य प्रक्लामनुद्युतमित्येतामृचम् गव्याम् वाग्नेयीं वा पयोदेवत्याम् वा गायत्रीछन्दस्काम् वत्सारऋषिरपश्यत् । अस्या गौर्देवता । अग्निर्वा पयोवेति पयो देवा विकल्पाः ॥

तनूपाऽआग्नेयानि ।

तनूपाऽअग्नेऽसीत्यादीनि चत्वारि यजूंषि आग्नेयानि अग्निदेवत्यानि, तनूपा, वर्चोदा, इति द्वे एकादशाक्षरे यजुस्त्रिष्टुभौ । असुराङ्गो वा । आयुर्दाऽइति दशाक्षरा यजुःपङ्क्तिरासुरी विष्टुब्ग्रा । अग्ने यन्मे तन्वयोदशाक्षरा आसुर्यनुष्टुप् ॥

द्रुन्वानाऽआग्नेयी महापङ्क्तिस्त्वयवसानाः ॥ (२)

---

(१) वत्सार इति, आवत्सार इति "गध,, योः पुस्तकयोः पाठ इति, वत्सार इति काण्वशाखीयपाठश्च बोध्यः ॥

(२) तत्र महापङ्क्तिरस्तीति बोध्यः ॥

इत्यामाख्या शतमिथयक् आग्नेयी अग्निदेवत्या महापङ्क्तिश्छन्दस्या ग्रावस्तामा विरामोऽवसानम्। ग्रावस्तामानि विराऽख्यामानि यजुंषि सा ग्रावस्तामा नाम तस्या अष्टाक्षरा चतुष्पादा सा महापङ्क्तिः षडष्टका वा महापङ्क्तिरित्युक्तत्वात् अथ षट्सप्ताक्षरस्ते नेकोना ॥ १२ ॥

चित्रावसो रात्रिदेवत्यमृषयोऽपश्यत्।

चित्रावसो स्वस्तीत्येतद्रात्रिदेवत्यम् यजुर्ऋषयोऽपश्यत्। "एतेन ह स्म वा ऋषयो रात्री स्वस्ति पारठं० समयुनत" इति श्रुतेः। (१) द्वादशाक्षरा यजुर्जगती सामगायत्री वा आसुरी हृहती वा प्राजापत्योऽग्न्या। उषप्रयन्तदुत्वत आरभ्य चित्रावसो स्वस्तित इत्यन्तस्य मन्त्रस्याहवनीयोपस्थाने विनियोगः ॥

सन्त्वमाग्नेयम् ॥

सन्त्वमग्न इत्येतद्यजुरग्निदेवतम्। अष्टाचत्वारिंशदक्षरा आर्षी जगती वाक्षी अनुष्टुब्वा आहवनीयस्याग्रे उपविश्य जपे विनियुक्तम् ॥

अन्वस्य रेवतीः सठं०हितेति चोणि गय्यानि।

तयाधाम् गोदेवतेत्यर्थः। अन्वस्य एकाधिका वाक्षी गायत्री सप्तविंशदक्षरत्वात्। रेवतीः अष्टाविंशत्यक्षरा प्राजापत्या त्रिष्टुप्त्रार्षी उष्णिग्वा। सठं०हितासि व्यूहेनाष्टाविंशाक्षरा ऋग्गायत्री सामहृहती वा। अग्नाय्याम् अति गमने विनियोगः। संहितेत्यस्य गोरभिर्दर्शने ॥

उपत्वाग्नेयन् त्र्यृचम् गायत्रम् मधुच्छन्दा वैश्वामित्रः।

---

(१) इयं श्रुतिः शतपथब्राह्मणस्य एकपादीनामककाण्डस्येति ॥

(२) रेवती रस्मिन्मन्त्रे यो नाऽस्मिन्, अस्मिँल्लोके इति कारावपाठः ॥ इहैवस्तेतो मुपागातेति च पाठो ज्ञेयः ॥

उपत्वा ने दिवे । राजन्तम् । स न: पितेवेत्येतत्पृचम् ऋषिः । अग्निः आग्नेयमग्निदेवतम् त्रिष्टुभमित्यनुष्टुभो अनुष्टुब्धा वसिष्ठं मन्त्रं ऋषिरपश्यत् दृष्टवान् । राजन्तमित्यस्याः प्रथमकृतीवौ समाचरौ । तेन द्यूना, स महद्भ्यस्त्वा इतीयस्य द्यूनेन पूरणम् । अस्य मन्त्रस्य गार्हपत्योपस्थाने विनियोगः ॥

अग्ने त्वञ् चतस्रो द्विपदस्त्वाग्नेयीर्बध्नः सुबन्धुःश्रुतबन्धुर्विप्रबन्धुरेकैकशः ।

अग्ने त्वन्नोऽअन्तमः ॥ वसुरग्निः । तत्त्वा शोचिष्ट । स नो बोधि एतावतस्त्वो द्विपदाः आग्नेयीरग्निदेवत्याः बन्ध्वादिसञ्ज्ञास्त्वा-रक्षणाय इत्यर्थः । द्वौ द्वौ पादौ यस्याः सा द्विपदा । आसाम् गार्हपत्योपस्थाने एव विनियोगः ॥ द्विपदासु विशेषऋग्वेदानुक्रमणीस्थाम्, "द्विद्विपदाऋचः समामनन्ति,, । ऋचोऽध्ययने त्वधीतारो द्वे द्विपदे सयोज्य एकैकामृचम् कृत्वा समाप्नोति । "अयुजोऽन्त्या द्विपदैवेति" ॥

इडे काम्या गव्ये ।

इडेऽएहि । काम्याएत इतीमे यजुषी गव्ये । अनयोर्गौदेवतेत्यर्थः । इडे अष्टाक्षरा प्राजापत्या गायत्री यजुरनुष्टुब्वा, काम्या एत । चतुर्दशाक्षरा आसुर्युष्णिग्यजुराक्रमम् मां प्रतिगमने गोरालम्भे च विनियोगः ॥ (१)

सोमानम् ब्राह्मणस्त्यम् ऋचम् गायत्रम् ब्रह्मणस्तिर्मेधातिथिर्वा ।

सोमानम्, स्वरणम्, योनेवान्, मा नः शंसइत्येतत्पृचम् ब्राह्मणस्पतिदेवतम् गायत्रीछन्दस्कम् ब्रह्मणस्तिऋषिर्मेधातिथिर्वा अपश्यत्

(१) काम्यऽएहि, इति कारवपाठः ॥

[illegible] जपे विनियोगः । नक्तंसोमा नविलक्षणा: प्रथमो व्यूहेऽतोऽपि समाचरः । तैवेकोना मा नदृत्यक्षरा द्वितीयः समाचरस्तस्य व्यूहेन पूरणम् ॥

महि वीणार्ष० सत्यधृतिर्वारुणीरादित्यदेवतम् दृक्-चङ्गायत्रम् पथि स्वस्त्ययनम् ।

महि वीणामवोऽस्तु । नहि तेषाम् । तं हि पुत्रासइत्येतच्यृचम् आदित्यदेवतम् गायत्रीछन्दस्कम् वरुणस्यापत्यम् सत्यधृतरपश्यत् जपे विनियोगोऽस्य । महि वीणामित्यस्याः प्रथमस्तृतीयश्चार्धो व्यूहेन पूरणम् न हि तेषामित्यस्य द्वितीयस्य व्यूहेन पूरणम् । तं हीत्यस्या द्वितीयस्य तृतीयस्य च व्यूहेन पूरणम्, किं च इदम् दृचम् पथि मार्गे स्वस्त्ययनम् तस्कराद्युपद्रवभयनाशकरम् । मार्गे गच्छतामेतत्यृचजपेन कुशलेन वाञ्छितस्थानप्राप्तिर्भवतीत्यर्थः । स्वस्तीत्यविनाशि नाम । अविनाशप्रापकम् ।

कदा चनेन्द्रो पथ्याबृहतीम् मधुच्छन्दाः ।

कदा चन स्तरीरसीत्येतामृचमैन्द्रो इन्द्रदेवत्या पथ्याबृहतीछन्दस्काम् मधुच्छन्दा ऋषिरपश्यत् जपेऽस्याश्चापि विनियोगः । यस्यास्तृतीयः पादो द्वादशाक्षरः अन्ये त्रयः त्रयः पादा अष्टाक्षराः सा पथ्याबृहती पथ्यापूर्वयेति तृतीयो द्वादशकइत्येतदृग्व्यतिरिक्तम् पथ्याबृहतीलक्षणम् पृथङ्नास्ति तेन बृहत्येव पथ्या बृहतीत्युच्यते ॥

तत्सवितुर्विश्वामित्रः सावित्रीं गायत्रीम् ।

तत्सवितुर्वरेण्यमित्येतामृचम् सावित्रम् सवितृदेवत्याम् गायत्रीं नैकोना । व्यूहेन पूर्यतइति केचित् । अस्यापि जपे विनियोगः ॥

परि ते वामदेव (१) आग्नेयीमनिरुक्ताम् गायत्रीम् ॥

(१) वामदेवामत इत्यादिवङ्गाक्षरीयस्य पाठो बोध्यः ॥

(१)परि ते दूडभादित्येतानुचम् अग्निदेवत्याम् अनिरुक्ताम् मध्येऽग्निपदप्रयोगरहितां गायत्रीछन्दस्काम् वामदेवऋषिरपश्यत् विश्वामित्रऋषिरपश्यत् । अथापि प्रथमं सप्ताचरास्तेषादश्यौ भूयिष्ठेन छन्दः पूर्तिः । अस्या अपि जपएव विनियोगः ॥ १३ ॥

यजमानागन्त्युपस्थानमन्त्राः समाप्ताः । अथ चुल्लकोपस्थानमन्त्रस्य ऋषिमाह ॥

चुल्लकोपस्थानमासुरेरार्षम् भूर्भुवः स्वः ।

भूर्भुवः स्वरित्येतत्चुल्लकोपस्थानम् पूर्वोक्तदीर्घवात्सप्रोपस्थानापेक्षया लघूपस्थानम् ॥

आसुरेरार्षम् ॥ आसुरेमन्त्रकोपस्थानस्य सर्वमन्त्राणाम् साधारणऋषिरित्यर्थः । पूर्वोक्तदीर्घोपस्थानापेक्षयाऽस्य चुल्लकत्वम् । तस्यैव स्थाने विकल्पेनाहवनीयगार्हपत्ययोरुपस्थाने विनियुक्तम् । तावेवास्य देवता एकविंशत्यक्षरा कृतुष्णिक्छन्दः ॥

प्रवत्स्यदुपस्थानम् (२) तदुभयमादित्यस्यार्षम् ।

तन्मन्त्राणाम् सर्वेषामेकमादित्यऋषिरित्यर्थः ॥

नर्य्ये(३) गार्हपत्यः ।

नर्ये प्रजाम् मदित्यस्य गार्हपत्यो देवता सप्ताचरा दैवी जगती यजुरुक्त्वा गार्हपत्यस्योपस्थाने विनियोगः ॥

अठसा (४) दक्षिणाग्नेयः ।

---

(१) एतन्मन्त्रान्ते "समिद्वोमासमद्भ्य प्रजया च धनेन च,, इति मन्त्रार्धः कारावशाखायामधिकः पाठतः ॥

(२) मागतोपस्थाने चादित्यस्येति कारावशाखीयस्य च पाठः ॥

(३) प्रजामित्यधिकः कारावशाखीयस्य पाठः ॥

(४) अठस्य पशूनाहवनीय इति काण्वावपाठः ॥

अष्ठं च पशुमेदस्याहवनीयोपस्थाने विनियोगः ॥

अयर्ष्यं दक्षिणाग्निः । (१)

अयर्ष पितुमित्यस्य दक्षिणाग्निर्देवता भुरिगष्टिश्छन्दो मध्यमः स्वरः । दक्षिणाग्न्युपस्थाने विनियोगः ॥

आगन्माहवनीयोऽनुष्टुप् ।

आगन्म विश्ववेदसमित्यस्य आहवनीयो देवता अनुष्टुप्छन्दः । आहवनीयोपस्थाने विनियोगः ॥

अयमग्निर्न्यङ्ङसारिणी (२) गार्हपत्यः ।

अयमग्निर्गृहपतिरित्यस्याऋचो न्यङ्ङसारिणी बृहतीछन्दः । गार्हपत्योपस्थाने विनियोगः, यस्याऋचो द्वितीयः पादो द्वादशाक्षरः अन्ये त्रयोऽष्टाक्षरा सा न्यङ्ङसारिणी । द्वितीयस्थेन्यङ्ङसारिणीत्युक्तत्वात् । अत्र तृतीयो नवाक्षरस्तेनैकाधिका ॥

अयमग्निरन्वाहार्यपचनोऽनुष्टुप् । (३)

अयमग्निः पुरीष्यइत्यस्याः अन्वाहार्यम् पचनोदेवता अनुष्टुप्छन्दः । अत्र प्रथमः सप्ताक्षरस्तेनैकोना दक्षिणाग्न्युपस्थाने विनियोगः ॥

गृहा मा बिभृतेष्टुब्विराड्रूपा ।

गृहा मा बिभीतेत्यस्या विराड्रूपा त्रिष्टुप्छन्द एकादशिनः त्रयोदशिनः त्रयोऽष्टकृत्वो विराड्रूपेत्युक्तत्वात् । यस्या एकादशाक्षराः त्रयः पादाएकोऽष्टाक्षरः सा विराड्रूपेत्युच्यते । अत्र प्रथमो दशाक्षरः तेनैकोना ॥

---

(१) इदं सूक्तखण्डं अयर्ष पितु म्मे पाहि" मन्त्रखण्डं च कारावश्शाखीयसर्वानुक्रमण्यां नास्तीति ॥

(२) बृहतीत्यधिकं कारावानां पाठः ॥

(३) इदं सूक्तखण्डं कारावानां नास्तीति ॥

येषामनुष्टुप् ।

येषामभ्येतोत्ये तस्या अनुष्टुप् छन्दः ॥

उपहूता महापङ्क्ति (१) रव्यवसाना ।

उपहूता इह गावइत्येषा महापङ्क्तिछन्दस्का अव्यवसाना नीव्यवसानानि यस्याम् सा अव्यवसाना । यस्या अष्टाक्षराः षड्वा सामपङ्क्तिः षडष्टका वा महापङ्क्तिरित्युक्तेः, अत्र पञ्चमो नवाक्षरस्तैनैकाधिका ॥

तिस्रोऽपि वास्तवीः शंयुर्बार्हस्पत्यः ।

गृहा मेत्याद्यास्तिस्रोऽपि वास्तवीः वास्तुदेवताः बृहस्पतेरपत्यं शंयुर्नामकऋषिरपश्यत् गृहोपगमने तिसृष्वपि विनियोगः । क्षेमाय वइत्यस्य गृहप्रवेशे ॥ १५ ॥

इत्युपस्थानमन्त्राः ॥ अथ चातुर्मास्यमन्त्रान्नाम साधारणमृषिमाह ॥

(२)चातुर्मास्यानि प्रजापतेरार्षम् ।

अथ चातुर्मास्यशब्देन तन्मन्त्रा लक्ष्यन्ते । तेन चातुर्मास्यसम्बन्धिमन्त्राणाम सर्वेषाम् एकः प्रजापतिर्ऋषिरित्यर्थः । अत्र तु ऋषिविशेषोऽभिधीयते तत्रोभावपि ऋषी ज्ञेयौ ॥

प्रवासिनो मारुती गायत्री ॥

प्रवासिनो दमामहइत्येषा मारुती । मरुतोऽस्या देवता गायत्री छन्दः पत्न्या वाचने विनियोगः ॥

यद्ग्रामे मारुत्यनुष्टुबनिरुक्ता ।

यद्ग्रामइतीयमृक् मारुती मरुद्देवत्या । अनिरुक्ता । मध्ये मरुत्पदप्रयोगस्यात्या । अनुष्टुप् छन्दस्का । करंभपात्रहोमे विनियुक्ता ।

---

(१) ऋतुरवसाना इति कारावस्य पाठः ॥

(२) अथेत्यधिकं कारावस्य च पाठः ॥

अथ प्रथमः समाचरः चतुर्थी नवाचरः द्वावष्टाचरौ । तेन पूर्वच्छन्दः ॥

मो षूणोऽगस्त्य (१) ऐन्द्रामारुतीम् विराजम् ।

मो षूणोऽगस्त्यमित्यृचम् इन्द्रमरुद्देवत्याम् विराजम् विराट्छन्दस्काम् अगस्त्यऋषिरपश्यत् यजमानस्य जपे विनियोगोऽस्याः, यच्चादशाक्षरास्त्वारः पादाः सा विराट्। पञ्चमं पङ्क्तिः पञ्चपदा चतुष्पदा विराट्दशका इत्युक्तेः । अथैन्द्रीं मरुत्वतीं जपतीति श्रुतेरैन्द्रा मारुतीमित्युक्तं । इन्द्रामरुतश्चास्या देवताइत्यर्थः ।

अक्तून्कर्म्मेत्येषा अनिरुक्ताग्नेय्यनुष्टुप् । (२)

अक्तून नेरुक्ताग्नेय्यनुष्टुप् ॥ मध्येनिपदप्रयोगरहिता अस्या अनुष्टुप्छन्दः । अत्र तृतीयः समाक्षरस्तेनैकोना पत्नीयाचने विनियोगः ॥

अवभृथ यज्ञदैवतम् । (३)

अवभृथ निचुंपुणेत्येतद्यजुर्यज्ञदैवतम् । नपुंसकनिर्देशादस्य यजुष्त्वम् । अष्टाचत्वारिंशदक्षरत्वात् बार्हतीअनुष्टुप् ॥

पूर्णादर्वि हे गौर्णवाभऐन्द्रावनुष्टुभौ ।

पूर्णा दर्वि, देहि मे, इतोमे ऋचौ ऐन्द्रा इन्द्रदेवते । अनुष्टुप्छन्दस्के गौर्णवाभऋषिरपश्यत् । प्रथमायां दर्व्या स्थालीत आदत्तयज्ञे विनियोगः । द्वितीयायामन्वोमे ॥ (४)

अक्तन्न (५) हे गौतमऐन्द्र्यौ पङ्क्ती ।

---

(१) अगस्त्यस्येति कारावस्य पाठः ॥

(२) अस्मिन्सूत्रे इत्येषा पद कारावस्य नास्ति ॥

(३) अथावभृथेति कारावस्य पाठश्च ॥

(४) देहि मइत्यस्मिन्मन्त्रे धेहि नि ते दधौ । निहारं निहरामिते निहारं निहरासि-मे स्वाहा । इतिकाण्वस्य पाठः ॥

(५) अर्मामदन्तेति कारावस्य पाठः ॥

अवसमीमदन्त । सुसन्दृशस्त्वेतीमे ऋचौ रुद्रदेवत्ये पङ्क्तिछन्दसे गोतमऋषिरपश्यत् । आश्वमेधिकोपस्थाने विनियुक्ते । यस्याः पञ्चपादा अष्टाक्षरा सा पङ्क्तिः पञ्चपदा। अनादेयोऽष्टाक्षराः पादा इति धौम्यत्वात् । सुसन्दृशमित्तीयं समाक्षरा तेनेयमेकोना । पञ्चमयोस्तूभयव्यूहेन पूरणम् ॥

मनो न मानसन् हयृचम् बन्धुर्गायत्रम् ।

मनो न्वाह्वामहे, मान एतु । पुनर्नः इत्येतत्तृचम् मानसम् मनोदेवतम् गायत्रीछन्दस्कम् बन्धुर्ऋषिरपश्यत् । आश्वमेधिकोपस्थाने विनियुक्तम् मनो न्विति व्यूहेनाऽपि समाक्षरः तृतीयोऽपि तथा । तेनेयन् हयृचा। आ नइत्यत्र तृतीयः षडक्षरस्तेन ह्यृचा । पुनर्नइत्यत्र द्वितीयः समाक्षरः तेनेयमेकोना ॥

वयर्ठ० सोमं व्रते हृतोमाऋचम् सोमदेवत्याम् । गायत्रीछन्दस्काम् बन्धुर्ऋषिर पश्यत् । अस्या विनियोगे उक्तो नास्ति ॥

एष ते हे रौद्रे ।

एष ते रुद्र भाग इमे हे रुद्रदेवते यजुषी प्रथमस्य विंशत्यक्षरा । प्राजापत्या बृहती सामपङ्क्तिर्वा रौद्र्यौ काम्यौ पुरोऽनुवाक्यायां हे मेविनियोगः । द्वितीयस्य द्वादशाक्षरत्वात्यजुर्जगती । अधिकपुरोडाश्यस्याखूत्करोपकिरणे विनियोगः ॥

अव रुद्रर्ठ०(१) रौद्र्यौ ।

अवरुद्रम् (२)भेषजमसीत्येते हे ऋचौ रौद्र्यौ रुद्रदेवते । अनयोरुष्णिगादिश्छन्दसी आह ॥

एका पङ्क्तिरपरा ककुप् ।

(१) चनस्तो रौद्रगृहीति कात्यायनस्य पाठः

(२) एतस्मिन्ने सुगन्मन्यायेति काण्वशाखीयपाठः ॥

एका रुद्रमितीयम् पङ्क्तिछन्दस्का । द्वितीयपादस्य व्यूहेन पूरणम् । परा (१)मेयजमसीति ककुप्छन्दस्का । पङ्क्तेः पूर्वमुक्ता । तस्य द्वितीयः पादो द्वादशाक्षरः । प्रथमस्तृतीयश्चाष्टाक्षरौ । सा ककुबुष्णिक् । मध्यमस्यैककुबित्वकृत्वात् । अत्रापि द्वितीये तृतीये च व्यूहेनाक्षरपूरणम् । उभयोर्जपे विनियोगः ॥

त्र्यम्बकन् ते अनुष्टुभौ पूर्वस्याम् वसिष्ठः

रौद्र्या वेत्यनुवर्तते । त्र्यम्बकम् यजामहे इति ते ऋचौ अनुष्टुप्छन्दस्के रुद्रदेवते । अर्धाभयोः प्रथमौ सप्ताक्षरौ । तृतीयो नवाक्षरः । तेन व्यूहम् विनापि रुद्रः पूयते अनयोर्मध्ये पूर्वस्याऋचो वसिष्ठऋषिः ॥ उत्तरस्यास्तु साधारणप्रजापतिरेवेदम् । पूर्वस्या ब्रह्मयजमानाध्वर्वग्नीध्राणाम् अग्निपरिगमने विनियोगः ॥

उत्तरस्य यजमानकुमार्या अग्निपरिगमने विनियोगः ॥

एतद्रुद्रास्तारपङ्क्तिः । (२)

---

(१) एतास्मन्मन्त्र सूत्रमिन्यत्र मृगमिति पाठः ॥

(२) एतेन रौद्र्यनुष्टारपाङ्क्तयाज्ञिना वाजस्त्रयुद्वयाज्ञिनदेवत्या वाज्यहन्दे पूर्वदेवत्यैकसायत्रा प्रसूताऽऽपो गायत्र्यः कश्यपस्य नारायणऽऽर्षिहं यजमानाशिषं यो म आत्मा लौहाक्षरे चतुरक्षरान्ते दीर्घायुत्वाय लिङ्गोक्तदैवतमाशीः प्रार्थम् ॥ ३ ॥ ऊर्ध्वजः पादः काण्वशाखीयसर्वानुक्रमण्यम् । एतेन रुद्रार्चनेन परो मूजवतोऽतीहि ॥ अवततधनुः पशुहाकवचः कृतनिषङ्गोऽहेऽहन्तः शिवः शान्तोऽतीहि । याजिनो वाजोऽवतु भर्गो अस्मान्त्रैष्टुभः सिकममृतं बलाय ॥ विश्वेदेवा अभियन्तस्तमूवुस्तन्मा धिनोतु प्रजया धनेन ॥ वाज्यहं वाजिनस्योहूवऽऊहूनस्य भक्षयामि । वाजो वाजो भूयासम् ॥ सविता प्रसूता दैव्य आयुष उन्दन्तु ते तनूम् ॥ दीर्घायुत्वाय वर्चसे ॥ कश्यपस्य व्रताय्युषं जमदग्नेस्त्र्यायुषम् ॥ यद्देवानां व्रताय्युषन्तन्मेऽस्तु व्रताय्युषम् ॥ येन धाताबृहस्पतेरिन्द्रस्य चायुषं यपत् ॥ तेन ते वयमि व्रतेना जीवातवे जीवनाय ॥ दीर्घा युत्वाय बलाय वर्चसे ॥ सुप्रजास्त्वाय वासा अथो जीव श-

रौद्रीपङ्क्तमनुवर्त्तते । एतत्ते रुद्रेत्यस्याः आस्तारपङ्क्तिश्छन्दः रुद्रो देवता । यस्या ऋचोऽन्त्यौ पादौ द्व्यक्षराचरौ आद्यावष्टाक्षरौ । सा आस्तारपङ्क्तिः यथा वेदास्तारपङ्क्तिरित्युक्तेः । अत्र तु प्रथमो नवकः १ द्वितीयोऽष्टकः द्वितीयो एकादशकश्चेति छन्दोऽवयवा पर्यन्तएव छन्दोवयविष्ठानां रौद्रयुरोऽनुष्टुभानाम् भूम्नो बहुत्वस्य छन्दोदोषसङ्गने विनियोगः ॥

त्र्यायुषन्नारायणऽउष्णिहम् यजमानाऽऽग्नेयम् ।

त्र्यायुषम् जमदग्नेरितीमास्यस्य उष्णिक्छन्दस्कां नारायण ऋषिरपश्यत् । कीदृशी यजमानाग्नीरेवात्र देवता । यजमानस्य जपे विनियोगोऽस्याः । यस्या ऋचश्चत्वारोऽपि पादाः सप्ताक्षराः साऽप्युष्णिगित्युच्यते । चतुः सप्तकोष्णिगेवेत्युक्तेः ॥

शिवो नाम स्थ ौरम् ।

शिवो नामेत्येतद्यजुः स्थौरम् । स्थरदेवताम् । विंशत्यक्षरा प्राजापत्या बृहती सामपङ्क्तिर्वा । स्थराहाने विनियोगः ॥

निवर्त्तयामि लिङ्गोक्तदेवतामाशीः प्रायम् ।

निवर्त्तयामीत्येतल्लिङ्गोक्तदेवताम् यजमानस्यात्र प्राधान्यात्तस्यैवात्र देवतेत्यर्थः । आशीः प्रायम् । आशीर्बहुलम् । अष्टाविंशत्यक्षरा प्राजापत्या विष्टुप् । आर्षी उष्णिग्वा । (१) ऋषिस्तु यथायुक्तः तत्र सर्वत्र साधारणः प्रजापतिरेव ज्ञेयः ॥ १५ ॥

रदेः शतम् ॥ ७६ ॥ इति शुक्लयजुः काण्वसंहितायां नवानुवाकेषु षट्सप्ततिकण्डिकात्मिकायां तृतीयोऽध्यायः ॥ ३ ॥ समिधाग्निमग्निर्ज्योतिरन्तश्चाष्टका ऽउपप्रयन्तो ऽअध्वरमग्निर्विर्ठ्शतिर्भूर्भुवः सप्त प्रवासिनो हवामहे पञ्च पूर्णा दर्वि द्वे अक्षन्नमीमदन्तेष त रुद्र भागो वाजिनो वाजः षट्कास्तृतीये नव षट्सप्ताः । ३ । ९ । ७६ ॥ इत्यादिः काण्वसाम्नीयसंहितायां पाठश्च बुधैर्बोध्यः ॥

(१) वरुणे विनियोगः इति पङ्क्तिपाठः ॥

इति चातुर्मास्यमन्त्राः ॥

अथाग्निष्टोममन्त्राणां सर्वेषां साधारण्येकदेशिमाह ॥

अग्निष्टोमः प्रजापतेरार्षम् ॥

अग्निष्टोमपदृष्टं तत्प्रकाशनपरत्वात् तेनाग्निष्टोममन्त्राणां सर्वेषां प्रजापतिरृषिरित्यर्थः । यत्र तु ऋषिविशेषोऽभिधीयते तत्रोभावप्यृषी ज्ञेयौ ॥

एदमूहेऽत्यष्टी व्यवसाने ॥(१)

एदमगन्म, आपोऽस्मान्, इति इमे द्वे ऋचौ अत्यष्टी । अत्यष्टिछन्दस्के व्यवसाने अवसानत्रययुते । अष्टषष्ट्यक्षरं छन्दोऽत्यष्टि तत्र एदमिते त्रिभिरक्षरैरधिका । आपइति तु पूर्वैवाष्टषष्ट्यक्षरा न्यूनाधिका । अनयोर्विनियोगानुसारेण लक्षणो देवता आह ॥

आद्यावर्द्धौ देवयजनदेवत्यौ ।

एदमगन्नित्यस्याश्च आद्यावर्द्धौ देवयजनदेवत्यौ अग्निष्पाचेत्यारभ्यपूर्वार्द्धगतास्तत्सम्बन्धस्य यजमानस्योद्धारणे विनियुक्तौ ।३॥

इमाआपः ॥

इमाआपः शमित्यस्य आपो देवताः मोक्षणोक्षणे विनियोगः ॥

ओषधे कुशतरुणम् ॥

ओषधे त्रायस्वेत्यस्य कुशतरुणं (२)देवता । कुशतरुणसंस्कारे विनियोगः ॥

स्वधिते क्षुरः ॥

स्वधितइत्यस्य क्षुरो देवता । अग्निसंस्कारे विनियोगः ॥

(१) एद मिस्त्रिंशदुभयाद्या देवयजनदेवत्या इति काण्वसर्वानुक्रमाष्ठः ॥
(२) कुशतृण इति पद्धतिपाठः ॥

आपोऽयस्कानाम्

आपोऽयस्कानित्यस्याऽऽपो देवताः । [illegible] विनियोगः । न तु कुम्भोदकेन ।(१)

दीक्षातपसोर्धाम

दीक्षातपसोरित्यस्य वायो देवता । [illegible] विनियोगः ॥

महीनां नवनीतम्

महीनां पयसित्यस्य नवनीतं देवता । [illegible] प्राजापत्याऽनुष्टुप्सामानुष्टुबा । [illegible] विनियोगः ॥

हविष्याञ्जनम्

हविष्यासीत्यस्याञ्जनं देवता । [illegible] सामस्तुती वा । [illegible] विनियोगः ॥

चित्पतिर्हि प्राजापत्ये

चित्पतिं [illegible] वाक्पतिर्मेत्येते द्वे यजुषी प्राजापत्ये प्रजापतेरिमे । आद्या सानर्षगा व्यूहेन चतुश्चत्वारिंशदक्षरा आर्षीत्रिष्टुप् । द्वितीयापि तथैव [illegible] यजमानयाजने विनियोगः ॥

देवो मा मावित्रम्

देवो मा मवितेत्येतन्मवितृदेवत्यं । आद्यः पञ्चचत्वारिंशदक्षरत्वादेकाक्षराधिकं पूर्वोक्तमेव छन्दः । नामेत्यस्य [illegible] विनियोगः ॥

आवो देव्यनुष्टुभौ

आवो देवा इतीयं दर्वीदेवत्या अनुष्टुप्छन्दस्का । [illegible] याजने विनियोगः । अत्र द्वितीय पादो व्यूहेन पूर्यते ।

(१) इदमस्य वर्णस्पूरणार्थमेवोक्तं प्रजापतिं ऋषयोऽपश्यन्नित्यादि ॥ आदद्दाम्यः इत्यस्यापो देवता, जलमन्त्राऽनुष्टुप्पूर्वार्द्धेऽनुक्रमणे विनियोगः ।

आज्यं यज्ञं चतुर्थी यज्ञ ॥

आज्यं यज्ञं । आज्यौदनः । आज्यं धर्मः । आज्यं यातयामत्वेनाऽऽ चतुर्थी यजुषां यज्ञा देवता। मनोहरा देवी जगती यजुरारभ्य च तुर्थो छंदः, [illegible] । सर्वाहुत्यस्य दैवीउष्णिक् ऋक्कुब्ज[illegible] विनियोगः ॥

आकूत्यै चतुर्थीमौदुम्बरभक्षानामग्निः ॥

आकूत्यै प्रयुजे मेधायै दीक्षायै सरस्वत्यै पूषेषां चतुर्थीमौदुम्बरभक्षानामग्निर्देवता । प्रथमाहुतीनां चतुर्थीनामौदुम्बरभक्षहोमे विनियोगः । तृतीयस्य जपे चतुर्थीमपि दशाक्षरत्वादासुरीविष्टुप्छन्द यजुः षड्जस्वरो ॥

आपो देवीर्बृहतीरित्यस्य लिङ्गोक्तदेवता विराट् ॥

आपो देवीर्बृहतीरित्यस्य लिङ्गोक्तदेवता अप्त्यावापृथिव्यन्तरिक्षबृहस्पतिदेवतेत्यर्थः । अथवा विराट्छन्द. एकादशाक्षरत्रयः पादा यस्याः सा विराडुच्यते । दशकाक्षरयो विराडेकादशको वेति संशयात् । अत्र प्रथमो द्वादशाक्षरः । तेनैकादिका । औदुम्बरभक्षहोमे विनियोगः ॥ १६ ॥

विश्वो देवस्य नेतुर्मानुषा इयः सादिचीमनुष्टुभम् ॥

विश्वोदेवस्येतीदमृचं मानुषदेवतामनुष्टुपछन्दस्कां सवस्यादेय ऋषिरपश्यत् । अवाद्या पादौ सप्ताक्षरौ । तेन दृष्टेन औदुम्बरभक्षहोमप्रयोगस्या अपि विनियोगः ॥

ऋक्सामयोः छष्णाजिने ॥

ऋक्सामयोरित्यस्य ते छष्णाजिन देवता। बृहतीछन्दः विंशत्यक्षरा प्राजापत्या पङ्क्तिः । शुक्लकृष्णसन्धालक्ष्यं, विनियोगः ।

शर्मासि छष्णाजिनम् ॥

वर्मासि वर्म मे यच्छेत्यस्य कृष्णाजिनं देवता सप्तदशाक्षरत्वात् । जगत्यार्षी एकोना । सामानुष्टुब्वा एकाधिका । कृष्णाजिनवपने विनियोगः ॥

अर्मस्यक्षिरोभिर्दृष्टं मेखलम् ॥

अर्मस्यक्षिरसीत्येतन्मेखलं मेखलादेवतं यजुरक्षिरोभिर्दृष्टम् । मेखलाबन्धने विनियुक्तं । पञ्चदशाक्षरा आसुरीगायत्री ॥

सोमस्य नीविः ॥

सोमस्य नीविरित्यस्य नीविर्देवता । सप्ताक्षरा दैवी जगती यजुरृष्णिग्वा नीविकरणे विनियोगः ॥

विष्णोर्वासः ॥

विष्णोः वर्मासीत्यस्य वासोदेवता । द्वादशाक्षरा यजुर्जगती । शिरःप्रोर्णवने विनियोगः ।

इन्द्रस्य सुषस्याः कृष्णविषाणा ॥

इन्द्रस्य योनेः सुष याइत्यनयोः कृष्णविषाणा देवता । इन्द्रस्येति सप्ताक्षरा दैवीजगती । ललाटोपस्पर्शने विनियोगः । सुषस्याः षडक्षरा यजुर्गायत्री । दैवी त्रिष्टुब्वा । भ्रूम्युल्लेखने विनियोगः ॥

उच्छ्रयस्व दण्डः ॥

उच्छ्रयस्व वनस्पतइत्यस्य दण्डो देवता । दण्डोत्क्षणे विनियोगः द्वादशाक्षरा यजुर्गायत्री सामत्रिष्टुप् ॥

व्रतं यज्ञः ॥

व्रतं कृणुतेत्यस्य यज्ञो देवता । व्रतकरणप्रैषे विनियोगः, त्र्यूहेन चतुर्विंशत्यक्षरा प्राजापत्यापङ्क्तिः ॥

दैवीं धीः ॥

दैवीं धिय मित्यस्य धीर्देवता । द्वाविंशदक्षरा प्राजापत्या जगती ।

[illegible] विनियोगः ॥

ये देवा वाक्प्राणोदानौ चक्षुः श्रोत्रमध्यात्ममग्निर्मित्रावरुणावादित्यो विश्वेदेवा अधिदैवतम् ॥

ये देवा मनोजाताइत्यस्य मन्त्रस्याध्यायीं प्राजापत्यामनुष्टुभमधिकृत्याग्नि विषये स्वशरीरे वा प्राणोदानौ चक्षुः श्रोत्रं देवता । तथा अधिदैवतं देवतास्वधिकृत्य देवतासु मध्ये चाग्निर्मित्रावरुणावादित्यो विश्वेदेवादेवताः । तथा च श्रूयते" । इमे वै प्राणा मनोजाता मनोयुजो दक्षक्रतवो वागेवाग्निः प्राणोदानौ मित्रावरुणौ चक्षुरादित्य श्रोत्रं विश्वेदेवा एतासु हैवास्यैतद्देवतासु हुतं भवतीति" इममष्टाविंशत्यक्षरा प्राजापत्यानुष्टुब्नामच्छन्दसि विनियोगः ॥

श्वाचा आपो जगती ॥

श्वाचाः पीताइत्यस्यर्क् आपो देवता जगतीछन्दस्का । तस्याश्चत्वारः पादा द्वादशाक्षराः सा अष्टाचत्वारिंशदक्षरा जगती । साध्यालम्भे विनियुक्ता । अत्र तु प्रथमद्वितीयावेकादशकौ । ततो द्वौ सप्तकौ । एको वा चतुर्दशकः । ततएको द्वादशक इति । जगती वा । पादानामनियताक्षरत्वात् । तस्यास्तु नियमाभावात् ।

इयं ते शोष्टम् ॥

इयं ते यज्ञियेत्यस्य शोष्टं देवता । अष्टाक्षरा यजुरनुष्टुप् । शुष्कविषयत्वेन शोष्टादाने विनियोगः ॥

अपो मूत्रम् ॥

अपो सुष्वाणीत्यस्य मूत्रं देवता । मेहने विनियोगः ।

इयं त्रयोविंशत्यक्षरा

तेनैकाधिका सामविराट्पुष्टुप् । एकोनार्षी । गायत्री वा ॥

पृथिव्या लोष्ठम् ॥

पृथिव्या सधवेत्यस्य लोष्ठं देवता । षडक्षरा देवी त्रिष्टुप् । यजुर्गायत्री वा । गृहीतस्य लोष्ठस्याभिमन्त्रणे विनियोगः ॥

अग्ने त्वठ्.ग्नेय्यनुष्टुप् ॥

अग्ने त्वठ्-सुनागृहीतीयमाग्नेयी अग्निदेवत्याऽनुष्टुप्छन्दस्का । अत्र प्रथमवृचौ समाचरौ । तेन दृश्यूना । स्वापप्रारम्भे उच्चारणे विनियुक्ता ॥

पुनर्मनऽआग्नेयम् ॥

पुनर्मनइत्येतदाग्नेयं । अग्निदेवत [illegible] विनियुक्तं । इयं चत्वाशदक्षरा ब्राह्मी बृहती ॥

त्वन्नग्ने वत्सऽअग्नेयीं गायत्रीम् ॥

त्वन्नग्ने व्रतपाइतीमामृचमग्निदेवता गायत्रीछन्दस्का वत्सयक्षविरूपयत् । अत्र प्रथमोऽष्टकः द्वितीय षट्क सतुगृहेन समकः । तृतीयोऽपि व्यहेन षट्कः तेनेयं प्रतिष्ठा सज्ञा गायत्री भवति । विपरीता प्रतिष्ठेत्युक्ते । दीक्षितस्य क्रोधाद्रत्यभाषकयोः प्रायश्चित्ताधीत्वाद्रने विनियोगः ॥

रास्त्वं यत्सौम्यम् ॥

रास्त्वयत्सोमेत्येतत्सौमदेवतं । सौम्यमिति सोमाद्यण् । द्वात्रिंशत्यक्षरा सामत्रिष्टुप् । लब्धस्यालब्धाचमने विनियोगः ॥

एषाते हिरण्याज्यदैवतम् ॥

एषा ते शुक्र तनूरित्येतद्यजुर्हिरण्याज्यदैवतं । चत्वारिंशदक्षरा सूक्तं त्रिष्टुप् । बर्हिस्तृणवदृश्यस्य हिरण्यस्याज्यमध्ये निधाने विनियोगः ॥

अूरसि वाग्दैवतम् ॥

वूरसीत्येतत् वाग्देवता । चतुश्चिंशदक्षरा पङ्क्तिश्छन्दः पञ्चमो धैवतः स्वरः ॥

शुक्रमसि हिरण्यम् ॥

शुक्रमसीत्यस्य हिरण्यं देवता चतुष्टयाक्षरा ब्राह्मी बार्हतो वा । हिरण्यस्योद्वपने विनियोगः ॥

चिदसि गोः सोमक्रयणी वायूपाभ्यारोपकल्पनया ॥

चिदसि मनासीत्यस्य वसुमनः सोमक्रयणीगौर्देवता । कया बुद्ध्या वायूपाभ्यारोपकल्पनया । वायूपस्य सोमक्रयस्यां या अभ्यारोपकल्पना आरोपबुद्धिस्तया । वायूपैवेयं सोमक्रयणीतिबुद्धेत्यर्थः । "वाय्वै सोमक्रयणीति दानेनेति श्रुतेः"० । इयम् त्र्यक्षिनवाक्षरा ब्राह्मी पङ्क्तिः । अस्ति ग्रक्षरो वा सोमक्रयणभिमन्त्रणे विनियोगः ॥ १७ ॥

वस्व्यस्यनुष्टुब्बृहती वा सोमक्रयण्या स्तुतिः ॥

वस्व्यस्यदितिरसीत्येषा ऋगनुष्टुप्छन्दस्का । बृहती छन्दस्का वा चतुश्चिंशदक्षरत्वादिकल्पः । द्वाभ्यामधिकाऽनुष्टुब्वा । द्वाभ्यामूना बृहती वेति । सोमक्रयण्याः स्तुतिः । अतः सोमक्रयण्यैवाच्च देवतेत्यर्थः । यायच स्तूयते सा तच्च देवता भवतीति प्रागुक्तम् । सोमक्रयण्या अनुगमने विनियोगः ॥

अदित्या ऽआज्यम् ॥

अदित्याख्या मूर्द्धन्यित्यस्याज्यम् देवता । चिंशदक्षरा ऋक्पङ्क्तिः सोमक्रयणीपदे चतुर्गृहीतहोमे विनियोगः ॥

अग्ने यज्ञाम् लिङ्गोक्ता देवताः ॥

अग्ने रमस्येत्यादीनाम् यज्ञाम् यजुषाम् लिङ्गेनैव देवता उक्ताः ।

तपाऽसे रजसेत्यस्य पदम् पांक्तदैवं देवताः । पञ्चाक्षरा देवीपङ्क्तिश्छन्दः । पङ्क्तिलेखने विनियोगः । अग्ने ते वस्वुरित्यस्य पदम् देवता । पञ्चाक्षरा देवीपङ्क्तिः पदस्य आवाहने विनियोगः । ये रायं मे रायइत्यस्य यजमानो देवता पञ्चाक्षरा दैव्युष्णिक्छन्दः । यजमानस्य पदप्रतिग्रहणे विनियोगः । मा वयमित्याग्नेयी देवता । एकादशाक्षरा वसुत्रिष्टुप् । आत्मालम्भे विनियोगः । तोतो रायइत्यस्य पत्नी देवता चतुरक्षरा देवी बृहती । पत्नीवाचने विनियोगः ॥

समरव्येपत्न्याग्नीरास्तारपङ्क्तिः ॥

समरव्ये देव्येतीयमृक् आस्तारपङ्क्तिछन्दस्का । पत्न्याग्नीदेवता । पत्नीवाचने विनियोगः, यस्या आद्यौ द्वौ पादावष्टाक्षरौ । तृतीयचतुर्थौ द्वादशाक्षरौ सा आस्तारपङ्क्तिः । "अन्त्यौ चेदास्तारपङ्क्तिरिष्यते" ॥

एष ते निर्ऋतेभागइत्येतद्यजुर्निर्ऋतिदेवतम् ॥

एष ते गायत्री भागइत्येतद्यजुर्निर्ऋतिदेवतम् । व्यूहेन षट्पञ्चाक्षरत्वादुष्णिग्बृहती त्रिष्टुप् ॥ निर्ऋतिरध्वर्युदेवता । हे अध्वर्यो त्वम् मम इत्येवम् नीमाय ब्रूतादिति सम्बोध्यमानत्वेन प्राधान्यात् । सोमो वा देवता । तस्य स्तूयमानत्वात् । वाचने विनियोगः ॥

आस्माकोसि सोम्यम् ।

आस्माकोऽसीत्येतत्सोमो देवतम् व्यूहेनाष्टाक्षरा ऋग्यजुषी सामबृहती वा सोमालम्भे विनियोगः ॥

अभित्यऽ० सावित्र्यृष्टिः ।

अभित्यमितीयमृक्सावित्री सवितृदेवत्या अस्याः ऋष्टिश्छन्दः

(१) शुक्रन्त्वा इत्यस्य स्थाने चन्द्रन्त्वा इति कात्यायनीयपाठः ॥

"चतुःषष्टयक्षरा अष्टिरित्युच्यते अष्ट यज्ञामतिदिति, प्रजास्त्वा, अनु-प्राणन्तिति व्यूहदयेन पूरणम् सोममाने विनियोगः ॥

प्रजाभ्यस्त्वा प्रजास्त्वा शुक्रन्त्वा सौम्यानि ।

प्रजाभ्यस्त्वा, प्रजास्त्वानु । शुक्रन्त्वा शुक्रेत्येतानि यजूंषि सोमदेवत्यानि । प्रजाभ्यस्त्वा चतुरक्षरा देवी बृहती । उष्णीषेण सम्मने विनियोगः । प्रजाभ्यस्त्वा । पञ्चदशाक्षरा आसुरी गायत्री अनुष्टुभा मध्ये विवरणे विनियोगः । शुक्रन् त्वा विंशत्यक्षरा प्राजापत्या बृहती वाचने विनियोगः ॥

सम्मे ऽग्ने लिङ्गोक्ते ॥ (१)

सम्मे ते, अग्ने ते इत्येते द्वे लिङ्गोक्तदेवते । सोमविक्रयिदेवते इत्यर्थः । तस्य सम्बन्धात् । सम्मे चतुरक्षरा देवी बृहती । हिरण्येन सोमविक्रयिद्रव्यमिश्रितीकरणे विनियोगः । अग्ने ते षडक्षरा यजुर्गायत्री । देवी विष्टुबा । यजमानसहितनिधाने विनियोगः ॥

तपसो हेऽजा ।

तपसस्तनूरित्यस्य यजुषोऽर्धे प्रथमे भागे अजादेवताः ॥

अर्धे सोमः ।

अर्धेव यजुषो द्वितीयेऽर्धे परमेष्ठ पशुनेत्यस्मिन् । द्वितीये भागे सोमो देवता । समस्तायाः एकत्रिंशदक्षरत्वादेकाधिका कृतिः । एकोना प्राजापत्या जगतीवा । द्वयोरप्यर्धयोर्वाचने विनियोगः ॥

मित्रो नऽइन्द्र य सौम्ये ।

मित्रो नऽएहि, इन्द्रश्चोरुमित्येते द्वे सौम्ये सोमदेवते मित्रो न

(१) देवते इत्यधिकम् क एवशाखीयपाठः ।

इत्यस्य नवाक्षरा यजुर्बृहती यज्ञाङ्गमन्त्रे सोमादाने विनियोगः । इन्द्रायेदम् । व्यूहेन विंशत्यक्षरा प्राजापत्या बृहती सामपङ्क्तिर्वा सोमो देवता । अग्नौ सोमे निधाने विनियोगः ॥

स्थानादीनि धिष्ण्यनामानि ।

स्थान भ्राजेत्यस्य मन्त्रस्य स्थान भ्राजेत्यादीनि धिष्ण्यनामानि देवताः । "एतानि वै धिष्ण्यानान् नामानीति श्रुतेः" ।(१) स्थानाद्यष्टानां देवता । द्वाविंशदक्षरा प्राजापत्या जगती ऊर्ध्वे विनियोगः ।

परि माऽग्नेयो पुरस्ताद्बृहती ।

परि माऽग्नइत्येषाऽग्निदेवता पुरस्ताद्बृहतीच्छन्दस्का वाचने विनियुक्ता । यस्या आद्यः पादो द्वादशाक्षरः । अग्ये त्रयोऽष्टाक्षराः सा पुरस्ताद्बृहती "आद्यश्चेत्पुरस्ताद्बृहतीत्युक्तेः" अत्र प्रथमतृतीयपादयोर्व्यूहेन पूरणम् । तृतीयचतुर्थपादसन्धौ व्यूहेन छन्दःपूरणम् ॥

प्रतिपन्त्रामनुष्टुप्पथिदेवत्या ।

प्रतिपन्त्रामपञ्चदशीतीयसूक् अनुष्टुप्पथि देवत्या । पन्था अस्या देवताइत्यर्थः । अत्रापि सुअस्ति गामिति व्यूहेन पूरणम् अतः प्रतिगमने विनियोगः ॥

अदित्याः कृष्णाजिनम् ।

अदित्यास्त्वगित्यस्य कृष्णाजिनं देवता । अष्टाक्षरा यजुरनुष्टुप् प्राजापत्या गायत्री वा । कृष्णाजिनास्तरणे विनियोगोऽस्य यजुषः ॥

अदित्यै सौम्यम् ।

---

(१) इयं श्रुतिः शतपथब्राह्मणस्य तृतीयकाण्डाष्टमस्य द्वितीयपाठकस्य षष्ठब्राह्मणस्यैकादशखण्डस्य च ज्ञेयेति ॥

अतिथे सदृशमीदेत्यस्य वसुरनुष्टुप्छन्दस्कम् सोमो देवता । अन्तिम सोमक्रियासु विनियोगः ॥

अक्षभ्नातृष्टिभौ वाहरयौ ।

अक्षभ्नाताम् । वनेषु व्यन्तरिक्षमिति द्वे ऋचौ त्रिष्टुप्छन्दस्के वाहरयौ वसुदैवते अक्षभ्नाद्विरात्रस्य वाचने विनियोगः । वनेषु वीत्यस्य सोमपर्यावर्तनेन परिसरणे विनियोगः । अत्र प्रथमद्वितीय पादयोर्यथादेशव्यूहेन पूरणम् ॥

सूर्यस्यानुष्टुप्कृष्णाजिनम् ।

सूर्यस्य चक्षुरित्यनुष्टुप्छन्दः कृष्णाजिनम्देवता । कृष्णाजिनस्य पुरस्तादामन्त्रणे विनियोगः ॥

उस्राऽऊर्ध्वबृहत्यानडुही ।

उस्रावेतमितीयमृक् आनडुही । अनड्वाहावस्य देवतेत्यर्थः ऊर्ध्वबृहतीछन्दः । यस्याक्षरः पादा दशाक्षराः । "सोर्ध्वबृहती त्रिजगत्यूर्ध्वबृहतीत्युक्तेः" । एकोनेयम् । अत्र प्रथम पादो दशाक्षरो विपरीतम् वा । उत्तरवेदिकरणे विनियोगः ।

भद्रो मे सौम्यम् ।

भद्रो मेऽसीत्येतत्सोमदेवतम् । एवं नवतत्त्वक्षरत्वादेकाक्षराधिका अत्यष्टिश्छन्दो वाचने विनियोगः ॥

नमो मित्रस्याभितपनः सूर्यः सौरीं जगतीम् ।

नमो मित्रस्येतीमामृचम् सौरीं सूर्यदेवताम् जगतीछन्दस्काम-भितपनः सूर्यश्च वैरूपम् । अभितः सर्वतस्तपतीत्यभितपनः । अयमाज्यागोपरिष्टाद्यमानदृश्यः । अष्टाचत्वारिंशदक्षरा जगती वाचने विनियोगः ॥

वरुणस्य पञ्च वारुणानि ।

यद्यद्यज्ञोत्तमभवनमसीत्यादीनि पञ्च यजूंषि यद्यद्देवतानि । आद्यस्य नवाक्षरा यजुर्बृहतीछन्दः [illegible] विनियोगः द्वितीयस्य दशाक्षरा यजुःपङ्क्तिः । आसन्दस्यभिमर्शने विनियोगः । चतुर्थस्य एकादशाक्षरा यजुस्त्रिष्टुप् । कृष्णाजिनादानादौ विनियोगः । पञ्चमस्य द्वादशाक्षरा यजुर्जगती । आसन्दस्य सोमनिधाने विनियोगः ॥

या ते सौमी त्रिष्टुभम् गोतमः ।

या ते धामानीत्येताम् सोमदेवता त्रिष्टुप्छन्दस्काम् गोतमऋषिरपश्यत् । वाक्षनोऽस्य विनियोगः । चतुस्त्रिंशदक्षरा त्रिष्टुप् ॥ ब्रूहेन पूरणम् ॥ १८ ॥

अग्नेस्तनूरसि पञ्च वैष्णवानि ।

अग्नेस्तनूरसीत्यादीनि पञ्च यजूंषि विष्णुदेवतानि [illegible] विनियुक्तानि । अग्नेस्तनूः दशाक्षरी यजुः, सोमस्य एकादशाक्षरा यजुस्त्रिष्टुप् । अतिथे द्वादशाक्षरा यजुर्जगती ॥ श्येनाय त्वा । यजुर्जगत्येव । अग्नये त्वा । त्रयोदशाक्षरा आसुर्यनुष्टुप् ॥

अग्नेः शृङ्गम् ।

अग्नेस्तनूरसीत्यस्य शृङ्गम् देवता षडक्षरा यजुर्गायत्री । देवी त्रिष्टुवा । शृङ्गादाने विनियोगः ॥

वृषणौ (१) दर्भतरुणके ।

वृषणौ स्थ इत्यस्य दर्भतरुणे देवता । चतुरक्षरा देवीबृहती दर्भतरुणयोर्निधाने विनियोगः ॥

उर्वश्यसि त्रयाणाम् लिङ्गोक्ता देवताः ।

उर्वश्यसीत्यादित्रयाणाम् यजुषाम् देवता लिङ्गेनैवोक्ताः । तथो-

(१) वृषणौ स्थो इति करःपञ्चाशत्पाठः ।

वैश्वानरोत्तरार्चिर्देवता । चतुरक्षरा देवी बृहती । अधस्तरश्चिनि-
धाने विनियोगः । आवृरित्यस्य हुतम् देवता । दैवी बृहती । आ-
ज्यस्थालीसंमार्जने विनियोगः । पुष्करपर्णस्योत्तरार्चिर्देवता । च
तुरक्षरा यजुर्गायत्री । अधरारणेरधरि समन्त्रनिधाने विनियोगः ॥

गायत्रेण त्रीण्याग्नेयानि ।

गायत्रेण त्वा, त्रैष्टुभेन त्वा, जागतेन त्वा, एतान्यग्निदेवतानि ।
मन्त्रे विनियुक्तानि । त्र्यक्षरा एकादशाक्षरा यजुस्त्रिष्टुप् ॥

भवतं नः पङ्क्तिः ।

भवतम् न इत्यस्याः पङ्क्तिश्छन्दः । पञ्चपदा चत्वारिंशदक्षरा
पङ्क्तिः । अत्र तृतीयः षडक्षरः । चतुर्थो दशाक्षरः । अन्येऽ-
ष्टाक्षराः । तेनेयमार्षी पङ्क्तिरिति युक्तम् । पादानामनियताक्षर-
त्वात् ॥

आनावग्निर्विराट् ।(१)

आनावग्निरित्यस्य विराट्पङ्क्तिश्छन्दः । यद्यप्यत्र विरा डिति
पाठः । दशाक्षरैश्चतुर्भिः पादैर्विराड्भवति "विराड्दशकाद्यत्यृक्" ।
अत्र तु द्वितीयचतुर्थावेकादशाक्षरौ । तेन द्वाभ्यामक्षराभ्यामूना
त्रिष्टुबपि विराट्इत्युच्यते । "द्वाभ्याम् विराड्स्वराजावित्युक्तं" । ते-
नेयम् विराट्त्रिष्टुप् । न तु विराटपङ्क्तिरिति ॥

एतयोर्निर्मथ्याहवनीयावग्नी देवते ।

एतयोर्भवतम् नः । अग्नाइग्निरित्येतयोर्निर्मथ्याहवनीयावग्नी
देवते । निर्मथ्यश्चाहवनीयश्च निर्मथ्याहवनीयौ एतौ द्वावग्नी दे-
वते इत्यर्थः, भवतम् नइत्यस्याग्नावग्निमासने विनियोगः । अग्नाव-
ग्निरित्यस्याज्याहुतौ होमे विनियोगः ।

---

(१) अग्नाऽग्निरिति कारावज्ञानार्थपाठः ॥

आयतये वाचव्यम् ।

आयतयइत्येतद्यजुर्वायुर्देवतम् । अष्टाविंशत्यक्षरा प्राजापत्या त्रिष्टुप् । प्रोक्षणे वपादानी विनियोगः ॥

अनाधृष्टमाज्यम् ।

अनाधृष्टमसीत्याज्यम् देवता व्यूहेन द्वात्रिंशदक्षरा प्राची बृहती । तानूनप्त्रसंमर्शने विनियोगः ॥

अग्ने व्रतपाऽआग्नेयम् ।

अग्ने व्रतपाइत्येतद्यजुरग्निर्देवतम् समिदाधाने विनियुक्तम् । अष्टापञ्चाशदक्षरत्वादृग्भ्यामधिका गायत्री वा । ऋग्भ्यामूना अति गायत्री वा ब्राह्मी पङ्क्तिर्वा ॥

अर्ठ॰ शुरर्ठ॰ शुः प्रकृतिश्चतुरवसाना सौमी । (१)

अर्ठ॰ शुरर्ठ॰ शुष्ट इति इयमृक्चतुरवसाना प्रकृतिश्छन्दस्का चत्वार्यवसानानि विरामस्थानानि यस्याम् सा तथा । सौमी सोमदेवता । सोमाध्वयने विनियुक्ता । चतुरशीत्यक्षरा प्रकृतिः । अन्त्योऽर्धर्चोलिङ्गोक्तदेवत । अन्नुरंशुष्टइत्यस्या अन्त्योऽर्धर्चः ॥

एष्टारायऽइत्यं (२)लिङ्गोक्तदेवतः ।

अग्निर्देवतेति माधवाचार्याः । अन्येषाम् तु रायः कृतम्, द्यावापृथिव्यो वा । प्रस्तरनिरूपवेऽस्य विनियोगः ॥

या ते (३)त्रीण्यग्नेयानि ।

या ते अग्नइत्यादीनि त्रीणि यजूंष्यग्निदेवतानि उपभृति स्रुवेऽाज्यहोमे विनियुक्तानि प्रत्यृचम् क्रमेण प्रथमा ऋक्त्रिष्टुप् । अय-

---

(१) प्रकृतिः षडवसाना इति कारावशाखीयपाठः ॥

(२) अन्त्योऽर्धर्चो इति कारवीयसर्वानुक्रमे विशेषः पाठो दृश्यः ॥

(३) अग्ने इति पदमधिकं कारावसर्वानुक्रमे ॥

स्त्रियदक्षरत्वात्। हरिण्यया, रजःण्यया, अपि एकाक्षराधिक्ये ऋचौ त्रिष्टुभावेव।

तन्नायनी चत्वारि पार्थिवानि।

तन्नायनी मेऽसीत्यादीनि चत्वारि यजूंषि पार्थिवानि पृथिवी-देवतानि चतुर्णामपि आत्मानपरिलेखने विनियोगः। तन्नायनी षडक्षरा यजुर्गायत्री, वित्तायनी च तथैव। तृतीयचतुर्थौ सप्ताक्षरे दैव्यौ जगत्यौ यजुरधिष्ठौ वा॥

विदेदग्नेयम्।

विदेदग्निरित्येतद्यजुरग्निदेवतम्। आत्मानं प्रहरणे विनियुक्तम्। अष्टादशाक्षरा ऋग्गायत्री॥

अग्नेऽअङ्गिरो योऽस्यामनुत्वा लिङ्गोक्तानि।

एतानि त्रीणि यजूंषि लिङ्गोक्तदेवतानि। तत्र अग्नेऽअङ्गिरः। अग्निर्देवता। एकादशाक्षरा यजुस्त्रिष्टुप्। पुरीषप्रहरणे विनियोगः। योऽस्याम्। अग्निरेव देवता। द्वात्रिंशत्यक्षरा सामत्रिष्टुप्। पुरीषनिवापे विनियोगः। अनुत्वा। अत्र उत्तरवेदिम् प्रति नीयमाना ऋत्विग्यो देवता। अष्टाक्षरा प्राजापत्या गायत्री। पुरीषप्रहरणे विनियोगः। यो द्वितीयस्याम्। यस्तृतीयस्यामित्यनयोरप्यग्निर्देवता। "(१)स वा अग्नीनामेव नामानि गृणन्हरति यान्वा अमून् देवा अग्नेऽग्नीन्होत्राय प्राहिणत ते प्राध्वस्तऽइमा एव पृथिवीरूपासर्पन्निमामहेव ते अस्याः परे इतिश्रुतेः"। परे अन्तरिक्षम् द्यौश्च। द्वितीया पृथिव्यन्तरिक्षम् तृतीया पृथिवी द्यौरिति॥

सिठं०ह्यसि चयाणाम् वेदिः

सिठं० ह्यसि सपत्नसाहोत्यादीनाम् चयानाम् उत्तरवेदिर्देव-

(१) इयमाप शतपथीयाध्वरकाण्डस्य श्रुतिर्बोध्येति॥

तः । प्रथमस्य उत्तरवेदिमूलेन विनियोगः । द्वितीयस्य ग्रीवयो । तृतीयस्य सिकतोपकिरणे । चतुर्णामपि पञ्चदशाक्षरा आसुरी गायत्री छन्दः ॥

इन्द्रघोषश्चतुर्णामुत्तरवेदिः ।

इन्द्रघोषस्त्वा । प्रचेतास्त्वा । मनो जवास्त्वा, विश्वकर्मा त्वा, इत्येतेषाम् चतुर्णां यजुषाम् उत्तरवेदिर्देवता । उत्तरवेदिमेचने विनियोगः । तत्र प्रथमचतुर्थयोस्त्रयोदशाक्षरा आसुरीत्रिष्टुप् । द्वितीयस्य दशाक्षरा यजुः पङ्क्तिः । तृतीयस्य चतुर्दशाक्षरा आसुर्युष्णिक्त्वामोदेवता ॥

इदमहमापम् ।

इदमहम् तत्सम् वारित्यस्यापो देवताः । षोडशाक्षरा प्राजापत्यानुष्टुप् । ग्रीवणीयेषस्य निनयने विनियोगः ॥

सिठं॰ह्यसि पञ्चानाम् वाक् ।

सिठं॰ह्यसि स्वाहेत्यादीनाम् पञ्चानाम् यजुषाम् वाग्देवता । नाभिश्चाधारणे विनियोगः । प्रथमस्य दैवीपङ्क्तिश्छन्दः । द्वितीया नवाक्षरा यजुर्बृहती । तृतीया नवोदशाक्षरा आसुर्यनुष्टुप् । चतुर्थी षोडशाक्षरा सामानुष्टुप् । पञ्चमी चतुर्दशाक्षरा सामोष्णिक् ॥

भूतेभ्यः स्रुक् ।

भूतेभ्यस्त्वेत्यस्य स्रुग्देवता चतुरक्षरा दैवीबृहती स्रुगुच्छ्रयणे विनियोगः ।

ध्रुवोऽसि परिधयस्त्रयाणाम् ।

ध्रुवोऽसि, ध्रुवक्षिदसि, अच्युतक्षिदसीत्येतेषाम् त्रयाणाम् परिधयो देवताः पैशुदारवपरिधिपरिधाने विनियोगः । ध्रुवोऽसि ।

अष्टाक्षरा गायत्र्या गायत्री । द्वितीयतृतीययोर्दशाक्षरा बृहत्यौ पङ्क्तिः ॥

अग्नेः (१)सम्भारा शुल्गुल्वादयः ।

अग्नेः पुरीषमसीत्यस्य शुल्गुलुसुगन्धितेजनवृक्षोद्भवा: सम्भारा देवताः । सप्ताक्षरा देवी जगती : [illegible] विनियोगः ॥१८॥

युञ्जते मन उतयुञ्जते सावित्रम् (१)जगतीम् ।

युञ्जते मन उतयुञ्जते सवितृदेवताम् । जगतीछन्दस्काम् सावित्रीमृक्षरपश्यत् । अष्टाचत्वारिंशदक्षरा जगती चतुष्पादा । स्वाहा पृथग्यजुः आज्याहुतौ चतुर्थ्यां होतव्येऽस्य विनियोगः ॥

इदम् विष्णुर्विचक्रमे वैष्णवीम् गायत्रीम् ।

इदम् विष्णुरितीमामृचम् विष्णुदेवताम् गायत्रीं छन्दस्काम् मेधातिथिर्ऋषिरपश्यत् । दक्षिणस्यानसो दक्षिणे वर्मणि शिरस्यस्या उपरिष्टाद्धोमे विनियोगः । अस्याः द्वितीयः पादः सप्ताक्षरः तैनैकाना ॥

इरावती वसिष्ठश्चिष्टुभम् ।

इरावती धेनुमती इतीमामृचम् विष्णुदेवताम् चिष्टुपछन्दस्काम् वसिष्ठऋषिरपश्यत् । अथैव वैष्णवीमित्यनुवर्त्तते । उत्तरस्यानसो दक्षिणवर्मणि शिरस्यस्योपरिष्टाद्धोमे विनियोगः । चतुश्चत्वारिंशदक्षरा चिष्टुप् । तृतीयपादोऽत्र दशाक्षरः अन्त्यो द्वादशाक्षरः । आर्षीचिष्टुब्वा पादानामनियताक्षरत्वात् ॥

देवश्रुतावत्तधरौ ।

(१) भस्म सम्भारा इति काण्वसर्वानुक्रमपाठात्साहितायामपि भस्मास्यग्नेरिति पाठो बोध्यः ॥

(२) सावित्रीमिति तत्र पाठः ॥

देवसुतावित्यस्याचतुरो देवते । चतुरोऽक्षने विनियोगः दशाक्षरा यजुःपङ्क्तिः ॥

प्राची स्रुङ्नोऽध्वम(१) हविर्धानी ।

प्राची प्रेतम् । स्रुङ्नोऽध्वम् । अत्र रमेथामित्येषाम् चतसृणाम् यजुषाम् हविर्धाने देवते । प्राची प्रेतम् चतुर्विंशत्यक्षरत्वादेकाधिका सामचिष्टुप् एकोना आर्षी गायत्री वाचने विनियोगः । स्रुङ्नोऽध्वम् पञ्चविंशत्यक्षरत्वादेकाधिकाक्षराऽनुष्टुप् स्रुक्षनामित्ते वाचने विनियोगः । अत्र रमेथाम् । दशाक्षरा यजुःपङ्क्तिः । अक्षसोदमित्यक्षने विनियोगः ॥

विष्णोर्नु तिस्रो वैष्णव्यस्त्रिष्टुभ आद्ये यजुरन्ते ।

विष्णोर्नु कम् । दिवो वा । प्रतदित्यासिस्रऋचो विष्णुदेवत्यास्त्रिष्टुप्छन्दस्काः । अत्र विष्णोर्नुकमितिदशाक्षरः पादः । तेनैकोना । चतुर्थस्य व्यूहेन पूरणम् । प्रतदित्यत्रापि दशाक्षरएव । तेनेयमप्येकोना । तासाम् मध्ये आद्ये प्रथमद्वितीये ऋचौ, विष्णोर्नु कम्, दिवो वा विष्णो, इत्येते द्वे ऋचौ यजुरन्ते । तयोरप्यन्ते विष्णवे त्वेति यजुरस्तीत्यर्थः । विष्णोर्नुकमित्यस्य दक्षिणस्यानस उपस्तम्भने विष्णवे त्वेत्यस्य च ध्रुवानिरवनने विनियोगः । दिवो वेत्यस्योत्तरस्यानस उपस्तम्भने (२) विष्णवे त्वेत्यस्य च ध्रुवानिरवनने विनियोगः । चतुरक्षरा दैवी बृहतीछन्दः, प्रतदित्यस्य च वाचने विनियोगः ॥

विष्णोर्नु प्रतद्दीर्घतमा औतथ्यः ।

विष्णोर्नु कम् । प्रतदित्यौतथ्यस्यापत्यम् दीर्घतमा

---

(१) रमेथामिति पदमविकं तत्र सर्वानुक्रमे । हविर्धानीत्यप्यधिकः पाठो बोध्यः ।

(२) उत्तरहविर्धानस्योपस्तम्भन इति पाठः ॥

सप्तऋक्षिः ॥

विष्णोरराटम् पञ्च वैष्णवानि ।

विष्णोरराटमित्यादीनि पञ्च विष्णुदेवतानि । प्रथमस्य सप्ताक्षरा देवी जगती राज्ञे विनियोगः । द्वितीयस्य पञ्चाक्षरा देवीपङ्क्तिः कार्यने विनियोगः । विष्णोः स्थः दैवीपङ्क्तिः । सीत्रे विनियोगः । विष्णोर्ध्रुवोऽसि दैवीपङ्क्तिः । अग्निकरणे विनियोगः । वैष्णवमसि दैवीपङ्क्तिः । हविर्द्धानाभिमर्शने विनियोगः ॥

आदद्देऽभिः ।

आदद्दे नार्यसीत्यस्याभिर्देवता । षडक्षरा यजुर्गायत्री । अध्वर्युदाने विनियोगः ॥

इदमहꣳ रक्षोघ्नम् ।

इदमहमित्येतद्रक्षोघ्नम् यजुः । चतुर्दशाक्षरा सामौष्णिक् । उपरवपरिलेखने विनियोगः । अथवा रक्षोघ्नम् देवता ।

बृहन्नौपरवम् ।

बृहन्नसीत्यौपरवम् उपरवदेवतम् उपरवखनने विनियोगः । अष्टाक्षराक्षरा सामबृहती ॥

इदमहम् पञ्च लिङ्गोक्तानि ।

इदमहन्तम् वलगमित्यादीन्युत्क्रत्यङ्किरामीत्यन्तानि पञ्च यजूꣳषि लिङ्गोक्तदेवतानि । । वलगदेवतानीत्यर्थः । पञ्चमस्य उत्क्रत्यदेवतेति विशेषः । क्रत्यादेवत्या इति करावसहिताभाष्ये । पञ्चानामपि यांमूहापे विनियोगः । आद्या चतुर्विंशत्यक्षरा आर्षी । अनुष्टुप्द्वितीया षड्विंशत्यक्षरा द्वाभ्यामधिका आर्षी अनुष्टुप् । एकैमोना ऋग्बृहती वा । तृतीयाचतुर्थ्यावप्येवम् । पञ्चमो यजुर्गायत्री देवोविष्टुब् ॥

स्वराडस्यौपरवाणि चत्वारि ।

स्वराडसे सपत्नहेत्यादीनि चत्वारि यजूंष्यौपरवाणि उपरवा एषाम् देवताश्चत्वः । उपरवाभ्यामवस्तरणे विनियोगः । तत्र प्रथ. मतृतीयचतुर्थानाम् अष्टाक्षरा प्राजापत्या गायत्री । द्वितीयस्य यजुर्बृहती ॥

रक्षोहणो वः सप्त वैष्णवानि ।

रक्षोहणो वो बलगहनइत्यादीनि वैष्णवास्थेत्यन्तानि सप्त यजूंषि विष्णुदेवतानि प्रथमस्य षोडशाक्षरा प्राजापत्यानुष्टुप् । उपरवोत्तरवेदि विनियोगः । द्वितीयस्य व्यूहेनाष्टादशाक्षरा ऋग्गायत्री । प्रोक्षणीशेषाहरणे विनियोगः । तृतीयस्य ऋग्गायत्री । बर्हिषा-मवस्तरणे विनियोगः । चतुर्थस्याष्टादशाक्षरा ऋग्गायत्री । अधिव-वणफलकौषधानि विनियोगः । पञ्चमस्य सप्तदशाक्षरत्वादेकोना ऋग्गायत्री एकाधिका सामानुष्टुब्वा पर्यूहने विनियोगः । ष-ष्ठस्य दैवीपङ्क्तिः अधिवपनचर्मास्तरणे विनियोगः । सप्तमस्य चतु-रक्षरा दैवीबृहती । प्राक्प्राग् निधाने विनियोगः ॥

यवोऽसि यवः ।

यवोऽसीत्यस्य यवो देवता । चतुर्दशाक्षरा सामीष्णिग्वा यवाग्-वपने विनियोगः ।

दिवे त्वौदुम्बरी ।

दिवे त्वादीनाम् । त्रयाणाम् । यजुषामौदुम्बरी देवता । औदुम्ब-रोप्रोक्षणे विनियोगः । प्रथमादैव्यनुष्टुप् चतुरक्षरा । द्वितीया षडक्षरा यजुर्गायत्री । तृतीया चतुरक्षरा दैवीबृहती ॥ (१)

(१) औदुम्बर्या अग्रप्रोक्षणे वि० । अन्तरिक्षे त्वा प्रजापतिः ऋ० ७ द वसी देवता यजुर्गायत्री छन्दः औदुम्बर्या मध्यप्रोक्षणे वि० । पृथिव्यै त्वा औदुम्बरी दे-वता दैवी बृहती छन्दः औदुम्बर्या मूलप्रोक्षणे वि०

शुध्यताम् पित्र्ये ।

शुध्यतामिति हे यजुषी पितृदेवत्ये । दशाक्षरा यजुः पङ्क्तिः प्रथमा । शेषावनयने विनियोगः । द्वितीया सप्ताक्षरा दैवी जगती । बर्हिषाम् प्रासने विनियोगः । पित्र्यत्वात् उदक्स्वर्गः ॥ (१)

उद्वियम् पञ्चानामौदुम्बरी ।

उद्वियꣳ स्तभानेत्यादि ध्रुवासीत्यन्तानाम् पञ्चानाम् यजुषामौदुम्बरीदेवता । औदुम्बर्युच्छ्रयणे विनियोगः । प्रथमस्य व्यूहेनाष्टाक्षरा ऋग्गायत्री ।

शुतानस्वा ।

एकविंशत्यक्षरत्वादेकाधिका ऋगनुष्णिक्औदुम्बर्यामवटमध्ये प्रवेशे वि० । ब्रह्मन्नसि त्वा इत्यस्य ऋग्गायत्रीएकोना सामपङ्क्तिर्वा । पांसुभिः पर्यूहणे विनियोगः । ब्रह्म दृꣳह० इह पञ्चदशाक्षरा आसुरी गायत्री पर्युप्तये विनियोगः । ध्रुवासि व्यूहने चतुर्विंशत्यक्षरा सामजगती । व्यूहने विनियोगः ॥ (२)

घृतेन द्यावापृथिवी ।

घृतेनेत्येतद्यजुर्द्यावापृथिवीदेवतम् । एकादशाक्षरा यजुस्त्रिष्टुप्विप्राजे होमे विनियोगः ॥

इन्द्रस्येन्द्रम् ॥

इन्द्रस्य खदिरित्येतदिन्द्रदेवतं । सामोषिणक् । खदिरादोपधे विनियोगः ।

---

(१) शुध्यन्तां प्रजा० पितरो देवता यजुः पङ्क्तिश्छन्दः शेषावनयने वि० । पितृघ्नाः प्रजा० पितरो दे० बर्हिषा प्रासने वि० । ईदृशः पङ्क्तौ पाठो बोध्यः ॥

(२) शुतानस्त्वा औदुम्बरीदे० ऋतानुष्णिक् औदुम्बर्या अवटमध्ये प्रवेशे वि० । ब्रह्मन्नसि त्वा प्र० ऋ० औदुम्बरीदे० ऋग्गायत्री पांसुभिः पर्युहणे वि० । अग्नेः पर्युषणे वि० इति पङ्क्तिपाठः ॥

परि त्वा मधुच्छन्दा अनिरुक्तामैन्द्रीमनुष्टुभम् ॥

परेत्वा गिर्वणइतीमामृचमनिरुक्तां मध्ये इन्द्रपदप्रयोगगूढामिन्द्रेत्यामनुष्टुभं मधुछन्दाऋषिरपश्यत् । परिवापेण विनियोगः ॥

इन्द्रस्येन्द्राणि त्रीणि ॥

इन्द्रस्य स्यूरसीत्यादीनि त्रीण्येन्द्राणि इन्द्रदेवत्यानि । प्रथमा दैवीपङ्क्तिः सीवने विनियोगः । द्वितीया यजुर्गायत्री । अभिकरणे विनियोगः । ऐन्द्रमसे । दैवीबृहती । निखिताभिमर्शने विनियोगः ॥

चतुर्थं वैश्वदेवम् ॥

चतुर्थं वैश्वदेवमसीत्येतद्यजुर्वैश्वदेवदेवतं । यजुर्गायत्र्याग्नीध्राभिमर्शने विनियोगः ॥ २० ॥

विभूरस्यष्टानां त्रिष्ण्वग्नयः ॥ (१)

विभूरसि प्रवाहणइत्यादिध्रुव्यूरसीत्यन्तानामष्टानां यजुषां त्रिष्ण्वग्नयो देवताः । विभूः प्राजापत्या गायत्री आग्नीध्रीये पुरोनिवापे विनियोगः । वह्निः यजुर्बृहती हौत्रत्रिष्ण्वे पुरोनिवापे विनियोगः । स्वाधोऽसि । यजुर्गायत्री । तुथोऽसि दैवीजगती । उग्निगसि यजुर्गायत्री । अङ्घारिः । प्राजापत्यागायत्री । अवस्यूर्गायत्र्येव । ध्रुव्यूः गायत्री । सर्वेषां पुरोनिर्वापे विनियोगः ॥

सम्राडाहवनीयः ॥

सम्राडसीत्याहवनीयो देवता । दैवीजगती । आहवनीयेज्यधे विनियोगः ॥

---

(१) एतस्य सूत्रस्य खण्डस्यास्मे काण्वसर्वानुक्रमे "ऋतधामादुम्बरी समुद्रोऽसि-ब्रह्मासनमोजोऽसि शालाद्वार्योऽसि प्राजहितः । अयं पाठो माध्यन्दिनसर्वानुक्रमे-सूत्रखण्डचतुष्टयास्मे पूर्वापरीभावेन वर्त्तते ॥

परिधयो वह्निध्यमानदेवः ॥

परिधयोऽसीत्यस्य वह्निध्यमानदेवो देवता । यजुर्बृहतीछन्दः वह्निध्यमानदेवतायै विनियोगः ॥

नभोऽसि चात्वालः ॥

नभोऽसि प्रतरणस्य चात्वालो देवता । यजुर्गायत्री । चात्वालदेवतायै विनियोगः ।

मृष्टऽसि शामित्रः ॥ (१)

मृष्टऽसीत्यस्य शामित्रो देवता । प्राजापत्या गायत्री । शामित्रदेवतायै विनियोगः ॥

ऋतधामोदुम्बरी ॥

ऋतधामासीत्यस्योदुम्बरी देवता । प्राजापत्या गायत्री । औदुम्बरीदेवतायै विनियोगः ॥

समुद्रोऽसि ब्रह्मासनम् ॥

समुद्रोऽसीत्यस्य ब्रह्मासनन्देवता । प्राजापत्या गायत्री । ब्रह्मासनदेवतायै विनियोगः ॥

अजोऽसि शालाद्वार्यः ॥

अजोऽस्येकपादित्यस्य शालाद्वार्यो देवता । दैवीपङ्क्तिः शालाद्वारदेवतायै विनियोगः ॥

अद्भिरसि प्राजहितः ॥

अद्भिरसीत्यस्य प्राजहितोदेवता । यजुर्गायत्री प्राजहितदेवतायै विनियोगः । समूढोऽसि विश्ववेदाऽतिमूढोऽस्य ऋग्गायत्रीछन्दः

---

(१) समूढोऽस्युकरः । इति काण्वसर्वानुक्रमेऽधिकः पाठो मन्त्रस्यच "समूढोऽसि विश्ववेदाऽनातिरिक्तस्य प्रतिष्ठा" भाष्ये लिखितः ॥

उत्तरो देवता [illegible] विनियोगः ॥

वागसि सदः ॥

वागसीत्यस्य सदोदेवता । यजुर्बृहती सदोऽभिमर्शने विनियोगः ॥

ऋतस्य द्वार्ये ॥

ऋतस्य द्वारावित्यस्य द्वार्ये देवता । यजुः पङ्क्तिः । १० द्वार्यो-रभिमर्शने विनियोगः ॥

अदृध्वनार्ठ० सूर्यः ॥

अध्वनामित्यस्य सूर्यो देवता । सूर्याभिमन्त्रणे विनियोगः ॥

व्यूहेन सप्तजगती ॥ २४ ॥

मित्रस्यर्त्विजः ॥

मित्रस्य मेत्यस्यर्त्विजो देवता यजुर्बृहती ॥ १ ॥ मित्रस्याभिम-न्त्रणे विनियोगः ॥ २१ ॥

ज्योतिरसि वैश्वदेवम् ॥

ज्योतिरसि विश्वरूपमित्येतद्यजुर्विश्वदेवदेवतं । प्राजापत्यानु-ष्टुप् ॥ १६ ॥

पृषदाज्यग्रहणे विनियोगः ॥

त्वर्ठ० सोमक्रतुर्भार्गवः सोमीं गायत्रीमनवसा-नाम् ।

त्वर्ठ० सोमेत्येतामृचं सोमदेवत्यां गायत्रीछन्दस्कामनवसानां अवसानरहितां भृगोः पुत्रः क्रतुः सञ्ज्ञकऋषिरपश्यत् । पदोत्तेऽग्नौ-धरिधेमि विनियोगः । अत्र प्रथमः पाद. समाक्षरः द्वितीयो व्यूहेना-ष्टाक्षर इत्येकोना । स्वाहाकारस्तु पृथग्यजुः ॥

जुषाणोऽअग्नुदेवत्यैकपदा विराड्यजुरन्ता ।

सुवाद्यो यस्मिंस्तेषां विराडेकपदा । दशाक्षरैकपदेत्यर्थः । अक्षरान्ते यस्याः सा यजुरन्ता । अस्या अन्ते स्वाहाकारे यजुः इत्यनेनैव द्वितीयाहुतिहोमे विनियोगः ॥

अग्नेनयागस्त्य ऽआग्नेयीं त्रिष्टुभम् ॥

अग्ने नय सुपथेतीमामृचं अग्निदेवतात्रिष्टुभं अगस्त्यऋषिरपश्यत् । अत्र तृतीयपादे व्यूहेनैकादशाक्षरपूरणं । आग्नेये विनियोगः ॥

अयं नस्त्रिष्ट्यजुरन्ताग्नेयी ॥

अयं नोऽग्निरित्येषा त्रिष्टुबग्निदेवता । आग्नीध्रीये वैसर्जनिहोमे विनियोगः, स्वाहाकारान्तं यजुः । व्यूहेनछन्दः पूर्तिः ।

उरु विष्णो वैष्ण्यनुष्टुब्यजुरन्ता ।

उरु विष्णो इत्यस्य विष्णुर्देवता अनुष्टुप्छन्दः । यजुरन्ता । स्वाहाकारान्ता । आहवनीये वैसर्जनिहोमे विनियोगः । व्यूहेन छन्दः पूरणम् ॥

देव सवितः सावित्रम् ॥

देव सवितरेषते सोमइत्येतद्यजुः सवितृदेवतं गायत्रीछन्दः । हविर्धाने सोमनिधाने विनियोगः ॥

एतत्त्वꣳ सौम्यम् ।

एतत्त्वं सोमेत्येतद्यजुः । सोमोदेवता प्राजापत्यात्रिष्टुप् । विसृज्योपस्थाने विनियोगः ॥

स्वाहा निर्ऋतयेत्येतन्नैर्ऋतदेवतम् । यजुस्त्रिष्टुप्छन्दः विद्यार्थाभिचारकर्मणि विनियोगः ।

अग्ने व्रतपा ऽआग्नेयम् ।

अग्ने व्रतपा इत्येतदग्निदेवतम्। [illegible]। व्यूहेन षट्पदस्त्रिष्टुप्। प्राजापत्या त्रिष्टुप्।

अश्वत्थाम्बनस्पतिः।

अत्त्वन्यौ २॥ अगादित्यस्य वनस्पतिर्देवता। व्यूहेनातिजगती। यूपाभिमर्शने यूपाभिमन्त्रणे वा विनियोगः।

ओषधे कुमतघ्नम्॥

ओषधे त्रायस्वेत्यस्य कुमतघ्नं देवता। आसुर्यनुष्टुप्। कुमतघ्नान्तर्धाने विनियोगः।

स्वधिते परशुः।

स्वधितइत्यस्य परशुर्देवता। देवीजगती। प्रहरणे विनियोगः।

द्यावाऽतस्त्वंबनस्पतिः। (१)

द्यां मा लेखीरतस्त्वं देवएतयोर्वनस्पतिर्देवता द्यां मेत्यस्य एको मा ऋषी पङ्क्तिः। यजतोऽभिमन्त्रणे विनियोगः। अतस्त्वं। ऋग्बृहती। स्वाधो होमे विनियोगः। २२।

अग्नेर्धीः शकलम्।

अग्नेर्धीरसीत्यस्य शकलं देवता। एकाधिका सामत्रिष्टुप्। प्रथमशकलप्रक्षेपणे प्रासने विनियोगः।

देवस्त्वा यूपः।

देवस्त्वा सवितेत्यस्य यूपोदेवता। यूपाञ्जने विनियोगः। यजुः पङ्क्तिः।

सुपिप्पलाभ्यश्चषालम्।

सुपिप्पलाभ्यइत्यस्य चषालं देवता। याजुषी बृहती चषालप्रमोक्षणे विनियोगः।

---

(१) दिवम्मा इति काण्वसर्वानुक्रमपाठो बोध्यः॥

श्यामश्चेषो यूपः । (१)

श्यामश्चेषित्यस्य यूपो देवता व्यूहेनसामजगती यूपोच्छ्रयणे विनियोगः ।

या ते दीर्घतमा यूपदेवत्या त्रिष्टुभम् ॥ 3

या ते श्यामाग्ग्रसोतेमामूर्जं यूपदेवत्यां त्रिष्टुप्छन्दस्कां दीर्घतमा ऋषिरपश्यत् । अत्र प्रथमपादस्य व्यूहेन पूरणम् । पञ्चावट-द्यन्ते प्रवर्ग्ये विनियोगोऽस्याः ।

ब्रह्मवनि ब्रह्म दृंꣳह यूपदेवत्ये ।

ब्रह्मवनिर्यूपो देवता । ब्रह्मवनि त्वा एकोनविंशत्यक्षरत्वादेकाधिका महापङ्क्तयो एकोना सामयजुषी । पांक्तभिः पर्यूहने विनियुक्ता । ब्रह्म दृंꣳह त्वा आर्ष्टी गायत्री पर्यूहने विनियोगः ।

विष्णोः कर्माणि द्वे मेधातिथिर्वैष्णव्यौ गायत्र्यौ । ४

विष्णोः कर्माणि तद्विष्णो रराटमसि द्वे ऋचौ विष्णुदेवते गायत्र्यौ मेधातिथिर्ऋषिरपश्यत् । आद्ये उभयोर्विनियोगः । प्रथमायामन्त्यः समाक्षरः । तेनैकोना ।

परिवीर्यूपः ।

परिवी रित्यस्य यजुषो यूपो देवता । प्राजापत्यात्रिष्टुप् । परिव्यूहने विनियोगः ।

दिवः स्वरुः ।

दिवः सूनुरित्यस्य स्वरुर्देवता यजुर्गायत्री । स्वर्वसमूहने विनियोगः ।

एष ते यूपः ।

एष ते पृथिव्यामित्यस्य यूपो देवता । सामो ष्णिक् ॥ यूपैकादशि-

(१) दिवमग्नेण इत्यपि काण्वसर्वानुक्रमसूत्रम् ॥

ग्यां दादशभ्योपयमनमन्त्रकबृपस्य बन्धेऽवा इत्यिकतो मूलो विनि-योगः ।

उपवीरसौत्यम् ।

उपावीरसौत्यस्य तृणं देवता देवीपङ्क्तिः तृणादाने विनियोगः ।

उपदेवाँ ल्लिङ्गोक्तम् ।

उपदेवां देवीरित्येतद्यजुर्लिङ्गोक्तदेवतम् । पशवोदेवताः । त्वष्टा-चेत्यर्थः । एकोनत्रिंशदक्षरत्वादेकाधिका ऋचां पङ्क्तिः । एकोना प्राजापत्या जगती वा तृणेन पशुसर्जने विनियोगः ।

ऋतस्य त्वा पशुः ।

ऋतस्य त्वा देवहविरित्यस्य पशुर्देवता । ऋगुष्णिक् । पशोरन्त-रा शृङ्गबन्धने विनियोगः । (१)

अग्नीषोमाभ्यां लिंगोक्तम् ।

अग्नीषोमाभ्यां जुष्टमित्येतद्यजुर्लिङ्गोक्तदेवतम् । अग्नीषोमदेवत-मित्यर्थः । यजुस्त्रिष्टुप् रूपे पशुबन्धने विनियोगः ।

अद्भ्यस्त्वौषधीभ्यो ऽपां पशुः ।

अद्भ्यस्त्वौषधीभ्यः, अपां पेरुरित्यनयोः पशुर्देवता । अद्भ्यः आर्षी पङ्क्तिः पशुरोचने विनियोगः । अपां पेरुः प्राजापत्या बृहती । आप्योपयमने विनियोगः ।

आपो देवीरापम् ॥

आपो देवीः स्वदंत्वित्येतद्देवतं । पशोरधस्तादुपोक्षणे विनियोगः । आसुरी गायत्री ।

मन्ने पशुः ।

(१) देवस्य त्वेत्यस्य प्रजापतेः सवितार्देवता प्राजापत्या बृहती छन्दः पशोर्यू-पे बन्धने विनियोगः इति पद्धत्या, पाठोऽधिको बोध्यः ॥

सवे प्राणदात्रादीनां त्रयाणां पशुर्देवता । पशुसमज्ञने विनियोगः । तत्र सवे प्राणः । वसुः पङ्क्तिः पशुलक्षाटाञ्जने, समङ्गाग्नि । देवीजगती । पशुत्रयोरञ्जने । अँय्यज्ञपतिः प्राजापत्या गायत्री पशुग्रीवाञ्जने ।

घृते न स्वरुग्रासौ । ६-

घृतेनाक्तौ पशू नित्यस्य स्वरुग्रासौदेवते यजुर्बृहती । अग्नि स्वरुभ्यां पशुलक्षाटौषधाभ्यामञ्जने विनियोगः ।

देवति वाक् ।

देवति यजमानदित्यस्य वाग्देवता । ब्राह्मीउष्णिक् । यजमानवाक्ञ्जने विनियोगः ।

वर्षो तृणम् ।

वर्षो वर्षीयसीत्यस्य तृणं देवता आसुर्यनुष्टुप् । ग्रामिचस्य पशोस्तृणमक्षणे विनियोगः ।

स्वाहा देवे । -

स्वाहा देवेभ्यो देवेभ्य स्वाहेत्येते यजुषी देवे देवदेवत्ये । देवीपङ्क्तिः । परिप्लवाहुतिहोमे विनियोगः ॥ २३ ॥

माऽहिर्भूरज्जुः । ६-

माऽहिर्भूरित्यस्य रज्जुर्देवता । देवीजगती । पशुत्रयोजन्याबालाले बन्धने विनियोगः ॥

नमस्ते यज्ञाः ।

नमस्ऽआतानेत्यस्य यज्ञो देवता पशुवाक्ञने विनियोगः । साम्नीजगती ॥

देवीरापोऽपृथमापमपृथमाशीः । ६- १

देवीरापः इत्यस्य पूर्वार्धस्याप्यं पत्न्यापो देवताः उत्तरार्धस्या-
द्भ्यो देवताः एकादश, ऋचां पङ्क्तिः यज्ञोपवीतमन्त्रे विनियोगः ।

२५ वाचस्ते मनसे प्रभुः ।

वाचस्ते मनसे इत्यादीनां मनस्त आप्यायतामित्यादीनां च
प्रभृदेवता । पशोः प्राणसंस्कारे विनियोगः । आद्याः सप्त यजुर्गायत्र्यः
अष्टमी यजुरनुष्टुप् । मनसो यजुरनुष्टुप् । वाचो यजुर्गायत्री ।
प्राणस्तद्वत इतरो यजुरनुष्टुप्, यत्ते क्रूरं साम त्रिष्टुप्, मनस्तदित्या-
दीनामन्त्यर्चो यजमानयोरनुलेपने विनियोगः ।

शं लिङ्गोक्तम् । (१)

शमहोभ्यस्त्वेत लिङ्गोक्तदेवतं । सुखदेवता । देवी बृहती । पांसु-
जनीयेषु पशोः पुच्छटेशे विनियोगः

ओषधे तृणम् ।

ओषधे त्रायस्वेत्यस्य तृण देवता । कुशतरुणांतर्धाने विनियोगः-
यजुर्गायत्री ।

स्वधितेऽसिः ।

स्वधिते मैनमित्यस्यासिर्देवता दैवीजगती । अभिमंत्रणे वि-
नियोगः ।

रक्षसां लिङ्गोक्तम् ।

रक्षसामित्येतल्लिङ्गोक्तं । रक्षोदेवतमित्यर्थः । यजुर्गायत्री । खोखि-
लेन तृणांजने विनियोगः ।

निरस्तमिद्महं रक्षोऽधी ।

निरस्तंठ० रक्षदमहं रक्षइत्येते द्वे यजुषी रक्षोघ्नी । रक्षसो

(१) श महोभ्यो लिङ्गोक्तमिति काण्डसर्वानुक्रमणाठः ।

[illegible] + रक्षोदेवते । निरस्तं वैदीमङ्क्तः । [illegible] स्रोवारे मार्जने विनियोगः । इदमह । व्यूहेन प्राजापत्या जगती । मार्जनमन्त्रस्य तृचाभिषिक्तहोमे विनियोगः ।

घृतेन द्यावापृथिव्यम् ।

घृतेन द्यावापृथिवीत्येतद्द्यावापृथिवीदेवतं । मौक्षणे विनियुक्तं । यजुर्जगती ।

वायो वायव्यम् ॥

वायो वेरित्येतद्यजुर्वायुदेवत्यं । यजुर्गायत्री । आहवनीये तूष्णीं प्रासने विनियोगः ।

अग्निराज्यस्थानेयम् ।

अग्निराज्यस्थेत्येतदग्निदेवतं यजुर्बृहती । वपाभिघारणे विनियोगः ।

स्वाहाकृते वपाश्रपण्यौ ।

स्वाहाकृते ऊर्ध्वनभसमित्यस्य वपाश्रपण्यौ देवते । आसुरीगायत्री । वपाश्रपण्योरनुप्रासने विनियोगः ।

इदमापऽप्रायी महापङ्क्तिः स्रुग्यवसाना । (१)

इदमापः प्रवहतेतीयमृक्प्रायी अद्देवत्या । स्रुग्यवसाना स्रुग्निष्ठावसानं यस्याः सा स्रुग्यवसाना यस्या महापङ्क्तिस्कन्दः यस्याः अष्टाक्षरा षड्दशापि महापङ्क्तिः, "षडष्टका वा महापङ्क्तिरित्युक्तत्वात् ॥ पावमानस्यान्त्यः पादः, इदमापइत्यस्यां ऋचः पादः पावमानसञ्ज्ञकः पवमानस्य मुच्चित्यं मार्जने विनियोगइदमापइत्यस्याः ।

सन्ने हृदयम् ।

---

(१) अस्यसर्वानुक्रमेऽयं पाठो नास्ति चात्रास्मे वक्ष्यते ॥

[illegible] अग्नहृदयञ्च हृदयं देवता । प्राजापत्यानुष्टुप् । [illegible] विनियोगः ।

रेवसि वसा ।

रेवत्यन्निहोत्रञ्च वसादेवता । ऋचां पङ्क्तिः वसाहोमे विनियोगः ।

प्रयुतं लिङ्गोक्तम् ।

प्रयुतं देवहूत्येतद्यजुर्लिङ्गोक्तदेवतं । देवएव देवतेत्यर्थे । देवीपङ्क्तिः । घृतवत्यर्योर्मिश्रणे विनियोगः ॥

हुतं वैश्वदेवम् ।

घृतं घृतपावानइत्येतद्वैश्वदेवदेवतं ॥ ऋचां पङ्क्तिः वसाहोमे विनियोगः ॥

दिग्भ्यः पञ्चदिग्द्यानि ।

दिग्भ्यः प्रदिग्भ्यइत्यादीनि षड्यजूंषि दिग्भ्यो देवतानि । दिग्द्याहारे विनियुक्तानि । स्वाहाकारः सर्वत्र साक्षाद्भूतत्वादिति प्रत्येकं स्वाहाकारस्यानुषङ्गात् ॥ प्रथमषष्ठे दैवीहूतती । अन्त्येयं चतुर्थी दैवीपङ्क्तिः ।

ऐन्द्रः प्राणः पञ्चङ्गप्राणदानं लिङ्गोक्तम् ॥

ऐन्द्रः प्राणइत्येतद्यजुः पञ्चङ्गप्राणदायकं । लिङ्गोक्तदेवतं । प्राणदानदेवतम् । एकाधिका सामविष्टुप् । पशुसंज्ञपने विनियोगः ।

देव त्वाष्ट्री विष्टुप् ॥२४॥

देव त्वष्टरिति द्वयङ्गत्वष्टृदेवता विष्टुप्छन्दस्का । पशुसंज्ञपनङ्ग विनियुक्ता ॥ २५ ॥

समुद्रं लिङ्गोक्तानि(१)द्वादश ।

(१) लिङ्गोक्तदेवतानि इति काण्वसर्वानुक्रमपाठः ॥

[illegible] खादैत्यारभ्य मनोमे हार्दि यच्चेत्यन्तानि [illegible] मन्त्रस्य विश्वेदेवता आदि । समुद्रान्तरिक्षादिदेवतानि । तेषां चक्षिर्भोजनत्वात् । [illegible] मनोमहत्यस्य मुखविमार्जने । समुद्रदेवीजगती । अन्तरिक्षं प्राणापत्यागायत्री । देवं यजुः पङ्क्तिः, मित्रावरुणौ यजुर्वृहती । अहोरात्रे प्राणापत्यागायत्री, छन्दाएसि देवीजगती । आपो । यजुर्वृहती । यज्ञं । यजुर्गायत्री । सोमं । यजुर्गायत्री, दिवं । प्राणापत्या गायत्री । अग्निं । यजुः पङ्क्तिः ।

मनो मे । देवीजगती ।

दिवन्तोखक् ।

दिवं ते धूमदत्यस्य [illegible] । [illegible] । [illegible] मे विनियोगः ।

माऽपो हृदयशूलम् ।

माऽपो ओषधीरित्यस्य हृदयशूलदेवता यजुरुक्तिक्" । शीतमूत्रोत्सर्गाया शुगसि तमभिशोचेति सोऽस्यान्वेष्टुं यं च वयं द्विष्म" इत्यस्याः । हृदयशूलदेवता । शुष्काद्रेसत्यौ हृदयशूलोपशूलमूत्रमे विनियोगयजमानयोः

धाम्नोधाम्नो वाकृतम् ।

सामबृहतीछन्दः धाम्नोधाम्नस्त्वेतयजुर्वचनदेवतम् । सामोक्तिक् । हृदयशूलोपशूलमूत्रएव विनियोगः ।

यदाऽऽहुर्व्यावर्तीयमृक् ।

यदाहुरित्यावर्तीयमृक् । वचनदेवत्या गायत्रीछन्दस्का अवसाना । अवसानदर्शिता । अथ प्रथमः शमाचरः संनेयमेकोना । हृदयशूलोपशूलमूत्रएव विनियुक्ता ।

सुमित्रिया नऽआपऽओषधयः ।(१)

सुमित्रिया नऽइत्येतद्यजुरब्देवतं । आसुर्यनुष्टुप् । अथासुक्यर्क्सामनोऽभिमन्त्रणे वा विनियुक्ता ।

इषिमतोर्लिङ्गोक्तदेवताऽनुष्टुप् ।

इषिमतोरिमाऽतीयसूक् लिङ्गोक्तदेवता अग्न्यादिदेवतेत्यर्थः । अस्या अनुष्टुप्छन्दः । वसतीवरीणां ग्रहणे विनियोगः ।

ऊर्ग्नेर्वैश्वत्वार्यापानि ।

ऊर्ग्नेर्वैश्वइत्यादीनि चत्वारि यजूंष्यग्निदेवतानि ऊर्ग्नेर्वैश्वइत्यस्य प्रासङ्गीगायत्री वसतीवरीणां प्रणीताद्यर्थमपरेण निधाने विनियोगः, इन्द्राग्न्योः प्राजापत्यागायत्री । दक्षिणस्यामुत्तरवेदीश्रोणौ निधाने विनियोगः, उत्तरस्याश्रोणौ वा मित्रावरुणयोर्यजुस्त्रिष्टुप् । उत्तरस्यामुत्तरवेदिश्रोण्योर्वसतीवरीनिधाने विनियोगः विश्वेषां यजुस्त्रिष्टुप् । आग्नीध्रे वसतीवरीनिधाने विनियोगः ।

अमूर्याइतीमामन्त्रदेवतां गायत्रीछन्दस्कां मेधातिथिर्ऋषिरपश्यत् । इयं पादनिचृद्गायत्री । त्रयाणामपि पादानां समानत्वात् । "त्रय समका पादनिचृदिति वचनात्" । आग्नीध्रे वसतीवरीनिधानेएव विनियोगः ॥

हृदे सौम्यनुष्टुप् ॥

हृदे त्वा मनस त्वेतायसूक् सोमदेवत्यानुष्टुप् । व्यूढेन छन्दः पूर्त्तेः सोमोपाहरणे विनियोगः ।

सोम राजन्त्सौम्ये (१)

(१)इदमापऽआप्यनुष्टुप् । इति काण्वसर्वानुक्रमेऽधिकः पाठः ॥

(१) हृदे त्वा सोम राजन्विश्वास्त्वाप्य सौम्यानि इति काण्वसर्वानुक्रमः ॥

सोम राजन्विद्मास्त्वं, विद्मास्त्वां प्रजाश्चेति यजुषी सोमदेवत्ये। सोम राजन्, सामोचिक, सोमोपाहरमन्त्रय, विनियोगः । विद्मा त्वां । यजुश्चिष्टुप । विद्मृत्योपस्थाने विनियोगः ।

शृणोत्वग्निरितीयमृक्लिङ्गोक्तदेवता त्रिष्टुप् ।

शृणोत्वग्निरितीयमृक्लिङ्गोक्तदेवता अग्न्याधिषवणादेवमभिलिङ्गदेवतेत्यर्थः । अस्या त्रिष्टुप्छन्दः । चतुर्गृहीतहोमे विनियोगः । व्यूहेन प्रथमद्वितीयपादयोरेकादशाक्षरत्वम् ।

देवीरापऽआपो पङ्क्तिः । (२)

देवीरापो अपां नपादित्यमृक् अप्देवता । पङ्क्तिश्छन्दस्का । चत्वारिंशदक्षरा पञ्चपदा पङ्क्तिः । अष्टाक्षरः पादः प्रथमतृतीयाष्टाक्षरा चतुर्थपञ्चमी नवाक्षरी तेनैवाधिका ।

इयमाप्यपि ङित्त्वेन वा ।

पादानामनियताक्षरत्वात् । स्वाहाकारः पृथग्यजुः अप्सु चतुर्गृहीतहोमे विनियोगः ।

कार्षिराज्यमनुष्टुप्समुद्रस्य समापऽआपे ।

कार्षिरसीत्यस्यामनुष्टुभि कार्षिरसीत्यक्षरचतुष्टयस्याज्यं देवता ततः समुद्रस्य त्वा क्षित्या उन्नयामीत्यस्य समापश्चस्याप्यो देवताः ॥ कार्षिरसीत्यादीनां चतुर्णां मिलितानामनुष्टुप्छन्दः । आद्यार्धस्य व्यूहेन पूर्तिः । कार्षिरसीत्यस्य मैत्रावरुणचमसेनाज्याप्योक्षणे विनियोगः, समुद्रस्य त्वेत्यस्या यक्ष्णि । समापइति मैत्रावरुणचमसवसतीवर्योः परस्परस्योक्षणे । इतरेतरव्यत्ययेनयजेर्वा ।

यज्ञने मधुच्छन्दा आग्नेयीं गायत्रीम् । (१)

(१) चतुर्गृहीता यजुरन्ता । इत्याधकः पाठः काण्वसर्वानुक्रमे ॥

अग्नये पृथिवीसदेतां चतुर्देवत्यां गायत्रीं मधुच्छन्दाऋषिरित्यन्त-
त् । प्रवरचीसंज्ञपहोमे तदभावे चतुर्गृहीतहोमे विनियोगोऽभि-
होमे । चक्षुषे प्रथमपरिधालम्भे । पांक्तयेनि रराट्यालम्भे । अ-
रायै छदिरालम्भे । अथाद्यः प्राद्यः । सप्ताक्षरः । तेनैकोना ।

आदद्दे ग्रावा ।

आदद्दे रावासीत्यस्य ग्रावा देवता । आदत्तादाने विनियोगः ।
आर्षीपङ्क्तिः ।

निग्राभ्याऽग्रापम् ।

निग्राभ्याखेत्येतद्यजुरापः । अप्देवतं । व्यूहेन प्रकृतिश्छन्दः ।
निग्राभ्यासु वाचने विनियोगः ।

इन्द्राय त्वा पञ्च मौष्यानि ।

इन्द्राय त्वा वसुमतइत्यादीनि पञ्चयजूंषि सौमदेवत्यानि । सौम-
माने विनियुक्तानि । इन्द्राय त्वा यजुश्चतुष्पदा । द्वितीया यजुरनुष्टु-
प् । तृतीयापि सैव चतुर्थी यजुरनुष्टुप् । पञ्चमी यजुर्बृहती ।

यत्ते सौमी विपरीता बृहती ।

यत्ते सोम दिवीतीयमृक् सोमदेवत्या । विपरीता बृहतीत्यस्याः
प्रथमतृतीयौ पादावष्टाक्षरौ द्वितीयचतुर्थौ द्वादशाक्षरौ सा विप-
रीता बृहती । यज्ञो वै विपरीतेत्युक्तेः, मित्रालम्भने विनियोगः ।
व्यूहेनाद्योभयोर्द्वादशाक्षरपूर्त्तिः । तेनास्येयजमानायेति तृतीयः
पादः । उद्वरायद्यत्यादि चतुर्थो द्वादशाक्षरः ।

ग्रावाः पथ्याबृहती ।

ग्रावाणस्थ हवतरइत्यस्याः पथ्याबृहतीछन्दो निग्राभ्या देवताः

---

(१) यजुरन्तानि यत्रिक. पाठ. काण्वसर्वानुक्रमे ॥

[illegible] । अष्टावृतीयः पादो द्वादशाक्षरः अन्ये त्रयोऽष्टाक्षराः सा प्रथमावृहती, प्रथमपूर्वेत्यृतीयवस्तुतः, द्वाभ्यामभिधेयम् ।

माभेः सौम्यमर्धं द्यावापृथिव्यमर्धम् ।

मा मैमा स सौम्यमर्धं सोमदेवत्यं । अर्धं द्यावापृथिवीदेवत्यं द्यावापृथिवीभ्यां ग्रहाभ्यां विनियोगः । ऋचौ त्रिष्टुप् ।

प्रागपाक् सौव्युष्णिक् ।

प्रागपागित्येषा ऋक्सौमी सोमदेवत्या उष्णिक्छन्दस्का अग्निष्टोमे विनियोगः । षड्विंशत्यक्षरेयमार्षी उष्णिक्पादान्, अनिवताक्षरत्वात् ।

त्वमङ्ग गोतमऽऐन्द्रीं प्रथ्यावृहतीम् ॥२५॥

प्रथ्यापूर्वेत्यृतीयवृति । अत्र प्रथमद्वितीयौ समानाक्षरौ तृतीयो द्वादशाक्षरः चतुर्थोऽष्टाक्षरः । तेन द्वाभ्यामूनावृहती ॥ निग्रभवाक्षरत्वाच्च वि वै नर्याणः ॥ २५ ॥

वाचस्पतये प्राणदेवत्या विराट् ॥ (१)

वाचस्पतयइत्येषा प्राणदेवत्या विराट्छन्दस्का । नव वैराजयोर्द्वयोर्नवाक्षरचरणेत्येषा नवाक्षरा विराट् । अत्र प्रथमः पादोऽष्टाक्षरः द्वितीयो द्वादशाक्षरः । तृतीयस्त्रयोदशाक्षरवृति । तेन एकोना सप्तांशुग्रहस्य प्रथमद्वितीये ग्रहे पूर्वोत्तरार्धयोः क्रमेण विनियोगः ॥

मधुमतीर्लिङ्गोक्तम् ।

मधुमतीरित्येतल्लिङ्गोक्तदेवतं । पूर्वोक्तः प्राणएवोपांशुग्रहरूपोऽत्र देवता । „प्राणो ह वा अस्योपांशुरिति श्रुतेः" । अत्र देवतमिति मन्त्रभाष्ये । बृहती । उपांशुग्रहस्य तृतीये ग्रहे विनियो-

(१) प्राणदेवत्ये एतावानेव काण्वसर्वानुक्रमणाहः ॥

गः ।

यत्ते सौम्यम् ।

यत्ते सोमादाभ्यमित्येतत्सोमदेवतं । पङ्क्तिश्छन्दः । आज्यमंशू वा सोमे प्रक्षेपे विनियोगः ।

स्वाङ्कृत यजुषी लिङ्गोक्ते ।

स्वाङ्कृतेत्युवन्तरिक्षमितीमे । यजुषी लिङ्गोक्तदेवते स्वाहाकारस्याग्नेरिति वक्ष्यमाणत्वात्स्वाहाकारस्याग्निर्देवता । उर्वन्तरिक्षमिति रक्षोदेवतमिति प्रागुक्तं । स्वाङ्कृत्यस्योष्णिक्छन्दो उक्षाग्नौ विनियोगः ॥ उर्वन्तरिक्षमित्यस्य प्राजापत्यागायत्री लिङ्गोक्तमंत्रे विनियोगः ।

स्वाङ्कृतोऽस्युपांशुः ।

स्वाङ्कृतोऽसीत्यस्योपांशुर्देवता । व्यूहेन द्वात्रिंशदक्षरा प्राजापत्याजगती । उपांशुग्रहः होमे विनियोगः ।

देवेभ्यस्त्वा दैवम् ।

देवेभ्यस्त्वा मरीचिपेभ्यइत्येतद्देवदेवतं पात्रीकपमार्जने विनियुक्तम् । यजुर्बृहती ।

देवाष्ठ्यो लिङ्गोक्तमाभिचारिकम् ।

देवाष्ठ्यो यज्ञे खेडेतेत्येतल्लिङ्गोक्तदेवतं । सोमांशुदेवतमित्यर्थः । तथा आभिचारिकं । अभिचारसाधकमिदं यजुः सामचिष्टुप् । वामउरोबाहुषु श्लिष्टानां सोमांशूनां होमे विनियोगः ।

प्राणाय ग्रहः ।

प्राणाय त्वेत्यस्य ग्रहोदेवता । देवीबृहती । उपांशुपात्रासादने विनियोगः ।

व्यानायोपांशुसवनः ।

आवाय त्वेत्यस्योपांशुसवनो देवता। दैवीबृहती उपयामगृहीतस्यात्मने विनियोगः।

उपयामगृहीतोऽस्यंतर्यज्ञमवविद्येतदैन्द्रमिन्द्रदेवतं। प्राजापत्यात्रिष्टुप्। अन्तर्यामगृह्ये विनियोगः।

अन्तस्ते मवदेवत्या त्रिष्टुदुदायाय ग्रहः।

अन्तस्ते द्यावापृथिवीतीयस्यक् मवदेवत्या त्रिष्टुप्छन्दस्का अन्तर्यामगृहणस्य विनियोगः द्वितीयपादे व्यूहेनाक्षरपूरणं। उदायाय गृहः। उदायायत्वेत्यस्य ग्रहो देवता दैवीपङ्क्तिः अन्तर्यामग्रहणात्मने विनियोगः।

आवायो वसिष्ठो वायव्यां त्रिष्टुभम्।

आवायो भूषतीमामस्य वायुदेवत्यां त्रिष्टुभं वसिष्ठोऽपश्यत्। ऐन्द्रवायवग्रहे विनियोगः।

तृतीयो दशाक्षरः। तनैकोना। वायवे स्थेति यजुः देवीबृहती। ऐन्द्रवायवग्रहणस्य विनियोगः।

इन्द्रवायू मधुच्छन्दा ऐन्द्रावायवीं गायत्रीम्।

इन्द्रवायूमे इतीमामस्य इन्द्रवायुदेवत्यां गायत्रीछन्दस्कां मधुच्छन्दसऋषिरपश्यत्। उपयामगृहीतइतियजुः व्यूहेन ऋग्गायत्री। अपगृह्य पुनरैन्द्रवायवग्रहे विनियोगः। अन्ते एव ते योनिरिति यजुरुक्तिः। ग्रहासादने विनियोगः।

अयं वां गृत्समदो मैत्रावरुणीम्।

गायत्रीमित्यनुवर्त्तते। अयं वां मित्रावरुणीतीमामस्य मित्रावरुणदेवतां गायत्रीछन्दस्कां गृत्समदऋषिरपश्यत् अन्ते यजुरासुरी गायत्री। मैत्रावरुणग्रहे विनियोगः॥

दाधा वयमू ब्रह्मदक्षक्षिष्टुभम् ॥

दाधा वयमितीमामृचं त्रिष्टुभम् ब्रह्मदक्षक्षत्रियब्रह्मत्। मैत्रावरुणीमित्यनुवर्तते । यज्ञस्य त्वेति ब्रह्मणे विनियोगः । अथ। अतो देवमे योनिरिति मनुः । मनुः पङ्क्तिः साधने विनियोगः ॥

या वां मेधातिथिराश्विनीं गायत्रीम् ॥

या वां कशा इतीमामृचं आश्विनीं पङ्क्तिदेवत्यां गायत्रीछन्दस्कां मेधातिथिराश्विनीं गायत्रीं । या वां कशाऽऽङ्गिरसत् उपधाम । मनुष्टिष्टुप् । आश्विनमन्त्रे विनियोगः । एष त इति मनुर्वृष्णो साधने विनियोगः । अत्र मनुषां प्रजापतिरेव साधारणऋषिः ऋषिविशेषस्य मन्त्रसम्बन्धेनैवोक्तत्वात् ॥

तम् प्रत्यथा वसारः काश्यपो वैश्वदेवीं जागतीम् ॥

तं प्रत्यैतीमामृचं विश्वे देवदेवतां जगतीं काश्यपस्य पुत्रो वसारऋषिरपश्यत् । अष्टाचत्वारिंशदक्षरा द्वादशाक्षरचतुष्पादा जगती शुक्रामन्थिनोर्ग्रहा विनियोगः द्वितीयपादे व्यूहः । एकोना वा । उपयामेतीमामृग्वेदी यजुर्जगती वा (१) एष त इति मनुः पङ्क्तिः साधने विनियोगः अत्र शुक्रामन्थिग्रहचारकालीनमन्त्राणां सहैव देवतादिकं संहितापाठक्रममनुसृत्य अपसृष्टः ग्रहदृत्याधिष्ठानमसीत्यन्त्रावयवेन परित्यज्याध्वर्यवेत्यादीनामाह ।

अध्वर्यवस्य सौम्यम् ॥

अध्वर्यवस्य तऽएतत्सोमदेवतं यजमानस्य जपे विनियुक्तं सावजगती ॥

---

(१) उपयामेति प्रजापतिर्ऋषिः शुक्रो देवता सामगायत्री ग्रहणे विनियोगः इति-पद्धति पाठः ॥

सा प्रथमैन्द्री त्रिष्टुप् ॥

सा प्रथमा संस्कृतिरितीयमृक्प्रजापतिर्देवता त्रिष्टुप् । शुक्लामन्त्रिणीनां विनियुक्ता ।

इमं पशवश्चाऽग्नीध्रीक्षेत्रे ॥

इमं पंतु होताऽयाडग्नीध्रीक्षेत्रे यजुषी त्रिष्टुभौ देवते । प्रथमस्य होतादेवता । द्वितीयस्य होता । तं प्रति वचनात् । तृंपन्तु प्राजापत्यावृहती । अग्नये विनियोगः ॥

अयाड्देवी बृहती ॥

होतुरग्ने उच्चारणे विनियोगः ॥ २६ ॥

अयं वेनो वेनश्च त्रिष्टुप् सोमस्तुतिरधिदैवतमधियज्ञं च ॥

अयं वेनइतीयमृक् त्रिष्टुप्वेनस्य वेनो वेनतेः कान्तिकर्मणइतिवाक्षोभे वेनोऽत्र चन्द्रः सोमः । स वेनोऽस्या ऋचो देवता । कीदृशी इयमृक् । अधिदैवतं अधियज्ञं च सोमस्तुतिः वचनाच्च त्रिष्टुभा अयं वेन इत्यनया अधिदैवतमधियज्ञं चावस्थितः सोमः स्तूयते । अधिदैवं तावच्चन्द्रात्मना स्तूयते । अधियज्ञं च यागसाधनभूतसोमात्मना तृतीयः पादोऽत्र दृश्याचरः तेनैकोनामधिकक्षे विनियोगः शुक्लयजुषेऽपि विकल्पेन विनियोगोऽस्ति अयं वेन इत्येकऋति ॥

मनो न त्रिष्टुप्सोमस्तुतिरधियज्ञानुवादिनी ॥

मनो न येष्टितीयमृक् त्रिष्टुप् । कीदृशी । अधियज्ञानुवादिनी शुक्लामन्त्रिणदानाधियज्ञानुवादिनी । सोमस्तुतिसोमोऽत्र देवताइत्यर्थः सप्तभिर्मन्त्रियजुषे विनियोगः ॥

अभिष्टः शंडोऽपस्कटो मर्कऽआभिचारिके ॥

इमे यजुषी चक्षिषाद्यवोक्षणे । अथवीर्यजुर्वानीक्षणः । मुख-
क्षिणोदयप्रार्थने विनियोगः ॥

देवास्त्वा शुक्रामन्थिनौ ॥

देवास्त्वा शुक्रपा, देवास्त्वा मंथिपाइत्यनयोः क्रमेण शुक्रामन्थिनो-
देवते । इविर्द्धानाभिध क्रमणे विनियोगः यजुः षड्लि. ॥

अनाधृष्टाऽसि दक्षिणोत्तरवेदिश्रोण्यौ ॥

अनाधृष्टासीत्यनयोर्दक्षिणोत्तरे उत्तरवेदिश्रोणी देवते । उत्त-
रवेदिश्रोणीपर्यं हासादने विनियोगः ॥

सुवीरः सुप्रजाइत्यनयोः शुक्रामन्थिनौ ॥

यजाक्रमं देवते । सुवीरइत्यस्य शुक्रो देवतासां मन्थिष्टुप् । अथवीं
दक्षिणं यूपदेशं प्रतिगमने विनियोगः । सुप्रजाइत्यस्य मंथी देवता ।
सामन्थिष्टुप् । प्रतिप्रस्थातुरुत्तरं यूपदेशं प्रतिगमने विनियोगः ॥

निरस्तो इे आभिचारिके ॥

निरस्तः शर्वो निरस्तो मर्क इतीमे यजुषी आभिचारिके
अभिचारप्रयोजने दैवीपङ्क्तिः । अथोचितसूपसकलयोर्नि-
रसने विनियोगः ॥

शुक्रस्य मन्थिनः शकल(१) म् ॥

शुक्रस्याधिष्ठानमसि मंथिनोधिष्ठानमसीत्यनयोः शकलं देवता ।
प्राजापत्या गायत्री । प्रोक्षितसूपशकलयोराहवनीये प्रास्ने वि-
नियोगः ॥

ये देवासः पञ्चेपो वैश्वदेवीन् त्रिष्टुभम् ॥

ये देवासो दिवोतीमाश्च विश्व देवदेवतां त्रिष्टुप्छन्दस्कां पञ्च-
पञ्चाशिरपश्यत् ॥

---

(१) "शुक्रस्य मन्थिनो द्वयोः शकल" मिति काण्वशाखीयसर्वानुक्रमसूत्रपाठः ॥

आग्नयणोऽसि लिङ्गोक्तदेवतम् ॥

आग्नयणदेवतमित्यर्थः । व्यृचेन ब्राह्मी अनुष्टुप् । आग्नयणग्रहण एव विनियोगः ॥ २७ ॥(१)

सोमः पवते वैश्वदेवम् ॥

सोमः पवतइत्येतद्विद्यं देवदेवतं । अनुष्टुप्छन्दः । एकाग्नयेऽनुमतयेऽनुमृष्ट चिरिंविल्लाय अग्नाविष्णवे विनियोगः । एव त इत्यनुजनती । आदने विनियोगः ॥

इन्द्राय त्वा लिङ्गोक्तानि ॥

इन्द्राय त्वा वृष्टवतइत्यादीनि इन्द्राविष्णुभ्यामित्येतत्पर्यंतानि सर्वाणि यजूंषि लिङ्गोक्तदेवतानि । गृह्यमाणग्रहदेवतानीत्यर्थः । तत्रेन्द्राय त्वेतिभार्वीपङ्क्तिः उक्थ्यग्रहे विनियोगः । एव त इति यजुर्ग्रहणी सादने विनियोगः । ग्रहो देवता । देवेभ्यस्त्वेति ग्रहोदेवता । आसुरी गायत्री । प्रातः सवने उक्थ्यविग्रहे विनियोगः मित्रावरुणाभ्यां त्वा । ऋगायत्री मैत्रावरुणस्योक्थ्यविग्रहे विनियोगः । इन्द्राय त्वा । आसुरी गायत्री । ब्राह्मणाच्छंसिन उक्थ्यविग्रहे विनियोगः इन्द्राग्निभ्यां त्वा । प्राजापत्यानुष्टुप् । अच्छावाकोक्थ्यविग्रहे विनियोगः इन्द्रावरुणाभ्यां । ऋग्गायत्री । इन्द्राबृहस्पतिभ्यां त्वा । एकाधिका ऋग्गायत्री । इन्द्राविष्णुभ्यां त्वा एकोना ऋग्गायत्री । तृतीयसवने उक्थ्यविग्रहे प्रातः सवनोक्तवेद विनियोगः ॥

मूर्धानं भरद्वाजो वैश्वानरीं त्रिष्टुभम् ॥

मूर्धानं दिवइतीमामृचं वैश्वानरदेवतां त्रिष्टुप्छन्दस्कां भरद्वाजऋषिरपश्यत् । ध्रुवग्रहेष्वा विनियोगः ॥

---

(१) स्वाग्नयणइत्येतद्यजुरित्येतत्कचिन्मूलीयपाठः सटीकपुस्तके ॥

ध्रुवो ऽसि ध्रुवः ॥

ध्रुवोऽसि ध्रुवक्षितिरित्यस्या । ध्रुवो देवता । एकाधिका ऋचः यजुर्लिङ्गोक्तदेवताभिर्विनियोगः ॥

ध्रुवं ध्रुवेण हविषा पूर्वोऽर्धर्चो ध्रौव उत्तरऐन्द्रः ॥

ध्रुवं ध्रुवेणेत्यस्या बृहतीछन्दः । तस्य ध्रुवं ध्रुवेणेत्यं पूर्वोर्धर्चो ध्रौवः ध्रुवदेवतः । अथानऽइत्यस्योत्तरोऽर्धर्चऽइन्द्रदेवतः । ध्रुवस्य होतृषदनेऽवनयने विनियोगः । (१) अत्र प्रथमतृतीयावष्टाक्षरौ पादौ । द्वितीयचतुर्थौ द्वयाक्षरौ । षट्त्रिंशदक्षरत्वाद्बृहती "वैराजो गायत्री चेति पिङ्गलोक्ता" । अत्र यादृक्क्रमनियमा न अवन्ति षट्त्रिंशोर्मध्येदशकौ विष्टारबृहतीत्येतल्लक्षणमिह नास्ति ॥ (२)

यस्ते देवश्वाः सोमी ऽष्टुभं यजुरन्ताम् ॥

यस्ते द्रप्सश्चतीमां त्रिष्टुभं सोमदेवतां यजुरन्तां देवश्रवाऋषिरपश्यत् । यजुर्वोऽपि देवश्रवाऋषिरित्यर्थः । स्वाहेत्येतद्यजुश्चतुर्थः पादो द्व्यक्षरः तेनैकाधिका । विभुरङ्गोसीत्यस्या विनियोगः ॥

देवानां चात्वालदेवतम् ॥

देवानामसीत्येतद्यजुश्चात्वालदेवतं । यजुर्बृहती । अवभृथ चात्वाले प्रक्षेपे विनियोगः ॥

प्राणाय मे लिङ्गोक्तदेवतान्येकादश ॥

प्राणाय मे वर्चोदा इत्यादीनि विष्णोर्मह्यस्यग्न्येकादश यजूंषि लिङ्गोक्तदेवतानि । उपांशुसवनादय एषां देवताइत्यर्थः । सर्वेषां वाचने विनियोगः । तत्र प्राणाय महत्यश्चोपांशुदेवता आसुर्यनुष्टुप्-

---

(१) उप० ध्रुवोऽसि० ध्रुवोदे० ऋक्पादैक्यः ध्रुवमहण एवादि० एष ते प्र० महोदे० यजुस्त्रिष्टुप्साद्ने वि० ।

(२) ध्रुवसेके विनि० इत्युभयोः पङ्क्तिपाठः ॥

वाचे विनियोगः, व्यानाय मे । उपांशुसवनो देवता आसुर्यनुष्टुप् । उदानाय मे अन्तर्यामो देवता सामोष्णिक् । वाचे मे ऐन्द्रवायवो देवता । सामगायत्री, क्रतूदक्षाभ्यां । मैत्रावरुणयज्ञो देवता आसुरीगायत्री । श्रोत्राय मे आसुर्यनुष्टुप् आश्विनयज्ञो देवता । चक्षुभ्यां मे शुक्रामन्थिनौ देवते । सामोष्णिक् । आत्मने मे । आधयज्ञो देवता । आसुर्यनुष्टुप् । ओजसे मे । सद्यस्को देवता । आसुर्यनुष्टुप् । आयुषे मे । ध्रुवो देवता आसुर्यनुष्टुप् । विशाभ्यो मे । एकोनागायत्री । एकाधिका वा प्राजापत्यानुष्टुप् । पूतद्रुदाधवनीयौ देवते । सर्वेषां वाचने विनियोगः ॥

ओऽसि प्राजापत्योष्णिग्वर्धमाना ॥

ओऽसिकृतमोऽसीत्येषां प्राजापतिर्देवता । मध्यस्थप्रजातिरूपो द्रोणकलशोऽत्र देवतेत्यर्थः, अस्या वर्धमानोष्णिक्छन्दः यस्याः प्रथमः पादः षडक्षरः । द्वितीयः सप्ताक्षरः । तृतीयोऽष्टाक्षरः । सा त्रिपदाक्षरत्वात् द्वाभ्यामधिकत्वात् । वर्धमानोष्णिगित्युच्यते । अक्रकाण्डवाचने विनियोगः । भूर्भुवः स्वरिति ऋगुष्णिक् यजमानस्य जपे विनियोगः ॥

मधवे त्वा लिङ्गोक्तदेवतानि त्रयोदश ॥

मधवे त्वेत्यादीनि अष्टौ० हसस्रतये त्वेत्यंतानि त्रयोदश यजूंषि लिङ्गोक्तदेवतानि गृहगृह्यमाणगृहदेवतानीत्यर्थः । चतुर्गृहगृहे सर्वेषां विनियोगः । मधवे त्वा यजुर्जगती । माधवाय । आसुर्यनुष्टुप् । शुक्राय शुचये । नभसे त्वा । यजुर्जगत्यः, नभस्याय आसुर्यनुष्टुप् । इषे त्वा । ऊर्जे त्वा यजुः षड्लिङ्गाः । सहसे त्वा तपसे त्वा यजुर्जगत्यौ, सहस्याय त्वा तपस्याय त्वा आसुर्यनुष्टुभौ । अष्टौ० हसः सामोष्णिक् ॥ २७ ॥

इन्द्राग्नी विश्वामित्रऐन्द्राग्नीं गायत्रीम् ॥

इन्द्राग्नी आगतमिति सीमामृचं इन्द्राग्नीदेवत्यां गायत्रीछन्दस्कां विश्वामित्रऋषिरपश्यत् । ऐन्द्राग्नस्य ग्रहस्य विनियोगः पूर्व प्रथमग्रहणमन्त्रवदाज्यदोहो द्वितीयः समानः । तेनैकोना उपयामेति सामान्यिक, एष त इति यजुःपक्षिकः । ग्रहणे सादने च क्रमेण विनियोगः ॥

आघविशोकाग्नैन्द्रीम् ॥

गायत्रीमित्यनुवर्त्तते । आघा ये इतीमां गायत्रीमाग्नैन्द्रीमग्नीन्द्रदेवत्यां विशोकऋषिरपश्यत् । अस्या विनियोगश्छन्दो लक्षणं च यजुषोः पूर्वमन्त्रवत् ॥

ओमासो मधुच्छन्दावैश्वदेवीम् ॥

गायत्रीमित्यनुवर्त्तते । ओमासश्चर्षणीधृतश्चतीमामृचं विश्वेदेवदेवतां गायत्रीच्छन्दस्कां मधुच्छन्दा ऋषिरपश्यत् । वैश्वदेवग्रहणे विनियोगः ॥

विश्वेदेवासो गृत्समदः ॥

वैश्वदेवीं गायत्रीमिति चानुवर्त्तते विश्वेदेवास आगतेतीमामृचं विश्वेदेवदेवतां गायत्रीछन्दस्कां गृत्समदऋषिरपश्यत् । लिङ्गाद्वैश्वदेवग्रहणएव विनियोगः । उभयसूत्रे उपयामेति । आसुरी गायत्री । एष तदिति यजुर्जगतौ । ग्रहणे सादने च क्रमेण विनियोगः ॥

इन्द्र मरुत्वश्चत्रो विश्वामित्रऐन्द्रामारुतीस्त्रिष्टुभः ॥(१)

इन्द्रमरुत्व, मरुत्वन्तं वृषभं । सजोषाइन्द्र मरुत्वाइन्द्रेत्येतायतस्रइन्द्रमरुत्वद्देवता त्रिष्टुप्छन्दस्का विश्वामित्रऋषिरपश्यत् । इन्द्रमरुत्वइत्यस्याः प्रथममरुत्वतीयग्रहणे विनियोगः । मरुत्वन्तमिति स-

(१) इन्द्रमरुत्वतस्तत्रेति काण्वसर्वानुक्रमणीपाठः ॥

ग्रहणमरुत्वतीयग्रहणे । अत्र द्वितीयो दशाक्षरः व्यूहेन पूर्त्तिर्वा एकोनो वा । उपयामेति आसुरी गायत्री, एष तदित्यासुर्यनुष्टुप् । एवं चतसृष्वपि । तृतीयाचतुर्थीरपि लिङ्गाभावस्तृतीयग्रहणेन विनियोगो वाचस्तोमे ॥

मरुतां त्वा यजुर्मरुत्वतीयम् ॥

मरुतां त्वौजसेति यजुर्मरुत्वतीयं मरुत्वानस्य देवतेत्यर्थः, द्यावापृथिवी मरुत्वदग्नीषोमेति छपत्यय. अत्र सामीष्णिक् । तृतीयमरुत्वतीयस्य ग्रहणे विनियोगः ॥

मरुद्भ्यां २ ॥ इन्द्रो भरद्वाजो माहेन्द्री त्रिष्टुभम् ॥

मरुद्भ्यां २ ॥ इन्द्रो नृवदितीमामृचं माहेन्द्रग्रहदेवतां त्रिष्टुप्छन्दस्कां भरद्वाजऋषिरपश्यत् । माहेन्द्रग्रहग्रहणे विनियोगः । अत्र तृतीयो नवाक्षरः । तेन दृश्यते ॥

यऽओजसा वत्सो गायत्रीम् ॥

माहेन्द्रीमित्यनुवर्त्तते । मरुद्भ्यां २ ॥ इन्द्रो यऽओजसेतीमामृचं माहेन्द्रदेवतां गायत्रछन्दस्कां वत्सऋषिरपश्यत् । अत्रापि माहेन्द्रग्रहणेन ग्रहादाचिद् विनियोग लिङ्गात् । अग्नीषोमीयमन्त्रयोरुपयामेत्यासुर्यनुष्टुप् । एष तदिति यजुः प्रक्षिप्त ग्रहणासादनयोर्विनियोगः ॥

उदुत्यं प्रस्कण्व. सौरीं गायत्रीम् ॥

उदुत्यमितीमां सूर्यदेवतां गायत्रीछन्दस्कां प्रस्कण्वऋषिरपश्यत् । दाक्षिणहोमे विनियोगः अत्र तृतीयः समाक्षरः तेनैकोना ॥

चित्रं कुत्साऽआङ्गिरसस्त्रिष्टुभम् ॥

सौरीमित्यनुवर्त्तते । चित्रं देवानामितीमामृचं सूर्यदेवतां त्रिष्टुप्छन्दस्कां आङ्गिरसः पुनः कुत्सऋषिरपश्यत् । दाक्षिणहोमेऽस्या

विनियोगः ॥(१)

रूपेण वो दधिषा अचतुर्याम् ॥

रूपेण वो रूपमित्यादीनां चतुर्णां यजुषां दधिषादेवताः । तत्र रूपेण वः प्राजापत्या जगती निष्टरूपानुष्टुप् । दधिषादधिमन्थाग्रहे विनियोगः, वि त्वः दैवी जगती महोग्रहमन्थने विनियोगः, ततस्त्र यजुर्गायत्री सदस्य प्रेषये । अत्र चक्षतस्य पथा प्रेतेति द्वितीयं यजुः पृथक् । चतुर्थामित्युक्तत्वात् ॥

ब्राह्मणमस्य लिङ्गोक्तदेवतान्यष्टौ ॥

ब्राह्मणमस्य विदेयमित्यादीन्यष्टौ यजूंषि लिङ्गोक्तदेवतानि ब्राह्मणो देवता ब्राह्मणं प्रतिएकोनाक्षरवृहतीआग्नीध्रमार्षे पात्र प्रतिग्रहणे विनियोगः अक्षद्राताद्दत दधिषादेवताः । ब्राह्मणी गायत्री दधिषादाने विनियोगः ॥

बृहस्पतये त्वा हिरण्यं देवता ॥

ऋचां त्रिष्टुप् हिरण्यप्रतिग्रहे विनियोगः ॥

रुद्राय त्वा गौर्देवता ॥

एकाधिका ऋचां त्रिष्टुप् गोः प्रतिग्रहे विनियोगः । बृहस्पतये त्वा एकोनाब्राह्मणी गायत्री वासोदेवता वासः प्रतिग्रहणे विनियोगः ॥

यमाय त्वा ॥

यमोदेवता एकाधिकाऋचा त्रिष्टुप् । अश्वप्रतिग्रहणे विनियोगः ॥

कोदादिति कामो देवता ॥

---

(१) अत्र अग्नेनयापन्नइति द्वयोर्ऋचोरगस्त्य ऋषा त्रिष्टुपछन्दसी आग्नीध्रीयेऽग्नौ घृताहुतिहयहोमे विनियोगः इति पङ्क्तिपाठः ॥

प्राजापत्या त्रिष्टुप्त्रिरत्नगोवासोऽग्नेभ्योऽन्यत्र [illegible] मन्त्रोक्तादेः प्रतिपदे विनियोगः । सौदादित्यत्र हे यद्देवी प्रथमश्रुती अभिप्रेत्य लिङ्गोक्तदेवतान्यष्टावित्युक्तं । अन्यथा सप्तैवेमानि नाष्टौ ॥ २८ ॥

विष्णो वैष्णवम् ॥

विष्णोऽदब्धायेत्यतश्चत्वारि यजुर्वैष्णवं विष्णुर्देवता आर्षीगायत्री । आदित्यस्याध्यामाग्निज्ञानां हिदेवत्यानुहोमसंज्ञकानामादित्यपात्रे च विधाने विनियोगः । अत्र प्रथममध्यायादौ उपयामगृहीतोऽसीति प्रथमं यजुः । प्राजापत्या गायत्री । हिदेवत्यैः सह होमार्थं प्रतिप्रस्थातुरादित्यपात्रेण द्रोणकलशादुद्ग्रहणे विनियोगः ॥

गृह्यमाणः सोमोदेवता ॥

अत्र आदित्येभ्यस्त्वेति द्वितीयं यजुरादित्यसंज्ञायां संज्ञायामेके विनियुक्तं । तस्यामिषमाणः सोमोदेवता दैवीपङ्क्तश्छन्दः संज्ञायामेके विनियोगः । ततस्तृतीयं विष्णोऽदब्धायेत ॥

कदा चनादित्यदेवत्ये बृहत्यौ ॥

कदा चन स्तरीः, कदा चन प्रयुच्छसीतीमे ऋचौ आदित्यदेवते बृहतीछन्दस्के आदित्यपक्षे विनियुक्ते हे अपि यजुरन्ते । आदित्येभ्यस्त्वेति द्वयोरप्यन्ते यजुः । तस्य दैवीपङ्क्तश्छन्दः पूर्वे हि वाजप्रोक्षणे मध्ये कदाचनेन्द्रदेवत्योक्ता । इह त्वादित्यदेवत्या यजुरन्ता चेति विशेषः द्वितीयायां बृहतेन छन्दः पूर्त्तिः ॥

यज्ञो देवानां कुत्सस्त्रिष्टुभम् ॥

यज्ञो देवानामितीयमादित्यदेवत्यां त्रिष्टुभं कुत्सऋषिरपश्यत् । आदित्यगृहस्य दक्षा त्रयस्के विनियोगः । अतु प्रजप्रजतीयो पादो द्व्यक्षरौ । ततश्च तयोर्बृहतेन पूरणम् ।

विश्वव्यचाः ॥

आदित्यदेवत्यमित्यनुवर्त्तते । विश्वव्यचादित्येत्यजुरादित्यदेवतम् । दृष्टिबोधयोर्मिश्रणे विनियुक्तम् । प्राजापत्यानुष्टुप् ।

अदब्धो जगत्याग्नीः ॥

अदब्धो नरइत्येषा जगतीछन्दस्का आग्नीर्देवता । नरोदेवता वा तेषां सम्बोध्यत्वेनात्र प्राधान्यात् । अन्यत्राग्नीदेवत्ये विनियुक्ता व्यूहेन पूर्तिः ॥

वाममद्य भरद्वाजो बार्हस्पत्यः सावित्री त्रिष्टुभम् ॥

वाममद्येतीमामृचं सवितृदेवत्यां त्रिष्टुप्छन्दस्कां बृहस्पतेरपत्यं भरद्वाजऋषिरपश्यत् । अत्र चतुर्थो दशाक्षरः । तेनैकोना ॥

सावित्रोऽसि सावित्रम् ।

सावित्रोऽसीत्येतद्यजुः सवितृदेवतम् । सावित्रगृहएव विनियुक्तम् । ताभ्यामधिका आर्षीत्रिष्टुप् दृष्ट्यूनाआर्षी जगती वा ॥

सुगर्मासि वैश्वदेवम् ॥

सुगर्मासि सुप्रतिष्ठानइत्येतद्यजुर्विश्वेदेवदेवतम् । व्यूहेन प्राजापत्या जगती । वैश्वदेवगृहे विनियोगः ॥

बृहस्पतिसुतस्य लिङ्गोक्तम् ॥

बृहस्पतिसुतस्येत्येतल्लिङ्गोक्तदेवतम् । सोमदेवतमित्यर्थः । प्राजापत्या बार्हतो वाजीवतगृहगृहे विनियोगः ।

अहम् (१)प्रजापतिरूपेणात्मादेवता त्रिष्टुप् ॥

अहम् परस्तादित्यस्याऋषयः प्रजापतिरूपेण चात्मादेवता त्रिष्टुप्छन्दः । वाजीवतगृहस्य प्रथमर्चीत्रयेणैवान्येन त्रयेण विनियोगः ।

---

(१) परस्तादित्यनेकः पाठः कात्यस्मर्वानुक्रमे बोध्यः ॥

अतः पञ्चमो दशाक्षरस्तेनैकोना ॥

अग्ना३ इ३ इ३ पत्नीवन्त्साम्नेयम् ॥

अग्ना३ इ३ इ३ पत्नीवन्नित्येतद्यजुरग्निदेवतम् । एकाधिकाक्षरायाः एकोना सामपङ्क्तिर्वा पात्नीवतयज्ञेऽग्नि विनियोगः ॥ (२)

प्रजापतिः प्राजापत्यम् ॥

प्रजापतिर्वषट्कारोत्येतद्यजुः प्रजापतिदेवतम् । ऋचां त्रिष्टुप् । वषट्कारान्ता समीक्षये विनियोगः ॥

हरिरस्यृक्षामि ॥

हरिरसि हारियोजनहृत्यस्य यजुषऋक्षामि देवते । "ऋक्षामे वै हरीऋक्षामाभ्याएष्वेनं यदृक्षणातीतिश्रुतेः" ॥ ऋगुष्णिक् । हारियोजनयज्ञे विनियोगः । यत्र मधवे त्वा सिङ्गीलाभ्यो जुष्टं प्रोक्षामीति, मरुतां त्वा यजुः,, सावित्रोऽसि सावित्रम् सुगमन्यत्सर्वं वेद्यन्तेवं हरिरस्यृक्षामे इत्यादिषूपयामगृहीतोऽसीत्येतत्सर्वत्रान्वेति विद्यतएव । तेनानेन सहैव यजुषो ऽन्तराणि गणयित्वा छन्दोविचार्य निवेदयम् । यथा यऽओजसा वल्गो गायत्रीमित्यत्र महाँइन्द्रइत्येतत् ॥

हर्य्योर्युक्ते सिङ्गीक्ते ॥

हर्योर्युक्तास्य,यस्ते अच्छसनिरित्येते यजुषी सिङ्गीलादेवते । हर्योरित्यस्य धानादेवताः सामगायत्री । धानाभिर्हारियोजनयज्ञे विनियोगः । यस्ते मक्षणीयम् द्रव्यं देवता आर्षीपङ्क्तिः । धानानां प्राश्य मक्षणे विनियोगः ॥

देवकृतस्यैनसऽइत्यादीनि षड्यजूंषि अग्निदेवतानि । सावित्रा

(२) अग्ने वाजागोभिरित्यधिकः काण्वसर्वानुक्रमणाठः । मन्त्रभेदोऽपि यथा अग्ने वाजपते सजूर्देवेन त्वष्ट्रा । सोमात्यम् स्वाहा ॥ ३ ॥

अग्ने विनियुक्तानि ॥

देवकृतस्यैनसो यजुर्जगती ॥

मनुष्यकृतस्य सामोष्णिक् । पितृकृतस्यैनसो यजुर्निचृत् । आत्मकृतस्यैनसो यजुर्निचृत् ॥

एनसो यजुर्जगती ॥

यच्चाहमेनः । व्यूहेन प्राजापत्या त्रिष्टुप् ॥

संवर्चसेत्यस्य त्वष्टादेवता त्रिष्टुप् ॥

उदग्ने घृतवन्मामवमर्जने विनियोगः । छन्दोदेवतयोः प्रागुक्तत्वादिह नोक्तम् ॥ ९० ॥

समिन्द्राविष्णू दैवीं त्रिष्टुभम् ॥

समिन्द्राग्नी मनसेतीमामृचं विष्णुदेवतां त्रिष्टुप्छन्दस्कां प्रतिहर्षिरपश्यत् । समिष्टयजुर्होमे विनियोगः । संवर्चसेत्यस्योक्तमर्थेन प्रजापतिर्ऋषिः समिष्टयजुर्होमे विनियोगः ॥

धाता त्रिष्टुप्छन्दसानुवर्त्तते ॥

त्रिष्टुप्पदमनुवर्त्तते । धाता रातिरित्येषा त्रिष्टुपत्रिष्टुप्छन्दस्का बृहस्पतिर्देवत्या त्रिष्टुप्ता त्रिष्टुभैव मन्त्रान्तरैर्वोक्ता बृहस्पतिर्देवता यस्य सा तथा धातृसवितृप्रजापतिदेवाग्नित्वष्टृविष्णुदेवतेत्यर्थः । समिष्टयजुर्होमे विनियोगः ॥

सुगा वो देवो ॥

सुगा वो देवाऽतीयमृग्देवी देवता । अत्रापि त्रिष्टुवित्यनुवर्त्तते । समिष्टयजुर्होमे विनियोगः । अत्र चतुर्थी दशाक्षरपतिनैकाना ॥

यँ २ ऽ ॥ आवहो वयमाग्नेय्यौ ॥

त्रिष्टुभावित्यत्र सम्बध्यते । यँ २ ॥ आवह उशतः, वषट० हुत्वा प्रयतीत मे ऋचौ आग्नेयौ अग्निदेवते त्रिष्टुपछन्दस्के । इष्टिय-

ब्रह्मौमे विनियुक्ते देवा गातुरित्यस्य तु सर्वं प्रागुक्तम्। अथ पुनः पाठात्प्रजापतिर्वा ऋषिरिति विशेषः॥

यज्ञ यज्ञमेषते लिङ्क्तो यजुषी॥

यज्ञ यज्ञमित्यस्य, एव ते यज्ञ इतीमे यजुषी लिङ्क्तो प्रथमं यज्ञदेवतं एकाधिका ऋग्मायत्री। द्वितीयं यज्ञपतिदेवतं। एकाधिका सामजगती। सन्निष्टयजुर्होमे हवींष्यभिमर्शने विनियोगः॥

उरुर्थ॰ हि शुनः शेपो वारुणीं त्रिष्टुभम्॥

उरुर्थ॰ हि राजेमामूषं वरुणदेवताम्। त्रिष्टुप्छन्दस्कां शुनः शेपऋषिरपश्यत्। वारुणे विनियोगः। द्वितीयपादस्य व्यूहेन पूरणम्॥

नमो वारुणम्॥

नमो वरुणायेत्येतदृग्यजुर्वारुणं वरुणदेवतं अर्घाऽवभृथमये वारुणे विनियोगः॥

अग्नेरनीकमाग्नेयी त्रिष्टुप्॥

आसुरी गायत्री॥

अग्नेरनीकमित्येषा ऋगग्निर्देवता त्रिष्टुप्छन्दस्का अवभृथचातुर्मृङ्क्षहोमे विनियुक्ता। द्वितीयस्याश्च व्यूहेन पूरणम्॥

समुद्रं ते सौमी विराट्॥

समुद्रं ते हृदयमित्येषा ऋक् सौमी सोमदेवत्या विराट्छन्दस्का। यस्या दश चत्वारश्चत्वारः पादाः सा विराट्। वैराजैर्विराडिति वचनात्। ऋजीषक्रूंभ्रावणे विनियोगः॥

देवीरापः पञ्चिक्रर्बृहती वा पूर्वार्धे आपउत्तरः॥

देवीराप एवो गर्भं इतीयमृक्पञ्चिछन्दस्का बृहतीछन्दस्का वा अष्टाक्षरपादत्वादिकल्पः। अस्याः पूर्वार्धे अग्निदेवतः उत्तरो-

ईंधो देव सोमेधत इत्यस्य सोमदेवताः । भुरीगुष्णिक् ऋषभः । विनियोगः ॥

देवानामानेयम् ॥

देवानाए समिदसीत्येतदृग्यजुरग्निदेवतं । समिदाधाने विनियुक्तम् । देवीजगती ॥

एजतु व्यवसाना मङ्गापङ्क्तिः ॥

एजतुदृशमाग्नेतीयमृक् व्यवसाना अवसानत्रयोपेता मङ्गापङ्क्तिछन्दस्का । गर्भो देवता । मन्थनिङ्गात् । यथाम्नष्टाक्षराः षट्पादा सा मङ्गापङ्क्तिः "षडष्टका वा मङ्गापङ्क्तिरित्युक्तेः,, अनूर्ध्वायागर्भस्य लिङ्गमाग्नेयस्याभिमन्त्रणे विनियोगः ॥

यज्ञैते वशा ॥

यज्ञैते यन्नियदित्यस्या ऋचः वशादेवता । अनुष्टुप्छन्दः । मैत्रावरुणे विनियोगः ॥

पृषदश्वो गर्भः ॥

पृषदश्वो विषुरूप इत्यस्या गर्भो देवता । ब्राह्मी अनुष्टुप् । गर्भमैत्रावरुणस्य खिष्टकृतमनुमैत्रावरुणे विनियोगः ॥

मरुतो यस्य गोतमो मारुतीं गायत्रीम् ॥

मरुतो यस्येतीमामृचं मरुद्दैवत्यां गायत्रीं गोतमगोत्रऋषिरपश्यत् । प्राग्निवेश्यो गर्भेऽग्नौ विनियोगः ॥

मही द्यौर्मेघातिथिर्द्यौर्वा पृथिव्याम् ॥

गायत्रीमित्यनुवर्त्तते । मही द्यौरितीमामृचं गायत्रीछन्दस्कां

---

(१) लिङ्गमाग्नेयस्य स्तर्वन्ध्या गर्भस्याभिमन्त्रणे विनियोगः । इति पद्धत्याः पाठो बोध्यः ॥

द्यावापृथिवीदेवत्यां मेधातिथिर्ऋषिरपश्यत् । सर्वेष्वांगादेरभ्यूहने विनियोगः । इत्यग्निष्टोमः । इतिशब्दः समाप्तौ । अग्निष्टोमः समाप्तस्वर्गः ॥ ३१ ॥

अथ षोडशी व्याख्यास्यतइति शेषः । षोडशिनामसंज्ञा लक्ष्यन्ते । यज्ञानन्तरं षोडशिसंज्ञाचाक्रचादिकं व्याख्यास्यत इत्यर्थः ॥

आतिष्ठ गौतम ऐन्द्रीमनुष्टुभम् ॥

आतिष्ठ इत्यस्य ऋग्वेतामृचं इन्द्रदेवत्यामनुष्टुपछन्दस्कां गौतमऋषिरपश्यत् । अर्चोपयामेत्यासुरीगायत्री । षोडशीयज्ञे विनियोगः एष तदित्यासुर्यनुष्टुप् । सादने विनियोगः ॥

युक्ष्वा हि मधुछन्दाः ॥

ऐन्द्रीमनुष्टुभमित्यनुवर्त्तते । युक्ष्वा हि केशिनेतीमामृचं इन्द्रदेवत्यां अनुष्टुपछन्दस्कां मधुछन्दाः ऋषिरपश्यत् । विकल्पेनवा युक्ष्वा हि केशिनेतीमामृचमिन्द्रदेवत्यामनुष्टुपछन्दस्कां मधुछन्दाऋषिरपश्यत् । विकल्पेन षोडशीयज्ञएवविनियोगः अत्र द्वितीयः षड्चरः । तेन दृब्लूना । यजुषः पूर्ववत् ॥

इन्द्रमिद्धरी वहत ॥

ऐन्द्रीमनुष्टुभमित्यनुवर्त्तते । इन्द्रमिद्धरी वहत इतीमामृचमिन्द्रदेवत्यामनुष्टुभमित्यनुवर्त्तते । इन्द्रमिद्धरी वहतइतीमामृचमिन्द्रदेवत्यामनुष्टुपछन्दस्कां गौतमऋषिरपश्यत् । अथा अपि षोडशीयज्ञएव विकल्पेन विनियोगः । यजुषः पूर्ववत् । अत्र चतुर्थः समाप्तऋचः । तेनैकोना ॥

यस्मान्नैन्द्री त्रिष्टुप्परब्रह्मरूपेण षोडशिनः स्तुतिः ॥

यस्मान्न जातइयमृक्इन्द्रदेवत्या त्रिष्टुपछन्दस्का परब्रह्मरूपेण षोडशिनः स्तुतिरियं । अत्र षोडशी परब्रह्मरूपेण स्तूयते । अतएव

षोडशिन ग्रहणाभ्यां विनियोगः अथर्वणिकानेव ऋषिः । [illegible]
ग्रहणाभ्यासात् । अथर्वा ग्रहणात् । गोतमस्त्वेतत्तु संबन्धम्
न प्राप्नोति । ऐन्द्रीति प्रथमया निर्देशात् । षोडशिन ग्रहणाभ्यां
विनियोगोक्त्या । अथ चतुर्थी द्वादशाक्षरः । तेनैकाधिका ॥

इन्द्रश्चेन्द्रा वाहणी षोडशीदेवत्या वा यजुरन्ता ॥

त्रिष्टुबित्यनुवर्तते ॥ इन्द्रश्च सम्राडित्येषा ऋक् त्रिष्टुप् इन्द्रा-
वरुणदेवत्या षोडशिदेवत्या वा यजुरन्ता । अथवा अन्ते मह्यादेशे-
नेतरयजुरन्तीत्यर्थः । ऋषिर्विश्वामित्र एव । तृतीयचतुर्थौ पादौ द्वाद-
शाक्षरौ । तेन दृश्यधिका त्रिष्टुप्षोडशिग्रहणे विनियोगः षोडशी-
ग्रहणात् । अथ द्वादशाक्षरान्तर्गतमन्त्रावयवमाद्युच्यते ॥

अग्ने पवस्व वैखानस आग्नेयीकायत्रीम् ॥(१)

अग्ने पवस्वेतीमामृचमग्निदेवतां गायत्रीं वैखानसऋषिरप-
श्यत् । अतिरात्रग्रहणे विनियोगः अथर्वशिरतीयो ब्राह्मणे । तथाच
खण्डशति व्यूहेन पूरयम् । द्वितीये तु व्यूहब्राह्मणं नास्ति । तेनैकोना ॥

उत्तिष्ठन्बृहद्रुतिरैन्द्रीम् ॥

गायत्रीमित्यनुवर्तते । उत्तिष्ठब्रह्मसेतीमामृचं अग्निदेवत्यां गायत्रीं
बृहद्रुतिऋषिरपश्यत् । अतिरात्रग्रहणे विनियोगः ॥

अदृश्रमित्येतामृचं गायत्रीं सौरीं सूर्यदेवत्यां प्रस्कण्व ऋषिर
पश्यत् । अतिरात्रग्रहणे विनियोगः ॥

तिस्रोऽपि यजुरन्ताः ॥

अग्ने पवस्वोत्तिष्ठन्नदृश्रमित्येतास्तिस्रोऽपि यजुरन्ताः । अ-
थवानेति सामोत्थिक ॥

---

(१) अग्नेऽआयूंषि ते वैखानसेऽआग्नेययौ । इति काण्वसर्वानुक्रमणिकाभाष्ये ॥

एव ते सामगायत्री मध्ये द्वितीये उषयामग्राहुर्यजुष्टुप् ॥

एव ते यजुश्छन्दुष्टुप् । तृतीये उषयाम आसुरीगायत्री । एव ते सामगायत्री सर्वेषां मध्ये क्रमेण हेहे यजुषी यत्ते यः यद्वै यज्ञस्य क्रमेण विनियुक्ते । यजुरन्तारभ्यतेन तेषां यजुषामपि स एव ऋषिरिति प्राप्यते । यद्वे पवस्वेत्यस्या यत्ते यद्वै वर्चोभिरिति यजुः एकर्चिका सामजगती अग्निर्देवता अग्निष्टोमसामन्यौ विनियोगः । अग्निष्ठनिमत्यस्याश्चत्ते इद्वोजिष्ठेति यजुः यजुश्चिद् इन्द्रोदेवता अग्निष्टोमसामन्यौ विनियोगः । अदृश्रमित्यस्याश्चत्ते सूर्यस्याजिष्ठेति यजुः सामजगती । सूर्यो देवता अग्निष्टोमसामन्यौ विनियोगः ॥

उदुत्यन् देवानामार्षम् ॥(१)

उदुत्यं जातवेदसमित्येषा ऋक् देवानामार्षं देवापत्या ऋषय इत्यर्थः । सूर्योदेवता । गायत्रीछन्दइति तु प्रागुक्तमेव । तत्र तु प्रस्तावसमिधि तु देवाइति विशेषः अथ वा अदृश्रं प्रस्तावः सौरोमिमतः सौरीगायत्रीमित्येतत्पदद्वयमनुवर्तते । अथाग्नेयेषु विश्वामित्रेष्वहस्सु यज्ञायज्ञीये विनियोगः । अपोषामिति आसुरीगायत्री । यज्ञायज्ञीये विनियोगः । एव नइति सामगायत्री सादने विनियोगः ॥

आजिघ्रेऽङ्गिरसं कुसुरुबिन्दुगव्ये महापङ्क्तिप्रस्तारपङ्क्तौ ॥

आजिघ्र, कलशं, इडे रन्तहवीमे ऋचो महापङ्क्तिप्रस्तारपङ्क्तौ मध्ये गोदेवते कुसुरुबिन्दुऋषिरवोचत् । तमाजिघ्रेति महापङ्क्तिः । "षडष्टका वा महापङ्क्तिरिति भाजपात्" । ऋचां चाष्टाचरः षट्पदाः सन्ति । तत्र इतीवस्य व्यूहेनपूरणम् । चतुर्थः समाचरएव ।

---

(१) वा चित्रं कुत्सऽआह्रसाद्दुत्यम् । इति काण्वसर्वानुक्रमेऽधिकः षाडः ॥

तेनैकोना । इडे रन्तहव्येति प्रस्तारपङ्क्तिः प्रथमा: प्रथमचितीको पादौ द्वादशाक्षरौ तृतीयचतुर्थावष्टाक्षरौ वा प्रस्तारपङ्क्तिरित्युच्यते । आद्यौ चेत्प्रस्तारपङ्क्ति रति वचनात् । अत्र चतुर्थी नवाक्षरत्वेनैकाधिका । सहजदक्षिणे गर्भचिराचादावहोने त्रिमुले साङ्ख्या गौर्द्वौ पञ्चलमाग्नापणे आग्निप्रेष्यस्या विनियोगः इडे रन्तहव्येत्यस्या कुसरुविन्दुऋषिर्गोदेवता दक्षिणे कर्णे यजमानकर्तृके जपे विनियोगः ॥

विनः शामो भारद्वाजऐन्द्रोमनुष्टुभम् ॥

वि न इन्द्र मृधइतीमामृचं इन्द्रदेवतामनुष्टुभं भरद्वाजस्यापत्यशासऋषिरपश्यत् गवामयने महाव्रतसम्बन्धिऽहनि यजुष्कहोत्रस्या विनियोगः । उपयामेति सामोष्णिक् । एष तइति सामगायत्री । सर्वत्रोपयामेत्यस्य विनियोगएष तइत्यस्य सादने इति शेष । व्यूहेन छन्दः पूर्तिः ॥

वाचस्पतिंवै श्वकर्मणीं त्रिष्टुभम् ॥

शामो भारद्वाजइत्यनुवर्तते वैश्वकर्मणीमिति द्वितीयांतनिर्देशात् । वाचस्पतिं विश्वकर्माणमितीमामृचं विश्वकर्मदेवतां त्रिष्टुभं भारद्वाजः । शासऋषिरपश्यत् । महाव्रतएव पूर्ववद्विकल्पेन गृह्यकर्मणि विनियोगः आद्यपादो द्वादशकः । तेनैकाधिका । उपयाम सामत्रिष्टुप् । एष ते सामोष्णिक ॥

विश्वकर्मन्नैन्द्रो वैश्वकर्मणीम् ॥(१)

शासोभारद्वाजस्त्रिष्टुभं इत्यचाप्यनुवर्तते विश्वकर्मन्हविषेतीमामृचं त्रिष्टुभं ऐन्द्रीं इन्द्रदेवत्यां विश्वकर्मदेवत्यां च भरद्वाजपुत्रः शासऋषिरपश्यत् । यजुषोः पूर्वमन्त्रवत् । अत्र चतुर्थस्य व्यूहेन पूर-

(१) ऐन्द्रग्नौ वैश्वकर्मण्यौ इति काण्वसंहितानुक्रमपाठः ॥

यत् । मध्यमे तस्मै अङ्गयङ्गिने विश्वेभ्य विनियोगः । तथा च सूत्रम् । गृह्णं गृह्णाति वि मऽइद्र वाचस्पतिं विश्वकर्मन्निमं वातिवाजमदिति ॥

अग्नये त्वा देवाधीपयदाभ्यदेवत्यानि ॥

अग्नये त्वा गायत्रच्छन्दसमित्यादीनि चत्वारि यजूंषि देवधीषि देवा एषां ऋषयइत्यर्थः । तथा अदाभ्यदेवत्यानि । अदाभ्यसंज्ञा अङ्गएषां देवतेत्यर्थः । तत्र सोपयामस्याग्नये त्वेत्यस्य प्राजापत्या बृहती तत्राविधस्येवेन्द्रायत्वेत्यस्य व्यूहेन प्राजापत्याबृहती । सोपयामस्य विश्वेभ्यइत्यस्यैकोना सामजगती । अंशुग्रहे निग्राभ्या आसिञ्च तथांशुग्रहावधाने क्रमेण चयाचां विनियोगः अत्र प्रत्येकमुपयामेत्येतत्क्रेयं, उपयामः सर्वत्राविशेषादित्युक्तेः । अनुष्टुप्इत्यस्य दैवीजगती उच्चारणे विनियोग ॥

व्रेधीनां त्वा मौम्यानि ॥

अत्र देवाधीनीत्यनुवर्त्तते । प्रस्तावात् योग्यत्वाच । व्रेधीनामित्यादीनि विश्वेषां देवानामित्यन्तानि सौमदेवत्यानि । देवाधीषि च भवन्ति । तत्र तस्मै त्वा यज्ञायेत्यन्तानामाधवने विनियोगात्तस्मै तद्वत्तदन्यज्ञाये । उशिग्भवमित्यादीनां अंशूनां सोममध्ये प्रतिप्रस्थापे । व्रेधीनां । यजुःयजुषः । कुकुभानां सामगायत्री । भद्रानां । यजुस्त्रिष्टुप् । मदिन्तमानां मधुमत्तमानां सामगायत्र्यो शुक्रं त्वा ऋग्गायत्री ककुभर्ठ-रूपं ऋग्बृहती । एतत्पर्यन्तानामाधवने विनियोगः । तस्मैतं यजुषड्भिः । अदाभ्यहोमे विनियोगः छन्दोक्त्वम् । सामोष्णिक् । वशी त्वं । आसुरी गायत्री । यज्ञात्सखा ऋगुष्णिक् । एतेषामंशूनां प्रतिप्रस्थापे विनियोगः ॥ ३१ ॥

सवीत्यानन्दानामार्षम् ॥

ऋषीत्यानमध्येनाय तच्छन्दो ऽवसाने । सर्वेषां ऋषीत्यानमंत्राणां देवाद्यवयवत्वार्थः ॥

इह रतिः पशुदैवतम् ॥

इह रति रहरमध्वमित्येतत्पशुः पशुदैवतम् । प्राणापत्या बृहती प्राणाहार्ये आज्याहुतिहोमे विनियोगः ॥

उपमृजन् मुष्णिगाग्नेयी ॥

उपमृजं धरुणमित्येषा ऋगुष्णिक्छन्दस्का । अग्निदेवता । प्रथमो नमाक्षरः पंक्तिः स्वाहाकारेण स हृतहादशाक्षरा । द्वितीयोऽष्टाक्षरएव तेनैकाधिका । आज्याहुतिहोमएव विनियोगः ॥

मन्त्राय बृहती यजमानानामात्मस्तुतिः ॥

मंत्रस्य ऋदिधरमीत्येषा बृहतीछन्दस्का यजमानानामात्मस्तुतिः । अनया हि यजमानानामात्मास्तूयते अमृता अभूमेत्यादिना । अत्र प्रथमः समकः तृतीयपकादशकः । तृतीयो दशकश्चतुर्थो नवकः । इयं षट्त्रिंशदक्षरत्वाद्बृहती । आर्षी बृहती । अत्र पादाक्षरनियमाभावात् । मन्त्रस्य वैमाने विनियोगः ॥

युवन्नं पक्वक्षेप ऐन्द्रीमत्यष्टिं व्यवसानाम् ॥

युवन्नमिन्द्रदृंहयेतां इत्यृग्देवत्या भुरिगतिछन्दस्का व्यवसानसंज्ञयुक्ता पक्वक्षेपकर्षिरपश्यत् । दक्षिणस्य क्षविदृधीनस्याधीयं पार्श्वमिन्द्रक्रमणे विनियोगः । अष्टवक्षरा अत्यष्टिः । अत्र षट्वक्षरत्वात्तेन दृश्यना ॥

आद्योऽदृंहद्वैन्द्रापार्वतः ॥

युवन्नमित्यस्याद्योऽर्धर्चो ऐन्द्रापार्वतः इन्द्रापर्वतदेवता । व्यवसानं समाप्तम् । अथ सोमयागे नैमित्तिकान्युच्यन्ते ॥

परमेष्ठी नैमित्तिकान्याध्यायात् ॥

परमेष्ठ्यभिधीतइत्यादीनि आदध्यायात् अध्यायसमाप्तिपर्यन्तानि नैमित्तिकानि । सोमस्य नी यज्ञस्यास्तु सोमादक्षास्तु यज्ञाङ्गे विनाशे प्रायश्चित्तानी त्यर्थः । अथ तेषां साधारणऋषिमाह ॥

वसिष्ठ ऋषिर्वसिष्ठ ऋषिर्वसिष्ठ ऋषिः ॥

तेषां सर्वेषां परमेष्ठ्यभिधीतइत्याद्यध्यायसमाप्तिपर्यन्तानां वसिष्ठऋषिरित्यर्थः ॥

लिङ्गोक्तदेवतानि चतुस्त्रिंशत्तमं यत् ॥

तेषां नैमित्तिकानां मध्ये आदृश्यानि परमेष्ठ्यभिधीतइत्यादिसप्तिः प्रभृतइत्यन्तानि चतुस्त्रिंशत्सङ्ख्याकानि लिङ्गोक्तदेवतानि नैमित्तिकानि इमानि चतुस्त्रिंशदक्षराक्षपवाक्यानि चतुस्त्रिंशत्सु सोमादक्षास्तु यज्ञाङ्गविनाशनिमित्तासु नैमित्तिकाहुतिषु चतुस्त्रिंशदेवताभिधायीनि । तत्तदक्षरात्मकस्य सोमस्य तत्तद्देवताकपत्नीसंयुक्तराशि च । नत्वेते मन्त्राः तेनात्र छन्दः कल्पनेन प्रयुज्यते अतए "आतत्थ्ये संपदृश्येन मनसभिध्यात" इत्यादृश्यासु सर्वासु कण्डिकासु परमेष्ठिने स्वाहेति हुत्वात्परमेष्ठी हि मनस्तर्हि भवति प्रजापतिर्हि स मनस्तर्हि भवति प्रजो हि स मनस्तर्हि भवतीत्येवं सोमस्य तत्र तत्तदक्षरात्मकस्य तत्तद्देवताकपता श्रूयते । अतः परमेष्ठिने स्वाहेत्येव मादृश्यादेव मन्त्राः तेषां वसिष्ठऋषिर्लिङ्गोक्ता देवताः । तद्वरणमयाः च देवीजगत्यादिवं छन्दः कल्पनीयमितिभावः ॥

यद्योर्वैष्णवाक्षरो त्रिष्टुप् ॥

यद्योरोजसेत्येवा त्रिष्टुप वैष्णवाक्षरी विष्णुदेवत्यावक्षा देवते इत्यर्थः अथ द्वितीयः पादो दशाक्षरः । सेनैकोना । सोमस्य रसरूपस्य यमसक्षादन्यस्य स्वांसस्योपर्युदकोपसेचने विनियोगः ॥

देवां दिवमाशीर्लिङ्गोक्तदेवता ॥

देवां दिवमगन्वितीदं यजुर्यजमानाशीः यजमानस्याशीः प्रार्थनार्थो लिङ्गोक्तदेवता । दक्षदेवेत्यर्थः । दक्षकृथक्र ऐत्मस्य यजमानस्याङ्गस्य स्वीकरणाभिमर्शने विनियोगः । इमानि चत्वारि यजूंषि । तत्र देवान् । सामानुष्टुप् । मनुष्यान् एकाधिका जगत्यार्षी । पितॄन् । एकाधिका सामानुष्टुप् । यं कं च सामानुष्टुप् । अथ वा सप्तमस्थेयं पत्यष्टिरेका । न तु चत्वारि ॥

चतुस्त्रिंगद्वयमदेवत्या पङ्क्तिस्त्रिष्टुब्वा ॥

चतुस्त्रिंशे० अन्तस्तवदित्येषा घर्मदेवत्या पङ्क्तिछन्दस्का त्रिष्टुप्छन्दस्का वा । द्वाचत्वारिंशदक्षरत्वादिकल्पः । दृष्ट्या त्रिष्टुप् । दृष्ट्यधिकापङ्क्तिर्वा । अतएव ज्ञापकात्पङ्क्तावपि छन्दःसु उक्तसङ्ख्याक्षरछन्दस्यन्तराले अनुक्ताक्षरस्य यजुश्छन्दो विकल्पो ज्ञेयः । अधिकात्तरं पूर्वं छन्द. जनाक्षर वोत्तरमिति । आख्यातरे मङ्क्षीरमेदे आज्याहुतिहोमे इक्षा विनियोगस्तूक्तोऽस्ति ॥

यज्ञस्य यज्ञदेवत्या त्रिष्टुप् ॥

यज्ञस्य दोहइतीयं यज्ञदेवत्या त्रिष्टुपछन्दस्का । काम्याहुतिहोमे मन्त्रान्तरं यजमानवाचने विनियुक्ता ॥

आपवस्व सौमीं गायत्रीं नैध्रुविः कश्यपः ॥

आपवस्वेतीमामृचं सौमीं सोमदेवत्यां निध्रुवस्य पुत्रः कश्यपगोत्रिरपश्यत् । अत्र नैध्रुविः कश्यपइत्येव पाठः यतएवं प्रयतेरगिल्पः कश्यपः "कश्यपो नैध्रुवे कश्यपोनैध्रुविर्वाचष्टे" । सूयस्कोधरिकाकारोऽपि उद्गातृकर्तृके होमे विनियोगः इति प्रावचिन्नामि सम्प्रदाये ॥ २३ ॥ (१)

---

(१) प्राणाय मेऽदित्यारभ्य द्यावापृथिव्यम् । इत्यन्त काण्वसर्वानुक्रमे नवम्याः कण्डिकाया अत्र पाठः, स पाठः पूर्वोक्तत्वादत्र न लिखितः ॥

अथ वाजपेयः ॥

अथ वाजपेयशब्देन आख्यायते । वाजपेयस्याधारभूतादित्यं यजतइत्यर्थः । तच्च प्रथमं सर्वमन्त्रसाधारणमृषिमाह ॥

बृहस्पतेरार्षमिन्द्रश्च च ॥

वाजपेयमन्त्राणां सर्वेषां बृहस्पतिऋषिः इन्द्रश्च । उभावपि स्तुतिनौ ऋषी भवतः स बृहस्पतिः सवितारमेवेति तेनेन्द्रो यजतेत्युभयोः सवचात् । इन्द्रश्च वेति संहितामाश्रित्य पाठः । तत्त्विग्पक्षे ऋषिर्विकल्पः ॥

देव सवितः सावित्रो त्रिष्टुप् ॥

देव सवितः प्रसुवेत्येषा ऋक् सवितृदेवत्या त्रिष्टुप् सर्वेषां मन्त्राणां पुरस्ताद्व्याहृतिहोमे विनियोगः । इयमार्षी त्रिष्टुप् । अनियताक्षरपादयुक्तत्वात् । स्वाहेत्येतयजुः पूर्वमन्त्रस्य च ॥

ध्रुवसदमैन्द्राग्नि चीणि ॥

ध्रुवसदमित्यादीनि चीणि यजूंषि इन्द्रदेवत्यानि । तत्र ध्रुवसदं । प्राजापत्या त्रिष्टुप् । अग्नुवसदं त्वा । व्यूहेन ऋचां पङ्क्तिः, पृथिवि सदं । व्यूहेन पार्षी पङ्क्तिः । एष त इत्यासुर्यनुष्टुप् । पवायामध्यन्ते । पवायामैन्द्राणां सोमपदानां यजुषे क्रमेण विनियोगः ॥

अपाए रसदेवत्याऽनुष्टुप् ॥

अपाए रसमित्येषा रसदेवत्याऽनुष्टुप् । चतुर्थमैन्द्रयजुष यजुषे विनियोगः उपयामेति सामानुष्टुप् । एष ते आसुर्यनुष्टुप् ॥

यज्ञा लिङ्गोक्तदेवताऽनुष्टुप् ॥

यज्ञाजर्जाहुतयो इत्येषा लिङ्गोक्तदेवता अनुष्टुप् । यज्ञा यज्ञा देवतेत्यर्थः । पञ्चमस्य एन्द्रयजुष यजुषे विनियोगः । वसुधोः पूर्ववत् ॥

सम्पृचौ वसुवी ॥

सम्पृची इत्यस्यामे वसुवी त्रिष्टोभदैवते इति शेषः अथ संपृचो त्रिष्टोभे इति वा पाठः सोमपेऽसुराधवनयोर्देवते इत्यर्थः, अथ वा त्रिष्टोभदेवता इत्यनुवर्तते तदुक्तेवमाहवनं त्रियादित्यस्य सम्पृचौ इति । सम्पृचावित्यस्य धृतयोः प्रस्तारपंक्तिः । वसुस्त्रिष्टुभौ एते ॥

इन्द्रस्य रथः ॥

इन्द्रस्य वज्रोऽसीत्यस्य रथो देवता । रथादध्वरश्रिये विनियोगः आसुरीगायत्री ॥

वाजस्य पार्थिव्यतिजगतौ ॥

वाजस्य नु प्रसवइत्तीयमृक् । पृथिवीदेवत्याऽतिजगतीछन्दस्का पूर्णाहुतिसंज्ञस्य स्रुवस्य वेदिमध्ये नयने विनियोगः । द्वादशाक्षरपादत्रया अतिजगतीत्युच्यते । इयं तु दृष्टुना ॥

अन्धः पादः सावित्रः ॥

अन्धो अन्धस इति भवः पादस्तस्यां गौ देवः सवितेत्यर्थं सावित्रः सवितृदेवतः ॥

अप्स्वन्तरमृतदेवत्याऽनवसाना पुरउष्णिक् ॥

अप्स्वन्तरमृतमित्येषाऽप्सुदेवत्या अनवसानम् छित्वा पुरउष्णिक्छन्दस्का । अध्वरोपयने विनियोगः । यजाः आयजाहो इति त्रीक्षरः । द्वितीयावष्टाक्षरौ सा पुरउष्णिक् इत्युच्यते । आद्यावित्युरउष्णिगिति वचनात् । अस्य अन्तइत्येवं व्यूहेनाद्यपादे द्वादशाक्षरपूरणं । द्वितीयतृतीयौ तु पूर्वावेव । मध्येऽवसानं नास्ति । देवीरापइति व्यूहेन सामजगती आपोदेवताः । अध्वरोपयने सप्तकृत्वेव विकृतीनां विनियोगः ॥

वातो वा तिस्रोऽस्तुतयउष्णिक्त्रिष्टुब्जगत्य. ॥

यामो वा, मनो वा, वातरंहा वा, अयो यदग्नेनाग्निसूक्तः अ-
ग्नेर्यो विष्टुविष्टुभ्यत्वोऽयस्तुतयश्च । यथा चाभिः स्तुयन्ते । अग्नेर्हे
यथाः एताः स्तुतिभाजो देवता भवन्तीत्युक्तत्वात् । वातो वेत्युक्तिकृत्
ते ऋषिवाक्यांशके विनियोगः । वातो वेतीमेकाधिका चाग्नी-
षोमीय पादानामक्षरसङ्ख्यानियमेऽप्यक्षरसङ्ख्यातत्वात् । त-
दुक्तम् । अक्षराख्ये च सर्वत्र निमित्तं बलवत्तरम् । इत्यादिस्तुतिपङ्क्ता
पादहस्ताक्षरैर्ज्ञेयमिति, वातरंहा इत्यत्र प्रथमद्वितीयौ द्वादशकौ ।
द्वितीयौ व्यूहेनैकादशकः चतुर्थश्च स्वतोऽप्येकादशकइति । तत्रान्त्यं
विष्टुबेव कुतः । द्वौ तु जगतौ यथाः "स्याज्जगते जगती चेष्टुभे
त्रिष्टुबित्युक्तत्वात्" । अयो यदग्नेत्यादयो द्वादशकः । द्वितीयतृतीयौ-
वेकादशको चतुर्थश्चतुर्दशकइति । तेनाष्टावत्रिंशदक्षरत्वाद्विराड्ज-
गती । अभियतेत्यक्षरपादत्वे पादाक्षरैक्यात्वात् ॥

वाजिनोऽश्वाः ॥

वाजिनो वाजजितइत्यष्टाक्षटदेवताः । सामजगती अध्वानां-
वाईत्यस्यार्चमेधयुरात्रेये विनियोगः ॥

देवस्याहं लिङ्गोक्तानि ॥

देवस्याहठं-मदितुरित्यादीनि हविरुक्षणैर्वाजिनो वाजं जेष्यतिलक्ष-
णानि लिङ्गोक्तदेवतानि । आद्यस्य देवस्याहं इत्यस्य व्यूहेन जगतीछ-
न्दस्कत्वे वाजपेये ब्रह्मणो रथचक्राक्षरत्वे विनियोगः । द्वितीय-
स्य सामजगतीछन्दस्कत्वे वाजपेये ब्रह्मणो रथचक्रारोहणे वि-
नियोगः । तृतीयस्यव्यूहेन प्राजापत्या त्रिष्टुप् । वाजपेये
ब्रह्मणो रथचक्रादवतरणे विनियोगः । चतुर्थश्च एकाधिका साम-
जगती । अभियजने रथचक्रादवरोहणे विनियोगः । वृहस्पते वाजं

प्राजापत्या त्रिष्टुप् । प्राजापत्ये दुन्दुभिवादने विनियोगः । इदं वर्षं सामपङ्क्तिः । प्राजापत्ये दुन्दुभिवादने विनियोगः । एषा वः प्राजोऽधिष्वक् । प्राजापत्ये मन्थनदण्डदुन्दुभ्यवतारणे विनियोगः । ऐन्द्र्याऽहं । ऐन्द्रेण प्राजापत्या त्रिष्टुप् । अन्नाद्यकाम यजमानस्य यजुर्मुखकरणारोहणे विनियोगः ॥

वाजिनोऽग्नाः ॥

वाजिनो वाजजितस्त्वष्टाग्ना देवताः । सामजगती यजमानवाचने विनियोगः ॥

एष स्य हे दधिक्रावा वामदेव्योऽग्नदेवत्ये जगत्यौ ॥

एषऽस्य वाजी । उतत्वाऽस्य । इतौमे द्वे ऋचौ जगत्यौ अग्नदेवत्ये दधिक्रावा वामदेव्योऽपश्यत् । आज्याहुतिहोमे विनियोगः । अनु संचरे वा प्रथमायाश्चतुरः पादो द्व्याक्षरः तस्य ऐन्द्राभ्यां पूरणं । द्वितीयायाश्चतुर्थस्य ऐन्द्रेण पूरणं । स्वाहेति यजुःपूर्वक् ॥

अग्नो वसिष्ठो विराजम् ॥

अग्नदेवत्यामित्यनुवर्त्तते अग्नो भवन्त्वितीमां विराट्छन्दस्यां वसिष्ठऋषिरपश्यत् । अग्ना अग्न्यादय एव देवताः । होमेऽनुमन्त्रे वा (१) विनियोगः । अग्ना द्व्याक्षराश्चत्वारः पादाः सा विराट्पङ्क्तिः, वैराजेवं दाक्षिणुत्रेः । अत्र तु प्रथमपादाद्व्याक्षरः तनेकाधिका ॥

तेनो नाभानेदिष्टो जगती ॥

अग्नदेवत्यामित्यनुवर्त्तते तेनो नाभर्वन्त्विदमां अग्नदेवत्यां जगतीं नाभानेदिष्टऋषिरपश्यत् होमेऽनुमन्त्रणे वा विनियोगः ॥

वाजेवाजे वसिष्ठस्त्रिष्टुभम् ॥

वाजेवाजेऽवत इतीमामग्नदेवत्यां त्रिष्टुभम् वसिष्ठोऽपश्यत् । अ-

(१) होमे दाने वा विनियोगः । इति पङ्क्तिपाठः ॥

देवत्यानित्यन्तानुवर्त्तते । त्रिष्टीछन्दसावेव विनियोगः । अन्त्यस्य बार्हतस्य पूर्ववत् ॥

आसा प्राजापत्यम् ॥

वसिष्ठक्षत्रभृदित्यनुवर्त्तते । आसा वाजश्चेतीमान्त्यं प्रजापतिदेवत्यं वसिष्ठक्षत्रविरूपवत् । यजमानस्य नेवारभ्यांजन्ये विनियोगः ॥

वाजिनोऽग्नेः ॥

वाजिनो वाजजितस्त्वस्य यजुषोऽग्नेर्देवताः आर्षी त्रिष्टुप् । अग्नेर्मुखाभ्यामाग्नेयाभ्यां वर्हिर्यजमानवर्हिरवद्यति विनियोगः ॥ ३४ ॥

आयुर्यज्ञेनेत्यादीनि प्राजापत्यानि ॥

आयुर्यज्ञेनेत्यादीनि द्वादश यजूंषि । आयुर्यज्ञेनेत्यादीनि च षड्यजूंषि प्रजापतिदेवत्यानि पूर्वे वाचने वा विनियुक्तानि । प्रथमद्वितीययोर्देवी पङ्क्तिः तृतीयस्य यजुर्गायत्री । ऋतवे देवीपङ्क्तिः । वनये देवपङ्क्तिः अष्टपर्वतये । देवीजगती, अष्टमे देवीजगती । सुत्याय यजुः पङ्क्तिः, विनर्ठं- त्रिने । यजुस्त्रिष्टुप् । अन्त्याय । यजुर्बृहती । भुवनस्य । यजुर्बृहती । अधिपतये देवीजगती वर्षां प्राजापत्या गायत्रीछन्दः ॥

प्रजापतेः स्वरसृता यजमानः ॥

प्रजापतेः प्रजाः स्वदेवाः । अस्रताग्नेस्त्वेतेषां यजमानोदेवताः । प्रजापतेर्यजुर्बृहती वृषाग्नेऽन्ये विनियोगः । अन्ये यजुर्गायत्री सोमस्यधनञ्जयाख्यस्य विनियोगः । अमृता यजुर्गायत्री ग्रीष्मर्तू वृषाग्नेरित्यस्य विनियोगः ॥

अग्ने दिवः ॥

अग्ने दीदिवस्त्वेत्यस्य दिवो देवताः । अग्नेर्यजुर्जगती दिवाग्नी-

पदे विनियोगः ॥

नमः पृथिवी ॥

नमो मात्रे इत्यस्य पृथिवी देवता सामोष्णिक्छन्दसी पृथिवीसोमः । व्यूहेन सामत्रयतो । द्विरोष्णिक्त्रयम् ॥

इयमासन्दी ॥

इयं ते राद्धिरासन्दी देवता । देवीबृहतीमासन्दीं वर्मालङ्कारे विनियोगः ॥

यन्ता सुन्वन् ॥

यन्ताऽसि यमनऽइत्यस्य सुन्वन्देवता । यजमानस्योपवेशने विनियोगः । व्यूहेन ऋग्बृहती ॥

वाजस्य प्राजापत्यं तृचं त्रैष्टुभम् ॥

वाजस्येमं प्रसवः । वाजस्येमां । वाजस्य नु प्रसवऽतीदं यूपं प्रजापतिर्देवतं त्रिष्टुप्छन्दस्कं । सर्वाभ्यस्य सर्वौषधस्य होमे विनियुक्तम् । वाजस्येमामित्यस्य द्वितीयपादो व्यूहेन पूरणीयः प्रथमाया द्वितीयाया वाऽपि चतुर्थीहादयाचरः । तृतीयायाश्चतुर्थीवच्च । तेन सर्वाभिरुक्तीक्षाः ॥

सोमन्तृचं तापसः ॥

सोमं राजानं । अर्यमणं, अग्ने अच्छेतीदं यूपं तापसऋषिरपश्यत् । सर्वौषधहोमस्य विनियुक्तम् ॥

आद्या वैश्वदेव्यनिरुक्ताऽनुष्टुप् ॥

अस्य यूपस्याद्या सोमं राजानमित्येषाऽनुक्रमणिकादेवदेवताभिरुक्ता मध्ये विश्वदेवपदप्रयोगयुक्ता अनुष्टुपछन्दस्का । अस्य तृतीयः समाप्तः । तेनैवोक्ता । अथ वा खड्गदेवतत्वाद्वैष्णवदेवीत्युक्तं । तथा च ब्राह्मणं: "यज्ञो विष्णुस्तृच्छद्रूपं तदेवदेवानां खानं युज्यतइति" । तेना-

च सौमाग्यादित्य विष्णुसूर्यब्रह्मबृहस्पतयो देवतास्तस्यैः । अतएव वैदिताभाषी । सौमं राज्ञामनुष्टुप् लिङ्गोक्तदेवतेत्युक्तं । अएवमंहिताभाषीऽपि लिङ्गोक्तदेवत्यानुष्टुबिति ॥

द्वितीया लिङ्गोक्तदेवता ।

अनुष्टुबित्यनुवर्तते । अस्य यजुषश्च द्वितीया अर्यमणमित्येषाऽनुष्टुप् । लिङ्गोक्तदेवताः । अर्यमबृहस्पतीद्वायुविष्णुसरस्वतीदेवतेत्यर्थः ॥

तृतीयाऽग्नेयी ॥

अनुष्टुबित्यनुवर्तते अस्य यजुषश्च तृतीया अग्नेऽअच्छेत्येषाऽनुष्टुबग्निदेवत्या ॥

अग्नो लिङ्गोक्ता गायत्री ॥

अग्नो यच्छत्वित्येषा लिङ्गोक्तदेवतार्यमबृहस्पतिवायुदेवतेत्यर्थः । गायत्रीछन्दः । सर्वोषधस्य होमे विनियोगः अस्य प्रथमस्य यूपेन पूर्तिः ॥

सरस्वत्यै मनुष्वत् ॥

सरस्वत्यै यशइत्यस्य सूक्तस्य देवता प्राजापत्यानुष्टुप् । देवस्य त्वेत्यस्य तूष्णम् । होमयोरेव यजमानाभिषेके विनियोगः ॥

अग्निःसप्तदश लिङ्गोक्तदेवतानि ।

अग्निरेकाक्षरेत्यादीनि प्रजापतिः सप्तदशाक्षरेत्यन्तानि लिङ्गोक्तदेवतानि यस्य खविष्णुसोमादिदेवतानीत्यर्थः । होमे वापने वा एषां विनियोगः । तत्राग्निरेकाक्षरेत्येकोना ऋङ्गायत्री । अग्निदेवता । अश्विनौ देवता । सामानुष्टुप् । विष्णुः । एकोनाऋङ्गायत्री । विष्णुर्देवता । सोमः सोमो देवता । सामानुष्टुप् । पूषा । पूषादेवता । एकाधिकाऋङ्गायत्री सवितादेवता गायत्री । मरुतः मरुतोदेवता ऋग्यजुषी । बृहस्पतिः बृहस्पति-

देवता: एकाधिकाऽऽर्च्गायत्री । मित्र: मित्रोदेवता सामपङ्क्ति: । वरुण: वरुणोदेवता । ऋग्गायत्री । इन्द्र: इन्द्रोदेवता । एकाधिकाऽऽर्च्गायत्री । विश्वे देवा: । विश्वेदेवता: सामपङ्क्ति: । बृहस्पति: । बृहस्पतिर्देवता: सामबृहती । वसव: । वसवो देवता: सामबृहती । रुद्रा: । रुद्रा देवता: । एकोना सामबृहती । आदित्या: आदित्या देवता । एकोनासाम्नीबृहती । अदिति: अदितिर्देवता । सामत्रिष्टुप् । प्रजापति: । प्रजापतिर्देवताएकाधिकासामजगती । इति वाजपेय: समाप्त: ॥ ३५ ॥

अथ राजसूय: ॥

वाजपेयादिरित्येव: । राजसूयपदेन तन्मन्त्रा उच्यन्ते ॥

वरुणसवार्षम् ॥

राजसूयमन्त्राणां सर्वेषां वरुणसवादिरित्यर्ष: ॥

एष ते पार्थिवम् ॥

एष ते निर्ऋतइत्येतद्यजु: पृथिवीदेवतं । सामोष्णिक् । वरुणसवोमे विनियुक्तम् ॥

अग्निनेत्रेभ्यो देवार्षमाध्यायात्तद्याज्यानि दैवानि ।

अग्निनेत्रेभ्यइत्यादीनि दश यजूंषि दैवानि देवदेवत्यानि । वरुणसवीयहोमे विनियुक्तानि । अग्निनेत्रेभ्य: सामोष्णिक् । यमनेत्रेभ्य: आसुरीगायत्री विश्व देवनेत्रेभ्य: सामानुष्टुप् । मित्रावरुणनेत्रेभ्यो देवेभ्यइत्यक्षिण्यपत्ये ऋग्गायत्री । मरुन्नेत्रेभ्यो देवेभ्यइत्यक्षिण्यपत्ये तु । आसुरीगायत्री । सोमनेत्रेभ्य: । एकाधिका ऋग्गायत्री । ये देवा अग्नि: आसुरीगायत्री, ये देवा यमनेत्रा: । सामानुष्टुप् । ये देवा विश्वदेवनेत्रा: । एकधिका सामानुष्टुप् । ये देवा मित्रावरुणनेत्रा उत्तरावइत्यक्षिण्यपत्ये । एकाधिका ऋग्गायत्री । ये देवा मरुन्नेत्रा उत्तरावइत्यक्षिण्यपत्ये सामानुष्टुप् । ये देवा: सोमनेत्रा: । साम-

षड्विंशः ॥

अग्ने सहस्व देवयवा देववातश्च भारतावाग्नेयीसप्तदशभम् ॥

भरतसूनो देवयवा देववातश्चेतिद्वावृषी अपश्यतां दृष्टवन्तौ ऋष्यादिनी विनियोगौ ज्ञेयाः । अत्र द्वितीयः सप्ताक्षरस्त्रैष्टुभो ना ॥

उपाएयोस्त्रीणि रथोघ्नानि ॥

उपाए योर्यैर्येत्यादीनि त्रीणि यजूंषि रथोघ्नानि ॥ रथोघ्न देवता । उपाए योरित्यस्य आसुरी गायत्री । होमे विनियोगः । रथसां त्वा । यजुरवधिक् कुर्वन्निरसने विनियोगः । अवधिष्म यजुर्गायत्री आसनने विनियोगः अवधिषाम् । दैवीषड्जिः, अन्यो हुतो यजुर्बृहती । अनयोर्मन्त्रयोः प्रत्यभिचारे विनियोगः तत्रानुष्टुभावित्यनयोः पादयो स्त्रानं यदुताहोः रथम् ॥

सविता ते यजमानः ॥

सविता त्वा, इमं देवा इत्यनयोर्यजमानो देवता यजमानश्च दक्षिणं खादिरं यष्टीत्वाध्वर्योर्जपे विनियोगः । सविता त्वा यतिर्जगती । इमन्देवा अत्यष्टिः ॥ ३६ ॥

आपो देवा आपो त्रिष्टुप् ॥

आपो देवा मधुमतीरितीयमृक् । आपो आपोऽग्ना देवता इत्यर्धं त्रिष्टुप्छन्दः । द्वितीयो दयावरः । तैनैकोना । सारस्वतीणां मयां यज्ञे विनियोगः ॥

इष्णन्त्सर्मिषिन्द्रोक्ता ॥(१)

अथ इष्णन्त्सर्मिरित्यादीनां स्वाहाकारान्तानां पूर्वपूर्वमन्त्राणां यष्टीसमाचाजपत्नु चतुर्थीसहोमे विनियोगः, उत्तरोत्तर

(१) काण्वसर्वानुक्रमे देवतानीत्यधिकः पाठो नेष्यः ॥

अग्नाधामपां वह्नये तप इड्यजुभिः । सामानुष्टुभौ । इडयेभो इति अक्षरगायत्र्यौ । वर्हसस्त्र सामोष्णिहौ । ओजस्वतीस्त्र । आसुरी-गायत्र्यौ । आपः परि । ब्रह्मायत्र्यौ । अपां पतिः सामानुष्टुभौ । अपां गर्भः आसुरगायत्र्यौ । सूर्यस्त्वचसः स्त्र सामानुष्टुभौ । सूर्यव-र्चसस्त्र । सामानुष्टुभौ मांदाग्नस्त्र आसुर्यनुष्टुभौ । ब्रह्मचित्तस्त्र आ-सुरगायत्र्यौ । वाशास्त्र आसुरानुष्टुभौ । ग्रहिंडाग्नस्त्र । सामोष्णिह-ग्नौ । जनभृतस्त्र आसुरगायत्र्यौ । विश्वभृतस्त्र आसुरगायत्र्यौ । आपः अरात्रस्त्र । सामानुष्टुप् । मरीचीनां सर्वाक्रम्यङ्गसंस्त्रवे विनियोगः ॥

मधुमतीरगाधृष्टाऽग्नये ॥

मधुमतीर्मधुमतीरगाधृष्टाः सौदतेत्येते यजुषी आपे अनयोरा-पो देवताश्चर्थः मधुमतीरित्यस्त्र एकोनासामजगतो । अष्टादश-संख्यानामपामोदुम्बरे पात्रे समिधेके विनियोगः । अगाधृष्टाश्चस्त्र सामनिष्टुप् । समाखिन्नानामपां मैत्रावरुणधिष्ण्यस्त्र पुरस्तात्प्रत्याह-रणे विनियोगः ॥

सोमस्त्र धर्म ॥

सोमस्त्र त्विषिरसीत्यस्त्र धर्म देवता । आसुरीगायत्री । आश्वि-नोत्तरवेदि विनियोगः ॥

अग्नये त्रिकपालानि ॥

अग्नये स्वाहेत्यादीनि द्वादश यजूंषि त्रिकपालदेवतानि पार्वणेष्टौ विनियुक्तानि । वयाचां देवीपङ्क्तिः सरस्वत्यै । बसुगायत्री । पूष्णे देवीबृहती । । इडायत्यै । देवीजगती । इन्द्राग्नेत्याद्याः षट्देवत्यपङ्क्तयः पवित्रे स्थस्त्यस्त्र तूष्णीम् ॥

अग्निभृष्टमापम् ॥

अग्निभृष्टमसीत्येतद्देवतं । एकाधिका सामजगती । अपां ऊ-

अवभृथे विनियोगः ॥

सधमादो बार्हती निष्टुप् ॥

सधमादो द्युम्निनीरितीयमृक् बृहतीदेवता निष्टुप्छन्दः धैव इतीयमृतुमयोर्भूम्ना पूरणम् । अभिषेचनीयेषु यागेष्वयं आनयने विनियोगः ॥

अवस्य चतुर्थी तार्प्यपांह्वाधीवामोष्ठीवाणि ॥

अवस्योल्वमित्यादीनां चतुर्थी यजुषा क्रमेण तार्प्यपांह्वाधीवामोष्ठीवाणि देवताः अवस्योल्वं तार्प्यदेवता । यजुर्गायत्री । तार्प्यपरिधाने विनियोगः, अवस्य पराच्यसीत्यस्य पांह्वदेवता । देवीजगती । पांह्वपरिधाने विनियोगः, अवस्य वोनिरित्यस्याधीवाद्योदेवता । देवीजगती । अधिवासयतिसाके विनियोगः । अवस्य नाभिरसीत्यस्योष्ठीवं देवता । देवीजगती । उष्णीषस्य संवेष्ट्य निधीकरणमूहने विनियोगः । नाभिदेशे परिहरणे वा विनियोगः ॥(१)

इन्द्रस्य धनुः ॥

इन्द्रस्यार्ष्णमसीत्यस्य धनुर्देवता । धनुरातते विनियोगः । प्राणापत्यागयजी ॥

मित्रस्य बाहू ।

मित्रस्यासीत्यस्य बाहूदेवते । यजुर्बृहती । धनुः कोट्योर्मौर्वणे विनियोगः ॥

त्वया धनुः ॥

त्वयायं हृषमित्यस्य धनुर्देवता देवीजगती । धनुषाऽऽयाय धनुः समर्पणे विनियोगः ॥

---

(१) तार्प्यं नाम क्षौमं वस्त्रं घृतान्नवस्त्रं वा, पांह्वं रक्तकम्बलं, अधीवासं कञ्चुक इत्येतेऽर्थाः सम्यक् महीधरार्याभ्यां प्रतिपादिताः ॥

इवा यज्ञाभिपवः ।।

इवाऽसीत्यादीनां दिग्भ्यः पात्रेत्यन्तानां यज्ञा यजुषां इषवो देवताः । इवाऽसि, वसाऽसि, चुमाऽसीति यज्ञाद्यां देव्यनुष्टुप्छन्दस्यन्तयज्ञाभिपवणादाने क्रमेण विनियोगः । पात्रेत्यं प्राक् । देवीपञ्चमि पात्रेत्यं प्रत्यक्षं यजुर्गायत्री । दिग्भ्यः देवीबृहती । क्रमेण सिनीवालिसिनीवालीसमर्पणे विनियोगः ॥

आविः प्राजापत्यम् ।।

आविर्मर्यादित्येतत्प्राजापतिदेवतं । देवीबृहती । वाचने विनियोगः समानम् ॥

पराणि लिङ्गोक्तानि ॥

अग्नात्पूषोत्तादाविर्मर्या इत्येतस्मात्पराणि मन्त्रे पठ्यमानानि आविस्तोऽग्निरित्यादीनि लिङ्गोक्तदेवतानि । अग्नीद्रादिलिङ्गोक्तदेवतानि । आविस्तोऽग्निर्यजुर्बृहती । आविस्ते । आसुर्यनुष्टुप् । आविस्ता ।यजुर्बृहती । सर्वेषां वाचने विनियोगः ॥ १७ ॥

अवेष्टा दन्दशूकाः ॥

अवेष्टा दन्दशूकाः इत्येतत्यजुर्मृत्युनामनं । देवीजगती केशवाद्ये होमद्रव्यप्रक्षेपे विनियोगः, प्राजापत्यं यजुः मृत्युनाम्नि विनियुक्तमिति-क्रम संहिताभाष्ये ॥

प्राची पञ्चानां यजमानः ॥

प्राचीमारोहेत्यादीनां वर्षीद्रविणमित्यन्तानां पञ्चानां यजुषां यजमानो देवता । वाचने विनियोगः । प्राची व्यूहेन प्राजापत्या जगती । द्रविणा । ऋचां पङ्क्तिः, प्रतीची । व्यूहेन प्राजापत्या जगती । उदीची । ऋचां पङ्क्तिः, । ऊर्ध्वा । त्रैष्टुभमैन्द्रम् ॥

प्रत्यक्षं मारुतम् ॥

प्रजापतेनमुचेरित्येतदाद्यस्य देवतं ॥ प्राजापत्यानुष्टुभी । गान्धारेण स्वीसनिरसने विनियोगः ॥

स्वत्वोरोजोऽसि वज्रः ॥

स्वत्वोः पाहि । ओजोऽसि, सहोऽसीत्यनयोर्यजुषोरुक्तोदेवता । स्वत्वोरित्यस्य दैवीबृहती वज्रस्याधः पदं करणे विनियोगः ओजोऽसीत्यस्य यजुषः पङ्क्तिः वज्रस्य शिरसि करणे विनियोगः ॥

हिरण्यरूपौ मैत्रावरुणौ विष्टुब्यनुरुष्णा ॥

हिरण्यरूपा उषसश्चेत्येषा ऋङ्मित्रावरुणदेवत्या विष्टुप् । अथ द्वितीयौ द्यौश्चरेत्येतौ द्वौ त्रा यजुरुष्णा । अक्षाक्षन्ते मिषोऽसीत्येतद्यजुस्तस्य देवाजगती छन्दः । बाहोर्बृहद्यद्वाहवे विकल्पेनाक्षद्यूयोर्विनियोगः ॥

सोमस्य सुन्वन् ॥

सोमस्य त्वेत्यादीनां ब्राह्मणानां राजेत्यन्तानां सुन्वन्यजमानो देवता । अभिषेके विनियोगः । अथाभिषिञ्चामि अथाधां अथपतेरैधीत्यनयोश्चतुर्ष्वपि मन्त्रेष्वनुषङ्गः । अनुषङ्गस्य च वैदिकत्वात्प्रत्याचारमध्ये मन्त्रं कार्यं तत्र सोमस्य त्वा व्यूढ्यै त्वाङ्गिरसी । अग्नेर्भ्राजसा व्यूढ्यै सामजगती । सूर्यस्य वर्चसा सामजगती । इन्द्रस्येन्द्रियेण सामजगती । इमन्देवाश्चेत्यस्य तु प्रागुक्तं । अथाभिषेके विनियोगइति विशेषः ॥

प्रपर्वतस्याग्नो विष्टुप् ॥

प्रपर्वतस्येत्येषा ऋक् अग्नेदेवत्या विष्टुप् । अक्षूक्षयन्त्याभिषेके प्रक्षिण्वने विनियोगः ॥(१)

विष्णोस्त्रीणि लिङ्गोक्तानि ॥

(१) प्रक्षेपने इति पदपाठेपाठः ॥

विष्णोर्विक्रमणमसीत्यादीनि चीणि यजूंषि त्रिष्टोभानि । यज-
मानदेवतानीत्यर्थः । आयुश्च प्राजापत्यागायत्री । ततो देवीजगती ।
ततो देवीत्रिष्टुप् यजमानस्य धर्मणि त्रिविक्रमणे विनियोगः । य-
थार्थो क्रमेण ॥

प्रजापते न त्वदेतान्येवा त्रिष्टुप्यनुर्मध्याऽदममुष्य-
दनुः ॥

प्रजापते न त्वदित्येवा त्रिष्टुप् । प्रजापतिदेवता तथा यनुर्मध्या च-
त्वारिष्टोभी मध्येऽतीयचतुर्थपादयोरन्तराले यजुरस्तीत्यर्थः । किं-
न्तद्यजुरित्यपेक्षायामाह । अयममुष्य यजुः अयममुष्य पिता सायण
पितेत्येतावदेव तद्यजुर्मध्ये वर्त्ततदित्यर्थः । अत्र प्रजापते न इति त्रि-
ष्टुभि प्रथमः पादो व्यूहेन पूरणीयः । चतुर्थस्तु दृश्यतः । तेनैवो-
नो । यागाद्यार्थहोमे विनियोगः ॥

रुद्रस्य यद्रौद्रम् ॥

रुद्र यत्ते इत्येतद्रुद्रदेवतं । सामत्रिष्टुप् अभिषेकोदकग्रहणाचामा-
ग्नीध्रीये होमे विनियोगः ॥ ३८ ॥

इन्द्रस्य लिङ्गोक्तानि ॥

इन्द्रस्य वज्रोऽसीत्यादीनि समिन्द्रियेणेत्यन्तानि लिङ्गोक्तदेवतानि ।
तत्र इन्द्रस्य वज्रोऽसि रथोदेवता । यजुर्गायत्री । यथास्थानावतारणे
विनियोगः । मित्रावरुणयोर्मैत्रस्य रथोदेवता । सामानुष्टुप् ।
रथयोजने विनियोगः । अश्वयाये त्वा । सामोष्णिक् । रथो देवता ।
यजमानस्य रथारोहणे विनियोगः । मरुतां । भुवोदेवता । यजुर्बृह-
ती । दृष्टिवर्धयाजने विनियोगः । आपाम यजमानोदेवता । य-
जुर्गायत्री । गवां मध्ये रथस्थापने विनियोगः । समिन्द्रियेण । य-
जमानोदेवता । देवीपङ्क्तिः यजमानस्य धनुरात्मा गोवधकर्मणि

विनियोगः ॥

मा ते सँवरण्यः प्राजापत्यऐन्द्रीं त्रिष्टुभम् ॥

मा ताद्रुद्र ते वयमिति सौमाश्वमिन्द्रदेवतां त्रिष्टुपछन्दस्कां प्रजापतेरपत्यं साधारण्यऋषिरपश्यत् । अत्र प्रथमो दशकः । द्वितीयो द्वादशकः । तृतीय एकादशकः ॥ चतुर्थो व्यूहेनैकादशकवृत्ति । एवञ्चात्रःपात्यदेये प्राजापत्ये विनियोगः ॥

अग्नये लिङ्गोक्तानि ॥

अग्नये गृहपतयस्त्वादीनि चत्वारि यजूंषि लिङ्गोक्तदेवतानि एवविनोचनीयहोमे विनियुक्तानि । अग्नये । सोमाय वनुः पवित्रः मदतां, इन्द्रस्येति, ॥ प्राजापत्ये गायत्र्यौ ॥

पृथिवि मातर्भूमिः ॥

पृथिवि मातरित्यस्यभूमिर्देवता । भूम्यवेक्षणे विनियोगः भारद्वाजो-ष्णिक् ॥

इठं०सो वामदेवः सौरीए सप्रपञ्चपरब्रह्माभिधायिनीमतिजगतीम् ॥

इठं०सः शुचिषदितीमामृचं सूर्यदेवतां सप्रपञ्चस्य परस्य ब्रह्मणोऽभिधायिनीमभिधात्रीमतिजगतीछन्दस्कां वामदेवऋषिरपश्यत् । एवादवरोहणेष्वा विनियोगः अत्र प्रथमद्वितीयौ द्वादशकौ । तृतीयएकादशकः । चतुर्थश्चतुर्दशकवृत्ति । तेन जगतीमतिक्रान्ताधतिजगती । एकाक्षराधिक्या जगतीत्यर्थः । न तु द्वादशाक्षरा ॥

इयदसीत्यस्य शतमानौ ॥

इयदसीत्यस्य युङ्क्ष्वेत्यस्य च शतमानौ देवते । शतमानयोरुपस्थाने विनियोगः । इयदसीति देवसुवौ द्वादशाक्षरे सामयजुषौ । शतमानयोरुपस्थाने विनियुक्ते ॥

ऊर्गसि प्राणा ॥

ऊर्जस्वलसीत्यस्य प्राणादेवता । प्राजापत्या गायत्री । प्राणोपस्थाने विनियोगः ॥

इन्द्रस्य बाहू ॥

इन्द्रस्य बाहूरित्यस्य बाहूदेवते । व्यूहेन त्रिष्टुप् । पक्षाभ्यां यजमानबाहूरवहरणे विनियोगः ॥

ओनाऽस्यासन्दी ॥

ओनाऽसीत्यस्याऽऽसन्दीदेवता । देवीजगती आसन्दीनिधाने विनियोगः ॥

उपस्थाधोवासम् ॥

उपस्थ ओनिरसीत्यधीवासोदेवता । अधीवासोपास्तरणे विनियोगः देवीजगती ॥

ओनाः सुन्वन् ॥

ओनाम.सीदेत्यस्य सुन्वन्देवता । एकाधिकाष्टपदा.यत्री । यजमानस्यासन्युपवेशने विनियोगः ॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुः ॥

निषसादेतोमांमृच वरुणदेवतां गायत्रीं धृतव्रतो ग्रहपतिरपश्यत् । अत्र प्रथमोऽष्टकः द्वितीयः षट्कः । तृतीयः सप्तकः । तैनेयं वर्द्धमाना गायत्री । यस्मात्तु षट्सप्तकाष्टकाः सा वर्द्धमानेति वचनात् ।
अथ वा याकुप्यती सञ्ज्ञा गायत्री । यस्या एकः पादः षडक्षरः सा याकुप्यतीत्युच्यते । षट्केककुप्यतीति पिङ्गलोक्तेः" यजमानस्योपवेशनेविनियोगः ॥

अभिभूरस्येषा यजमानो वा ॥

अभिभूरसीत्यस्य यजुषी एषादेवता यजमानो वा । सामोच्चि-

क्। अचार्यां यजमानहस्ते आवपे विनियोगः ॥

ब्रह्मासित्वमामन्त्रणानि प्रश्नलिङ्गोक्तानि ॥

ब्रह्मासित्वं ब्रह्मासीत्यादीनि प्रश्नसङ्ख्यान्यामन्त्रणानि लिङ्गोक्तदेवतानि। ब्रह्मन्निति ब्रह्मदेवतात्वं ब्रह्मासीति प्रतिवचनानि यजमानदेवतानीत्यर्थः प्रश्नप्रतिवचनेविनियुक्तानीत्यर्थः तत्र ब्रह्मन्नित्यस्य ब्रह्मादेवता दैव्युष्णिक्छन्दः। ब्रह्मामन्त्रणे विनियोगः। त्वं ब्रह्माऽसि सविताऽसीत्यस्य यजमानोदेवता । आसुर्यनुष्टुप्। त्वं ब्रह्माऽसि वरुणोऽसि यजुस्त्रिष्टुप् । त्वं ब्रह्मासीन्द्रोऽसि यजुर्बृहती। त्वं ब्रह्माऽसि रुद्रोऽसि । यजुःपङ्क्तिः। त्वं ब्रह्माऽसीत्येतावदेवपञ्चमे प्रतिवचनं । तत्र देवी बृहती। सर्वेषां यजमानो देवता। ब्राह्मणप्रतिवचने विनियोगः ॥

इन्द्रस्य स्फ्यः ॥

इन्द्रस्य । वज्रोऽसि तेन मे इत्यस्य स्फ्यो देवता। यजुस्त्रिष्टुप्। यजमानादीनां स्फ्यसमर्पणे विनियोगः ॥

अग्निः पृथुराग्नेयम् ॥

अग्निः पृथुराग्नेयं । अग्निः पृथुरित्येतद्यजुरग्निदेवतं । धूतभूमौ हिरण्यस्योपरि चतुर्गृहीतहोमे विनियुक्तं प्राजापत्यानिष्टुप् ॥

स्वाहाकृता अद्धाः ॥

स्वाहाकृताः सूर्यस्येत्यस्यादेवताः सामनिष्टुप् । अवनिवापने विनियोगः ॥

सविता लिङ्गोक्तदेवतम् ॥

सविता प्रसवित्रेत्येतल्लिङ्गोक्तदेवतं । सवित्रादिदेवतमित्यर्थः। व्रेनात्यष्टिश्छन्दः। दर्शपेये यतसङ्ख्यानां ब्राह्मणानां वरणात्प्रागुच्चारणे विनियोगः ॥ ३८ ॥

अथ चरकसौत्रामण्यौ ॥

यज्ञतन्त्रतिन्त्रेषु अग्न्यनन्तरं राजसूयैकदेशभूतचरकसौत्रामण्यौ यज्यते । सौत्रामण्याः तत्प्रयोगा लक्ष्यन्ते । चरकसौत्रामणीमन्त्राश्चाध्यादिकमभिधीयतइत्यर्थः राजसूयान्ते विहितसौत्रामण्याचरकसौत्रामण्यौति संज्ञा ॥

अश्विनोरार्षम् ॥

अग्न्यामन्त्राणामश्विनावृषीइत्यर्थं ॥

अश्विभ्यां चौषि लिङ्गोक्तानि ॥

अश्विभ्यां पच्यस्वेत्यादीनि चौषि यजूंषि लिङ्गोक्तदेवतानि । सुरादेवतानीत्यर्थः सौदामन्यां विकृतचूर्णानां च संसर्गे विनियुक्तानि । अश्विभ्यां । यजुर्गायत्री, सरस्वत्यै यजुरुष्णिक् इन्द्राय । यजुर्बृहती ॥

वायुः सौमी गायत्री ॥

वायुः पूतइत्येषा सोमदेवत्या गायत्री । अत्र तृतीयः सप्तम्यन्तेनोना । यकारव्यूहेन पूरणमिति केचित् । कुशैः परिस्तृणातीति विनियोगः ॥

कुवित्तृचर्ठ० सुकीर्तिः काक्षीवतः ॥

कुवित्सोमेत्यतत्तृचं कक्षीवतोऽपत्यं सुकीर्तिरपश्यत् ॥

आद्या सौम्यनिरुक्ता त्रिष्टुप् ॥

अस्मिन् तृचे आद्या कुवित्सोमेत्येषा त्रिष्टुप् अनिरुक्ता सोमदेवत्या । मध्ये सोमपदप्रयोगरहितेत्यर्थः ग्रहणेऽस्या विनियोगः अत्र द्वितीयस्य व्यूहेन पूरणं । अत्रोपयामेति यजुः । तस्य ग्रहो देवताः एकयूपग्रहयूपपक्षे द्वाविंशत्यक्षरा सामत्रिष्टुप । ग्रहणे विनियोगः । अयाचां ग्रहाणां ग्रहयूपपक्षे तु त्रीण्येतानि यजूंषि सोपयामानि । तत्र प्रथमस्य यजुस्त्रिष्टुप् । द्वितीयस्यासुर्यनुष्टुप् । तृतीयस्य सामो-

ष्णिक्। मयाधां यशाधां यज्ञे क्रमेण विनियोगः॥

यु॒वमनुष्टुप्॥

युवं सुरामम्बिनौ ऽनुष्टुप्छन्दस्का यज्ञस्य पुरोनुवाक्यया विनियुक्ता। अथ चतुर्थ्या व्यूहेन पूरणम्॥

पुत्रमिव त्रिष्टुप्॥

पुत्रमिव पितरावित्येषा त्रिष्टुप्। यज्ञयागे याज्यात्वेन विनियुक्ता। अथ द्वितीयो दशकस्तृतीयस्य व्यूहेन पूरणम्॥

अश्विसरस्वतीन्द्रदेवत्यऽश्विसरस्वतीन्द्रदेवत्ये॥

युवं सुरामं, पुत्रमिवेतीमे द्वे ऋचौ याज्यपुरोऽनुवाक्ये अश्विसरस्वतीन्द्रदेवताइत्यर्थः। अस्य सूत्रस्य द्वि. पाठोऽध्यायसमाप्तिसूचनार्थः॥ ४० इतिश्रीवीतिरग्निचित्सम्राट्सवपतिविंशत् क्रतुक्रत्याहार्षिकश्रीश्रीउपजापतिसुतयाज्ञिकश्रीटेवकृते सर्वानुक्रमणिकाव्याख्याने प्रथमोऽध्यायः समाप्तः॥ इति राजसूयः समाप्तः। (१)श्रीगणेशायनमः॥ अथ

(१) अत्र केषु चित्काण्वशाखीयसर्वानुक्रमपुस्तकेषु संहितापुस्तकेषु च दशमाध्यायसमाप्तौ वनुवाकसूत्राणि नतु प्रत्यध्यायेऽतः कारणान्मयाऽत्र दशमाध्यायान्तेऽनुवाकसूत्राणि लिख्यन्ते। प्रथमाध्यायमारभ्य तृतीयाध्यायपर्यन्तमनुवाकसूत्राणि लिखितानि, इदानीं च तृतीयाध्यायाद्दशमाध्यायपर्यन्तानि लिख्यन्ते। एदन्तिस्रोमहीनाम्यश्चतस्रऽआकूयै द्वे ऋक्सामयोश्चतस्रो ब्रतदक्षिणा नवैषा ते पञ्च वस्य स्येष ते गायत्रश्चतुष्कौ चत्वारत्वा षड दित्यास्त्वगष्टौ चतुर्थे दशैकोनपञ्चाशत्। ४। १०। ४९। अग्नेस्तनूश्चतस्रऽआपतये त्वाऽष्टौ तन्नायनी द्वे इन्द्रघोषश्चतस्रो यज्ञज्ञ ते मनो नवदेवस्यत्वा पञ्च देवस्य त्वा षड विष्णू रासि पञ्चज्योतिरसिसमुद्रे विष्णो पञ्च दशानुवाके पञ्च पञ्चाशत्। ५। १०। ५५। देवस्य त्वा सोमापवीरत्यष्टौ नमस्ते सप्त सन्ते नमः समुद्रगच्छ पञ्चकौ हविष्मतीरिमास्तिस्रो हृदे त्वा सप्त देवस्य त्वा ऽष्टौ वष्टेऽष्टौ पञ्चाशत्। ६। ८। ५०। वाचस्पतये तिस्रोऽयैन्वेनः पञ्च ये देवाश्चतस्रऽइन्द्रायत्वा द्वे मूर्दानं दिवस्तिस्रो यस्ते मधवऽइन्द्राग्नाऽआगतमाया य ऽओमासश्चर्षणी धृतो विश्वे देवासऽइन्द्र मरुत्वो मरुत्वन्तं मरुतामोजसे स ओषाऽइन्द्र मँहाऽइन्द्रो महाँऽइन्द्रएक. सप्त मेधा विदेऽ शीतिश्चत्वारिंशत्। ७।

सर्वेषां चयनमन्त्राणां साध्यऋषिमाह ॥

अथाग्निं प्रजापतिरपश्यत् ॥

अथानन्तरं प्रजापतिऋषिरग्निं अग्निसञ्चयकर्म अपश्यत् । अ-ग्न्यभिपदेन तन्मन्त्रा लक्ष्यन्ते । तेन युञ्जानइत्यतआरभ्याष्टौ अध्याया अग्निमन्त्राः । तेषां सर्वेषां प्रजापतिऋषिरित्यर्थः अत्र ग्रन्थे दर्शपूर्ण-मासाग्निष्टोमादिपदैस्तन्मन्त्रा लक्ष्यन्त इतिकात्यायनाभिमतं । अतः तत एतं परमेष्ठीप्राजापत्यो यज्ञमपश्यद्दर्शपूर्णमासाविति श्रुतौ सत्यां प-रमेष्ठीप्राजापत्यो दर्शपूर्णाममन्त्राणामृषिरिति दर्शपूर्णमासपदस्य तन्मंत्रपरतां सूचितवान् । अतः सर्वत्र कर्मपदैस्तन्मन्त्रा लक्ष्यंते ।

साध्या वाऽपश्यन् ॥

अग्निमित्यनुवर्त्तते । अथ वा साध्याऋषयः प्रजापतेः प्राक्तना अ-ग्निमपश्यन् । दृष्टवन्तः अतोविकल्पः अग्निमन्त्राणां प्रजापतिऋषिः साध्या वा ऋषयइति प्रतिचिति ऋषिभेदं वक्तुमग्नेः पञ्चचितिकत्व-माह ॥

सोऽग्निः पञ्चचितिकः ॥

---

२२ । ४० । कदाचनस्तरीरसि श्रदस्मै वाममद्य सावित्रोऽसि मुञ्चामोऽसीत्येकैका बृहस्प-तिसुतस्य चतस्रोऽरिरसि द्वे युक्त्वायातिष्टेन्द्रायेत्येकैका यस्माच्च द्वे ऽअग्नऽआयूंष्य-ग्ने पवस्वोतितऽउत्सोजसाऽअदृश्रमस्योदृत्य चित्र देवानांविशो बाचस्पतिं विश्वकर्म्मन्ह-विषा वावृधानो विश्वकर्म्म ह्विषा वर्द्धनेकैका ऽअग्नये त्वा चतस्रोऽग्ने द्वाविंशतिर्द्वाविंशति-र्द्वे शते । प्राणाय मे पञ्चोदृत्यञ्च सोमेन्द्र गोष्ठ माहिश्चतमऽएजतु दशमास्यः पञ्चाजिग्घ षट्परमेष्ठीनव नवमे सप्त षट्चत्वारिंशत्शत । ९ । ७ । ४६ । देव सवितः षडिन्द्रस्य वज्रः सप्त देवस्य त्वय त्रयोदशायये पञ्च वाजस्येममग्नेरेकाक्षरेण चतस्रो दशमे षट्त्रयश्चत्वारिंशत्शत । १० । ४३ । एषतऽअग्ने देवाश्चतस्रो सविता त्वा तिस्रः सोमस्य त्विषिः षडवेष्टाः सप्त सोमस्य त्वा षडिन्द्रस्य वज्रः पञ्च स्थोना सि षट् सावित्रा द्वे ऽअग्निभ्यां चतस्रयऽएकादशमे दश सप्त चत्वारिंशत्शत् । ११ । १० । ४७ । इत्यनुवाकसूत्राणि ॥

अथमग्निः प्रजापतिर्दृष्टवान् साध्या वा दृष्टवन्तः सोऽग्निपञ्चचितिको वर्त्तते । पञ्चचितयो यस्यासौ पञ्चचितिकः अथ प्रतिचित्सृष्टिमिदमाह ॥

प्रथमा चितिः प्रजापतेः ॥

प्रथमचितिमन्त्राः प्रजापतेरार्षमिति शेषः । "प्रजापतिः प्रथमां चितिमपश्यत्प्रजापतिरे व तस्यार्षेयमिति श्रुतेः" ॥

द्वितीया देवानाम् ॥

अथ द्वितीयचितिमन्त्राणां देवा ऋषयइत्यर्थः । देवा द्वितीयां चितिमपश्यन्नित्यादिश्रुतेः ॥

तृतीयेन्द्राग्न्योर्विश्वकर्मणः ॥

आर्षमिति शेषः । तृतीयचितिमन्त्राणां इन्द्राग्नी विश्वकर्मा चैते त्रय ऋषयइत्यर्थः इन्द्राग्नी च विश्वकर्मा च तृतीयां चितिमपश्यन्नित्यादिश्रुतेः ॥

चतुर्थ्यृषीणाम् ॥

आर्षमितिशेषः । चतुर्थचितिमन्त्राणां षडृषयएवर्षयः "ऋषयश्चतुर्थीं चितिमपश्यन्नित्यादिश्रुतेः ॥

पञ्चमी परमेष्ठिनः ॥

आर्षमिति शेषः । पञ्चमचितिमन्त्राणां परमेष्ठी ऋषिरित्यर्थः । "परमेष्ठी पञ्चमीं चितिमपश्यदित्यादिश्रुतेः" ॥

अथ प्रतिकर्मदर्शिनः ॥

अथ साधारणऋष्यभिधानानन्तरं प्रतिकर्म कर्मकर्मं प्रति ये दर्शिनो द्रष्टारः सन्ति तेनाग्नि सावित्राख्यपश्यन्नित्यादिकाः । प्रतिचिकमन्त्राणामृषयस्तेऽभिधीयन्तइतिशेषः ॥

युञ्जानोऽष्टौ सावित्राणि सविताऽपश्यत् ॥

युञ्जानः प्रथममित्यादीन्यष्टौ यजूंषि अष्टौ ऋचिकाः सावित्राणि सवितृदेवत्यानि सवितैवापश्यत् । दृष्टवान् "सवितैतानि सावित्राण्यग्नय इति श्रुते" । उच्चासभरणस्यादौ अष्टगृहीतहविरुद्देशानां विनियोगः । सवित्रापो ते नप्त्रकनिर्देशोऽद्भिर्वस्तु भंक्षीतेति श्रुतत्वो यजुष्ट्वाभिप्रायेण ॥

आद्या तृतीया वाऽनुष्टुप् ॥

युञ्जानइत्यष्टानां मध्ये आद्या युञ्जानइत्येषा तृतीया, युक्त्वाय सवितेत्येषा चानुष्टुप् आद्यायां तृतीयः समाचरः चतुर्थस्य व्यूहेन पूरणं तृतीयायां द्वितीयः समाचरः तेनैकोने हे अपि ॥

चतुर्थीषष्ठ्यौ जगत्यौ ॥

युञ्जते इतीयं चतुर्थी यस्य द्वितीयः समाचरः तेनैकोने हे अपि चतुर्थीषष्ठ्यौ जगत्यौ । युञ्जते इतीयं चतुर्थी, यस्य प्रयाणमिति षष्ठी, एते हे जगत्यौ षष्ठ्याः प्रथमस्य व्यूहेन पूरणं । द्वितीया गायत्री, युञ्जेन मनसेतीय द्वितीया गायत्री । अत्र तृतीय पञ्चाक्षरः तेनैव शङ्कुमती गायत्री मज्ञाभवति एकस्मिन्पञ्चके छन्दःशंकुमती भवती पञ्चमीत्रिष्टुप्, युजे वामितीयं पञ्चमीत्रिष्टुप् । अथाद्यद्वितीयचतुर्थानां व्यूहेन पूरणं । समाप्तास्तु प्रागुक्ताम् ॥

इमं नो यज्ञमन्ते गायत्र्यनवसाना ॥

इमं नो देव सवितरित्येतदवसानान्तं यजु व्यूहेन प्रजापत्या जगती । अथ यजुषोऽन्ते, ऋषा स्तोममित्येषा गायत्री अनवसाना अवसानरहिता । आपि यजुरन्ता अग्न्या अग्ने स्वाहेति पृथक् यजुः । अत्र देवस्य त्वेत्यस्य प्रजापतिसाध्या वा ऋषयः अभ्रयादानै विनियोगोयेति विशेषः ॥

आदेऽग्निः ॥

आदद्दे गायत्रेत्यस्याग्निर्देवता यतिर्धृतिश्छन्दः । ७६ । अभ्रयाऽदाने विनियोगः ॥

हस्तेऽनुष्टुब्यजुरन्ना ॥

हस्ताभ्यायेतीयमनुष्टुप् यजुरन्ना । अस्या अग्ने आनुष्टुभेनेति यजु । तस्य यजुश्छिष्टुप्छन्दः ॥ ११ ॥ हस्ताभ्यामित्यस्यास्तृतीयचतुर्थावर्धर्चेन पूरणं । (अभ्यभिमन्त्रणे विनियोगः)। अस्या अप्यग्निरेव देवता । अग्निरित्यस्य पूर्वसूक्तादनुवृत्तेः ॥ १ ॥

प्रतूर्तन्नाभानेदिष्ठऽआग्नीमारुतारपङ्क्तिः ॥ – १२-

प्रतूर्तं वाजिन्नितीमामृचं अग्नदेवत्यां आग्नारपङ्क्तिछन्दस्कां नाभानेदिष्ठऋषिरपश्यत् । यस्याश्चत्वारो पादो द्वादशको आद्यद्वितीयाष्टको साऽऽग्नारपङ्क्तिः । "अग्नौ वैदाग्नारपङ्क्तिरित्युक्तं." अस्या अभिमन्त्रणे विनियोगः ॥

युञ्जाथां कुथिर्गार्दभीं गायत्रीम् ॥ १२– १

युञ्जाथाए रासभमित्येषा ऋचं गर्दभदेवतां गायत्रीं कुथिऋषिरपश्यत् । गर्दभाऽभिमन्त्रणे विनियोग ॥

योगेयोगे शुनःशेपऽआजीम् ॥ १२– १४

गायत्रीमित्यनुवर्त्तते । योगेयोगइतीमामृचं अजदेवत्यां गायत्रीछन्दस्कां शुनः शेपऋषिरपश्यत् अजाभिमन्त्रणे विनियोगः ॥

प्रतूर्वंश्छिष्टुब्विराड्रूपायजुर्गर्भा ॥ १२– १५

प्रतूर्वन्नग्नवक्रामितीयं विराड्रूपाश्छिष्टुप् यजुर्गर्भा । यजुर्मध्ये अर्द्धर्चयोरन्तराले यस्याः सा यजुर्गर्भा । यस्याऋचश्चत्वारः पादा एकादशाक्षरा एकोऽष्टाक्षरः । सा विराड्रूपा एकादशिनश्चयोऽष्टाक्षश्च विराड्रूपेत्युक्तेः । अत्र द्वितीयो द्वादशाक्षरः तेनैकाधिकाः अस्याः पूर्वार्द्धस्य अश्वस्य प्रागुत्क्रमणे विनियोग. यजुर्गर्भेत्युक्ता किं तद्यजुरि-

मपेक्षायामाह । अन्तरिक्षं वीक्षेत्यादावन्तरिक्षमाचक्षाणा मध्ये मनुरित्यर्थः । दर्शपौर्णमासयोरस्य विनियोगः दैवीजगती ॥

१६ पृथिव्यास्त्वौष्ण्याग्नेयानि ॥

पृथिव्याः मधव्यादित्यादीनि औष्ण्याग्निदेवत्यानि यजूंषि । पृथिव्याः आसुरीगायत्री । अजस्य प्रागुत्क्रमणे विनियोगः, अग्निं पुरीष्यमङ्गिरस्वदच्छेमस्त्वस्य सामगायत्री । पिंडं प्रति गमने विनियोगः । खदुभरिष्यामइत्यासुर्यनुष्टुप् । अनड्वापुरुषेचषे विनियोगः ॥

१७ अन्वग्निरुषसामग्नेयी त्रिष्टुभं पुरोधसः ॥

अन्वग्निरुषसामित्येतामृचमग्निदेवत्यां त्रिष्टुभं पुरोधसऋषयोऽपश्यन् । वल्मीकवपामाच्छिद्रेण पिंडेचषे विनियोगः । अत्र प्रथमादस्य व्यूहेन पूरणम् ॥

१८ आगत्य मयोभुव आश्वोमनुष्टुभम् ॥

आगत्य वाजीतीमामृचमश्वदेवतामनुष्टुभं मयोभुवऋषयोऽपश्यन् । अश्वाभिमन्त्रणेऽस्या विनियोगः अत्रापि प्रथमस्य व्यूहेन पूरणम् ॥

१९ आक्रम्यानुष्टुप् ॥

आक्रम्य वाजिन्नित्येषाऽनुष्टुप् । अश्वदेवत्या आग्नी पदानुवृत्तेः । अश्वपादेन पिण्डस्याधिष्ठापने विनियोगः ॥

२० द्यौस्ते बृहतो ॥

द्यौस्ते पृष्ठमित्येषा बृहती । अश्वदेवत्या । अश्वस्योपरि पार्श्वं धारयतउच्चारणे विनियोगः । द्यौस्ते पृष्ठमित्येषा आर्षी बृहती । पादानामनियताक्षरत्वेऽपि षट्त्रिंशदक्षरत्वात् । व्यूहेन छन्दःपूर्तिः ॥

२१ उत्क्राम विराट् ॥

अश्वाभ्यामग्नीत्यनुवर्तते उत्क्राम सहतत्वेति अग्निदेवत्या त्रिष्टुप्छन्दस्का । यस्या दशाक्षरत्वात् पादाः सर्वविराट्पङ्क्तिः, "वैराजे विराडित्युक्तेः" अत्र द्वितीयैकादशकः । तेनैकाधिकाः अश्वस्योत्क्रमणे विनियोगः ॥ ११-२२

उदक्रमीत्त्रिष्टुप् ॥

अग्नीत्यनुवर्तते । उदक्रमीदृतधीरिति द्वितीयमृक्त्वग्निदेवत्या त्रिष्टुप् अश्वाभिमन्त्रणे विनियोगः ॥

आत्वा हे गृत्समदाग्नेय्यौ ॥ ११-२३

आत्वा जिघर्मि वाजिनं इतीमे हे ऋचौ अग्निदेवत्ये गृत्समदऋषिरपश्यत् । आत्वेत्यष्टाक्षरत्वात् वाजिनवतीत्यक्षरात् अपि त्रिष्टुप्छन्दः त्रिष्टुप्पादानुवृत्तेः अथ "यत्त्रिष्टुभो तेनेन्द्रइति न्यूनेन छन्दः पूरणं द्वितीयस्याः अश्वपदे मृत्पिण्डस्योपरि आज्याहुतिहोमे विनियोगउभयोः ॥

परिसोमको गायत्रीम् ॥

आग्नेय्यृपदमनुवर्तते । परिवाजपतिरितीमामृचमग्निदेवत्यां गायत्रीछन्दस्कां सोमऋषिरपश्यत् । (अभ्या पिण्डपरिलेखने विनियोगः) अत्र द्वितीये व्यूहः ॥

परि त्वा पायुरनुष्टुभम् ॥ ११-२५

आग्नेय्यृपदमनुवर्तते परित्वाऽग्ने पुरमितीमामृचमग्निदेवत्यामनुष्टुपछन्दस्कां पायुऋषिरपश्यत् । पिण्डपरिलेखने विनियोगः ॥

त्वमग्ने गृत्समदस्त्रिष्टुभम् ॥ ११-२६

आग्नेयीत्यनुवर्तते । त्वमग्ने युभिरितीमामृचमग्निदेवत्यां त्रिष्टुप्छन्दस्कां गृत्समदऋषिरपश्यत् । अत्र प्रथमान्त्यौ एकादशकौ द्वितीयतृतीयौ नवाक्षरौ । एवं चत्वारिंशदक्षरा इयं षड्

त्रयेव । यद्वा च तृतीयचतुर्थौ दृग्गायत्रौ त्रिष्टुभं तदेवं विराट्छन्दसा त्रिष्टुब् भवति । द्वौ वा वेदानौ भवतश्चोष्टुभं विराट्छन्दोमत्वात् । तथा च ब्राह्मणसंहितायामे त्वामग्नऽऋतिमृजदश्वाग्नेयी त्रिष्टुबृक्ष इति । सर्वेजनतोमित्यपि पाठोऽस्त्येव । ऋग्वेदानुक्रमणायामपीदं जगत्येवोक्तत्वात् । तदा त्वां सत्त्व त्वमग्नदः सन्ति तुवमग्नऽऋतेवं सत्तमित्यूँहेः । सत्याचरादि संपद्यन्ते । ततश्च त्रिष्टुभिरित्येको भूत एवं जगती सम्पद्यते । तथा च छन्दोगानां । त्वमग्नेन त्वतुमग्नः पूरयन्ति । तदात्वमग्ने मृजमदो जगतीमित्यपि पाठो भवत्येव । पिण्डपितृयज्ञेऽप्यत्र यदि विनियोगः ॥ २ ॥

पृथिव्याऽग्नेयम् ॥

देवश्च त्वेत्यत्र प्रागुक्तः । अत्र प्रजापतिऋषिः पिण्डदाने विनियोगमृति विशेषः पृथिव्याः सधस्थादित्येतदन्तुरग्निदेवतम् । भूर्जेना त्वष्टिछन्दः । अभ्या पिण्डदाने विनियोगः ॥

अपां पुष्करपर्णेऽ स्वराट्प्रतिष्ठाः ॥

अपां पृष्ठमसीत्यस्याः पुष्करपर्णं देवता । स्वराट्पङ्क्तिछन्दः । द्व्यक्षराधिकं सर्वं छन्दः विराडित्युच्यते "द्वाभ्यां विराड्वराजावित्युक्तेः । "आद्यौ पादौ दशकौ । अंत्यावेकादशकाविति षड्भिर्दशाक्षराधिक्यत्वादिराट्त्वं युक्तं । तथा च छन्दोगानां दृक्षधिका स्वराडिति । अपां पृष्ठाक्षिनक्षोपरि पुष्करपर्णास्तरणे तदापां पादानां विनियोगः । दिवो मात्रवेत्यस्य चतुर्थपादस्य विसर्जने ॥

अग्निं दे अनुष्टुभौ क्षण्णाजिनपुष्करपर्णे ॥

अग्निं च स्थः, संवत्सरोसीतीमे दे ऋचावनुष्टुभौ तयोः क्षण्णाजिनपुष्करपर्णे देवते । क्षण्णाजिनपुष्करपर्णयोरभिमर्शने विनियोग तयोः । आद्या चतुर्थस्य द्वितीयाया आद्यस्य च भूर्जेन पूरकम् ॥

घृतीर्ह्रोऽग्निः ॥ १२-

घृतीर्ह्रोऽग्नि विश्वभरा इत्यस्याग्निर्देवता त्रिष्टुप्छन्स्यग्निर्वर्मणे विनियोगोऽस्य । इदं प्रतिष्ठानामकौ । अत्र यजमानोऽध्वर्युः क्रियोक्तः प्रस्तरहरणो व यज्ञः । "यज्ञो वसवष्टेति प्रतिष्ठेति विज्ञायते" । आख्यायमोऽपि । यज्ञात्तु यज्ञमनकाङ्क्षाः वा अर्थनाम्ना विपरिणामप्रतिष्ठेति । छन्दोमानांच । यज्ञसनवष्टेति प्रतिष्ठेति ॥

त्वामग्ने पुष्करात् त्वं भरद्वाजायाग्नेयम् गायत्रम् ॥ १२-३

त्वामग्ने पुष्करात्, तमुत्वा दध्यङ्, तमुत्वा पाथ्य, इत्येतत्सूक्तमग्निदेवतम् गायत्रीछन्दस्कं भरद्वाजऋषिरवगच्छत् । पिण्डपितृयज्ञे विनियुक्तं । तमुत्वा दध्यङ्कृत्य मूर्धेन पूरयम् । तमुत्वा पाथ्यस्यापि ॥

सोद् क्षीतर्देवयावेत्यवातश्च त्रिष्टुभम् ॥ १२-

आग्नेयपदमनुवर्त्तते । तदाग्नेयोमितिविपरिणम्य सम्बध्यते ॥

सोद् क्षीतः खऽउखोकृतीमाद्यचमग्निदेवत्यां त्रिष्टुभम् ॥

देवयावेत्यवातश्चेतीमौ द्वावृचौ अपगतौ ॥

निक्षीता गृत्समदः ॥ १२-३

त्रिष्टुभमाग्नेयमिति चानुवर्त्तते निक्षीता क्षीतृवदनुक्रमोमाद्यचं अग्निदेवत्यां त्रिष्टुप्छन्दस्कां गृत्समदऋषिरवगच्छत् ॥

सप्तमं सोदस्व प्रस्तरावो बृहतीम् ॥ १२-३

सप्तमं सोदस्वेतीमामृचं अग्निदेवत्यां बृहतीं प्रस्तरावऋषिरवगच्छत् । अथाप्याग्नेयपदमनुवर्त्तते । यकारविसर्गेच तृतीये द्वादशाक्षरपूर्त्तिः । त्वामग्नऽइत्यादिवद्वृत्तस्य पुष्करपर्णे पिण्डनिधाने विनियोगइति केचित् ॥ १ ॥

३८ अपो देवीः सिंधुद्वीपऽआपो न्यङ्कुसारिणीम्॥

अपो देवीरित्यस्या न्यङ्कुसारिणीछन्दः अपो देवता सिन्धुद्वीप ऋषिरपश्यत्। तस्या द्वितीयपादो ब्राह्मणाक्षरः तस्य व्यूहेन पूरणम्। तृतीयो नवाक्षरः तस्मिन् अपामवनयनेऽस्या विनियोगः॥

३९ मन्ये त्रिष्ट्वार्थिवोऽर्द्धो वायव्योऽर्द्धः॥

मन्ये दायुरित्यस्यास्त्रिष्टुप्छन्द। अस्या ऋचोऽर्द्धः पार्थिवः पृथिवीदेवतः अपरोऽर्द्धो वायव्यः वायुदेवतः अवटमध्ये वायुप्रक्षेपे विनियोगः। अत्र चतुर्थेएकादशकः। तस्य व्यूहेन पूरणं वा एकोना वा॥

४० सुजातोऽनुष्टुबाग्नेयी॥

सुजातो ज्योतिषेतीयमनुष्टुबग्निदेवत्या कृष्णाजिनपुष्करपर्णयोरग्ने ग्रहणे विनियुक्ता। अत्र द्वितीयोनवकस्तेनैकाधिका॥

४१ उदुत्तिष्ठ विश्वमना. पथ्याबृहतीम्॥

आग्नेयीमनुवर्त्तमानं आग्नेयीमिति विपरिणमते अर्थवशाद्विभक्तिविपरिणामइतिन्यायात्। एवं सर्वत्र ज्ञेयं। उदुत्तिष्ठ स्वध्वरीमाग्नेयीं च पथ्याबृहतीछन्दस्कां विश्वमनाऋषिरपश्यत्। चतुर्थेबृहती तृतीयो द्वादशकइति बृहत्येशाच पथ्याबृहतीत्युच्यते। पथ्यापूर्वे तृतीय इति पथ्यालक्षणत्वात्। पिण्डमादायेत्यापने विनियोगः। अत्राद्ययोर्व्यूहेन पूरणम्॥

४२ ऊर्द्ध ऊषुणऽउपरिष्टाद्बृहतीम्॥

आग्नेयीमिति वर्त्तते ऊर्द्ध ऊषुणऽइत्यस्यामृचमग्निदेवतामुपरिष्टाद्बृहतीमुच्यते। अन्त्ये दुपरिष्टाद्बृहत्युच्यते। "अन्त्येदुपरिष्टाद्बृहतीमुक्ते"। पिण्डस्य प्राक्प्रक्षणेऽस्या विनियोगः॥

४३ स जातस्त्रितस्त्रिष्टुभम्॥

स जातो गर्भइतीमामृचमग्निदेवत्यां त्रिष्टुभं त्रित ऋषिरपश्यत्।

अग्नाभिमन्यवे विनियोगः अग्नाप्यान्नेयीऋग्वर्णात् अग्न आयाहीत्यस्य हैतयवे। अग्न आयाहीत्यादिना पूर्ववत्॥

स्थिरे रासभेऽनुष्टुब्भिक्षा॥ ११-४४

स्थिरे भवेतीयस्यर्क्रासभी रासभदेवत्या अनुष्टुप्छन्दः भिक्षा। त्रिंशदक्षरत्वादिकल्पः। अनयोः पादयोर्यद्यादेशयूकमक्षवेऽपि वैकल्पिकं दृश्यधिकोक्तिपक्षत्वमाह। अतएव आयतेः। व्यूहेन पूर्वे संभवत्यपि एकदृश्यधिकत्वनत्वादिना छन्दोन्तरं विकल्पेन कल्पनेति। रासभाभिमन्यवेऽस्य विनियोगः॥

शिवो भवाजो पथ्याबृहती॥ ११-४५

शिवो भव प्रजाभ्यस्तीयमजदेवत्या पथ्याबृहतीछन्दस्का। अस्य प्रथमः समकः। द्वितीयोऽष्टकः। तृतीयोदशकः। चतुर्थोऽपि व्यूहेन दशकइति। अनुष्टुब्बृहतीवेति संहिताभाष्ययोः। अजायाभिमन्यवे विनियोगः॥

प्रैतु शिङ्क्तोक्षा महापङ्क्तिरवसाना॥ ११-४६

प्रैतु वाजीत्येषा लिङ्क्तदेवता महापङ्क्तिछन्दस्का। अवसाना अवसानवर्णोपेता। आद्यार्धर्चावश्वदेवत्या। तृतीयोऽर्धर्चो रासभदेवतइति लिङ्क्तोक्षशब्दार्थः। अत्र तृतीयचतुर्थौ व्यूहेन पूरणीयौ। एवं सत्यपि पादाक्षराः सन्ति अतो महापङ्क्तिरियं। "षडष्टकाया महापङ्क्तिरित्यृक्।" आद्यार्धर्चयोरश्वस्योपरि पिण्डधारणे विनियोगः हयाभिमित्यस्य खरस्योपरि पिण्डधारणे विनियोगः॥

अग्ने गायत्र्येकपदाग्नेयी॥ ११-४७

अग्नआयाहीतीयमेकपदागायत्री अग्निदेवत्या। खरात्पिण्डस्य प्रत्याहरणे विनियुक्ता॥

ऋतमग्निमाग्नेयं ॥

ऋतꣳ सत्यं । यज्ञं पुरीषमित्येते वसुषी आग्नेयी चग्नि-देवते । ऋतमिति प्राजापत्यानाद्यौ । यज्ञस्योर्ध्वं चिच्छ्रयणचयने विनियुक्ता । यज्ञं पुरीषं । कामगावीधनदापुरुषवेधचये विनियो-गः ॥

ओषधयश्चिष्टुबनुष्टुभावोषधिदैवत्ये ॥

ओषधयः प्रतिमोदध्वं, ओषधयः प्रतिग्रभ्णीतनैतौ ऋचौ क्रमेण चिष्टुबनुष्टुप्छन्दस्के ओषधिदेवत्ये । परिवृतमध्ये चिच्छ्रिचानेऽभ-यो: तत्र प्रथमाया द्वितीयो द्वादशकः तृतीयो दशकः प्रथमाऽन्त्यावेकादशकौ । तेन पूर्वैव चिष्टुप् । द्वितीयो द्वादशकः तृतीयो दशकः प्रथमांत्यावेकादशकौ । तेन पूर्वैव चिष्टुप् । द्वितीयाया प्रथमो नव-कः अन्ये षट्का तेनैकाधिका । परिवृतमध्ये चिच्छ्रिचाने विनि-योगः उभयोः ॥

व्यस्यन्नाग्नेयोऽर्चः ॥

व्यस्यन्विश्वाऽत्यमर्चोऽग्निदेवतः ॥

विषाजसोत्कीलः कात्यायाग्नेयीं चिष्टुभाम् ॥

विषाजसा पृथुनेतीमामृचमग्निदेवत्यां चिष्टुप्छन्दस्कां कात्यः कतस्य पुत्रस्तृतीये सवनेऽपश्यत् । योक्त्रापनद्धं चिच्छ्रि विमोचने विनियोगः ॥ ५ ॥

आपो ह्यापर्ठ॰ सिन्धुद्वीपमृचं गायत्रम् ॥

आपो हि ष्ठेतीदं तृचं मन्त्रदेवतं गायत्रीछन्दस्कं सिन्धुद्वीपमृषिर-पश्यत् पर्वकमायपक्षयोदकस्य चिच्छ्रयणयोर्यजमाने विनियुक्तम् ॥

मित्रउपरिष्टाद्बृहती मैत्री ॥

मित्रः सꣳसृजेतिमित्रोदेवताऽपरिष्टाद्बृहतीछन्दः पञ्चमोऽभि-

पिण्डक संसर्जने विनियोगोऽक्षाः पञ्च चतुर्थः सप्तकः। तेनैकोनाः सकारन्यूनो वा ॥

बद्राऽअनुष्टुभौद्वौ ॥

बद्राः सप्तर्चः वृष्णे सोमममनुष्टुप्छन्दस्का बद्रदेवत्याः शर्करापीरसाम्नार्चैः पिण्डक संसर्जने विनियुक्ता ॥

सप्तर्चः सृष्टां ते सिनीवाली देवत्ये ॥

सप्तर्चः-सृष्टामितिते ऋचो सिनीवाली देवत्ये अनुष्टुप्छन्दस्केऽनुष्टुप्पदानुवर्तते। पिण्डक संसर्जने विनियोगउभयोः संसृष्टामित्यत्र स्तीबद्धतीवी सप्ताचरौ। पञ्चावष्टकौ। तेनदशूना। न्यूनो वा। सिनीवालीत्यत्र द्वितीयत्र न्यूनेन पूर्तिः, उक्तामादित्या। अनुष्टुबित्यनुवर्तते। उक्तां ऋचांत्रितीयमनुष्टवादित्या अदितिदेवता। पिण्डसंसर्जनएव विनियुक्ता अथापि प्रथमः सप्तकः तेनैकोना। सकारन्यूनो वा ॥

मखस्य शिरोऽसीत्यक्षः ॥

मखस्य शिरोऽसीत्यत्र मृत्पिण्डो देवता। वसुगोत्रो मृदादाने विनियोगः ॥

वसवस्त्वा लिङ्गोक्तानि सर्वत्र ॥

वसवस्त्वा छन्दांसित्यादीनि लिङ्गोक्तदेवतानि उक्तादेवतानीत्यर्थः नवे वक्तव्य किंतु सर्वत्र वसवस्त्वेत्यादीनि लिङ्गोक्तदेवतानीत्यर्थः वसवस्त्वा धूपयंतु वसवस्त्वाच्छृन्दंत्वित्यादौ। तत्र वसवस्त्वा। एकाधिका ब्राह्मी अनुष्टुप्। उखातलपक्षमने विनियोगः। बद्रास्त्वेत्यत्रार्धेऽनुष्टुप्। एकाधिका। पक्षमधान्यवपाने विनियोगः, आदित्यास्त्वा ब्राह्मी अनुष्टुप्। उत्तरवेद्याधाने विनियोगः विश्वेत्वा एकाधिका ब्राह्मी बृहती। सभीकरणे विनियोगः ॥

अदित्यै रास्ना ॥

अदित्यै रास्ना देवताः । यजुर्गायत्री । वलिकरणे विनियोगः ॥

अदितिरौखम् ॥

अदितष्टे विलमित्यस्य उखादेवता यजुर्बृहती । उखायां विल खालंभने विनियोगः ॥

इत्वायादित्योष्णिगग्निरनुष्टुब्बा ॥

इत्वायसामितीयमृक् अदितिर्देवत्या उष्णिक्छन्दस्का । निधपञ्चाया उखायां भूमौ निधाने विनियोगः । अथ तृतीयचतुर्थ्यकः । तत्र तृच्य धिकोष्णिक् । अनुष्टुब्बा तदा च पुत्रेभ्यः प्रायच्छत्तृतिलतीयः पादो व्यूहेन पूरणीयः उवधिगनुष्टुबेति संहिताभाष्ययोः पाठोऽस्ति । अथ वसवस्त्वा धूपयंत्वित्यादीनि सप्त यजूंषि उखायां धूपने विनियुक्तानि । तेषां देवतोक्ता प्रागुक्ता । छन्दांस्यभीष्यंते वसवस्त्वाऽङ्गिरसो गायत्री । रुद्रास्त्वा । व्यूहेनऽङ्गिरसो गायत्री । आदित्या ऽङ्गिरसो गायत्री । विश्वे त्वा । व्यूहेन सामजगती । इन्द्रस्त्वा यजुरुष्णिक् । वरुणस्त्वा यजुरनुष्टुप् । विष्णुस्त्वा । यजुरुष्णिक् ॥

अदितिरावटम् ॥

अदितिष्ट्वा देवीत्येतद्यजुरवटदेवतम् । व्यूहेन प्राजापत्यानुष्टुप् खड्गखननने विनियोगः ॥

देवानां पञ्चौखानि ॥

देवानां त्वा पत्नीरित्यादीनि पञ्चौखानि । एषामुखादेवतेत्यर्थः । तत्र देवानां त्वा । प्राजापत्या त्रिष्टुप् । उखाधाने विनियोगः । धिषणास्त्वा । प्राजापत्यानुष्टुप् उखाया आदीपने विनियोगः । बृहतीः ऋग्बृहती, ग्नास्त्वा । सामजगती । जनयस्त्वा ऋचं । पत्नीः बृहतीरित्यादीनां चयाणामुखामीक्षणमन्त्राणां जपे विनियोगः ॥

मित्रस्य चर्षणीधृतइतीमामृचं मित्रदेवत्यां गायत्रीं विश्वामित्रऋषिरपश्यत्। पुनः पुनः स्रुपक्षप्रक्षेपे विनियोगः॥

देवस्त्वा सावितो बृहतो॥

देवस्त्वा सवितेत्येषा सवितृदेवत्या बृहतीछन्दस्का। स्रुपक्षोद्यमेऽस्या विनियोगः। अध्वर्यवमानेत्यध्वर्योस्त्वया उत्तानत्वकरणे। एकाधिक्षा आर्षीबृहती इयं। पादानामनियताक्षरत्वेऽप्यक्षराणां तावत्संख्याकत्वात्॥

उत्थाय पूर्वोर्ध्वऽऔखऽउत्तरो मैत्रः॥

इहतीत्यनुवर्त्तते। उत्थाय बृहती भवतीयं बृहतीछन्दस्का। अस्या पूर्वोर्ध्वऽऔखः। उखादेवतः। उखोद्यमने विनियुक्तः। मित्रैतान्तरत्वयमुत्तरोऽर्ध्वो मैत्रः मित्रदेवतः। कस्मिंश्चित्पात्रे उखायाः स्थापने विनियोगः। अत्र प्रथमोऽष्टकः। द्वितीयस्तृतीयः तुशब्दो व्यूहेनाष्टकः। तृतीयो व्यूहेन द्वादशकः चतुर्थोऽष्टकवृत्तिपूर्वक बृहती। वसवस्त्वाऽच्छृन्दन्त्वित्यादीनि चत्वारि यजूंषि उखादेवतानि अजापयसोऽवसेके विनियुक्तानि। वसवस्त्वा। पङ्क्त्यास्त्वा। रुद्रास्त्वा। प्राजापत्याऽनुष्टुप्। आदित्यास्त्वा ऋग्यजुषी। विश्वे त्वा सामजगती॥ ५॥

आकूतिं लिङ्गोक्तान्यौदुम्बरभक्षाणि॥

आकूतिमग्निं प्रयुनक्मित्यादीनि यजूंषिलिङ्गोक्तदेवतानि। अग्न्यादिमन्त्रोक्तदेवतानीत्यर्थः। तथा औदुम्बरभक्षसञ्ज्ञानि। आग्नीध्रौदुम्बरभक्षणे विनियुक्तानि। आकूतिं यजुः पङ्क्तिः। मनो मेधा। यजुस्त्रिष्टुप्। चित्तं। यजुर्जगती। प्रजापतये। यजुः पङ्क्तिः विश्वो देवस्येत्यस्य तु प्रागुक्तं सर्वं अग्निप्रकरणे पुनः पाठादा-

ग्निवदेव प्रजापत्यादिऋषिः औदुम्बरसमिदाधाने विनियोगश्चेति विशेषः ॥

मासौष्यौ गायत्रीविष्टुभौ ॥

मा सु भित्था । इडे० इत्स देवित्सते ऋचौ द्वे औष्ण्यौ उत्तरदेवत्योक्तमेव च गायत्रीविष्टुप्छन्दस्के ॥

अग्निश्च पादाग्नेयः ॥

मासित्यस्यामृचि अग्निश्चेदं करिष्यतस्त्वयं पादोग्निदेवताः । मा सु भित्थादृतिहवोरक्षोधिग्वपणे विनियोगः ॥

इरंनः सोमाहुतिराग्नेयीं गायत्रीम् ॥

इरंनः सर्पिरितीमामृचमग्निदेवत्यां गायत्रीछन्दस्कां सोमाहुतिर्ऋषिरपश्यत् । कार्मुकसमिदाधानेऽस्या विनियोगः । अचाश्वयोर्भूयेन पूरणम् ॥

परस्या विरूपऽआङ्गिरसः ॥

गायत्रीमित्यनुवर्त्तते । परस्याऽधीतीमामृचमग्निदेवत्यां गायत्रीछन्दस्कां अङ्गिरसोऽपत्यंविरूपऋषिरपश्यत् । वैकंकतसमिदाधानेऽस्या विनियोगः द्वितीयस्य व्यूहेन पूरणम् ॥

परमस्याऽआरुणिरनुष्टुभम् ॥

परमस्याऽइतीमामृचमग्निदेवतामनुष्टुप्छन्दस्कामारुणिऋषिरपश्यत्औदुम्बरसमिदाधाने विनियोगः ॥

यदग्ने द्वे जमदग्निः ॥

अनुष्टुभमित्यनुवर्त्तते, यदग्ने, यदस्यित्यृग्द्वयमग्निदेवत्यं अनुष्टुप्छन्दस्कं जमदग्निऋषिरपश्यत् । यदग्नेऽस्यस्या परस्यवृक्णसमिदाधाने विनियोगः । अथ चतुर्थः समाचरः तत्र व्यूहो वा एकोना वा, यदस्युपेत्य साधःमयसमिदाधाने विनियोगः । तत्र प्रथमचतुर्थयोः

ऽनुष्टुभेन पूरयेत् ॥

अक्षरैरर्धाभानेदिष्टक्षिष्टुभौ ॥

अक्षरैरक्षरप्रयावं, नाभा पृथिव्याइतीमे ऋचौ त्रिष्टुप्छन्दस्के अग्निदेवत्ये नेदिष्टक्षविरष्यात् । अथवा नाभानेदिष्टत्वेवं प्रचाचरद्विनाम । प्रतूर्तं नाभानेदिष्टत्वेन तथा दर्शनात् । ऋत्विग्त्वं तु त्रिष्टुभावितिं हिवचनान्नाख्यते । यज्ञायज्ञसमिदाधानेऽभयोर्विनियोगः नाभापृथिव्या इत्यस्यां द्वितीयतुर्यौ पादौ आगतौ । तथाप्येषा त्रिष्टुबेव । जगती ह्रौ तुजागतौ यस्याः सा आगतीजगतीत्रेष्टुभे त्रिष्टुबितिपरिभाषत्वात् ॥

याः सेनाऽनुष्टुभः ॥

तत्र याः सेनादित्याद्याः सर्वाऋचोऽनुष्टुप्छन्दस्काः । सर्वाआग्नेयः परस्याअधीत्याद्याः सर्वाः समिदाधानकारकमन्त्ररूपा ऋचोऽग्निदेवत्याः तत्र याः सेनादित्यस्यां प्रथमः सप्तकः । द्वितीयचतुर्थौ नवको तृतीयोऽष्टकः । दंद्राभ्यां । तत्र प्रथमः षट्कः द्वितीयः सप्तकः । अत्र व्यूहो वा । अन्त्यावष्टकौ । दृव्यूना । ये अनेषु । तृतीये व्यूहः, सठंग्रितः । आद्यः षट्कः । द्वितीयतृतीयौ सप्तकौ । चतुर्थो नवकः । उदेषां । द्वितीयचतुर्थौ सप्तकौ । दृव्यूना । पूर्वं याः सेना अनुष्टुभइत्युक्तं, तत्रान्त्याया विशेषमाह ॥

अन्त्योपरिष्टाद्बृहती ॥

याः सेना इत्यादीनामन्ते भवा अन्त्या अथवा अध्यायस्यान्त्या अवसतेऽवसयेत्येवंपरिष्टाद्बृहती, अस्या अन्त्याः पादौ द्वादशकः आद्यावक्षरयोऽष्टकाः सोपरिष्टाद्बृहती । "अन्त्यप्रचेदुपरिष्टाद्बृहतीम्नु ते",,इत्यापस्तम्बसमिदाधानेऽस्या विनियोगः । न त्वनुष्टुप् । याः सेनादित्यादीनां ऋषिरग्निरुक्त्वाऽन्त्यस्यानुक्तत्वात् ॥ ६ ॥

दृग्भानो वस्वप्रोक्षिष्टुभम् ॥

दृग्भानो रुक्मइतीमामृचं त्रिष्टुप्छन्दस्कां रौक्मीं रुक्मदेवतां वस्वप्रीऋषिरपश्यत् । रुक्मप्रतिमोचने विनियोगोऽस्याः । अथ प्रथमस्य व्यूहश्चेन पूरणम् । द्वितीयो दृग्भकः तेनैकोना ॥

नक्तोषासा कुत्साऽग्नेयीम् ॥

त्रिष्टुभमित्यनुवर्त्तते । नक्तोषासा समनसेतीमामृचमग्निदेवत्यां त्रिष्टुप्छन्दस्कां कुत्सऋषिरपश्यत् । नक्तोषासेत्यर्द्धर्चेऽग्न्यामुखाधरिधइये विनियोगः, आवा यानेत्यस्य पादस्योखाइरणे । देवाऽग्निमित्यस्य पादस्यासन्नग्न्यामुखानिधाने ॥

विश्वा रूपाण्याप्रायाः सावित्रीं जगतीम् ॥

विश्वा रूपाणीतीमामृचं सवितृदेवत्यां जगतीछन्दस्कां प्रायाग्य ऋषिरपश्यत् । तृतीयपादे व्यूहः । अस्याः त्रिवत्पाशप्रतिमोके विनियोगः ॥

सुपर्णः क्षतिश्चतुरवसाना गारुत्मो विषग्री ॥

सुपर्णोऽसि गरुत्मानितीयमृक्क्षतिछन्दस्का चतुरवसाना पदसानचतुष्कयुक्ता गारुत्मी गरुत्मदेवता । विषग्री विषहंत्री विषापनयनकर्त्री । अग्नीत्यक्षराक्षतिः । अथ त्रिंशत्यक्षराणि सन्ति । षट्व्यूहस्थानानि सन्ति । तेन क्षतेरेकोनाग्नीत्यक्षरेयं संपद्यते । अस्याः सत्रिवत्स्थाग्नेः प्राक्प्रग्रहणे विनियोगः ॥

विष्णोर्विक्रान्तानि ॥

विष्णोः क्रमोऽसि सपत्नहेत्यादीनि दिग्गोऽनुविक्रमस्वेत्यन्तानि यजूंषि विष्णुदेवतानि । उख्याग्निदेवतानीत्यर्थः । "यः सविष्णुर्यज्ञः स यः स यज्ञोऽयमेव सयोऽयमग्निरुख्याग्निरिति"श्रुतेः । विष्णुक्रमणे एषां विनियोगः । अथास्यां सर्वेषां व्यूहेन ऋग्बृहतीछन्दः । चतुर्थस्य

प्राजापत्यावृहती । दिवोन्विति यजुरन्तिकम् । दिवाकीर्त्ये विनियोगः ॥

अक्रंददग्निरीरान्नेयीं त्रिष्टुभम् ॥

अक्रंददग्निरितीमामृचमग्निर्देवता त्रिष्टुभम् वत्सश्रीऋषिरपश्यत् । अग्नेः पिण्डवत्प्रागुदक्प्रयहणे विनियोगः । चतुर्थस्य व्यूहेन पूरणम् ॥

अग्नऽऊर्ध्वबृहती ॥

अग्नेऽभ्यावर्तिन्नित्यस्या ऊर्ध्वबृहतीछन्दः यज्ञात्रयः पादा द्वादशकाः सोर्ध्वबृहतीत्युच्यते । "त्रिजागतोर्ध्वबृहतीत्युक्तेः" । अथ द्वितीयो दशकस्तस्य व्यूहदयेन पूरणम् दयमग्निर्देवता आग्नेयीत्यनुवृत्तेः । अग्नेरवहरणे विनियोगः ॥

अग्ने महाबृहती ॥

आग्नेयीत्यनुवर्त्तते । अग्नेऽङ्गिरस्तीयमृक् । अग्निर्देवता महाबृहतीछन्दस्का । यस्या एकः पादो द्वादशाक्षरः । अन्ये चतुरोऽष्टाक्षराः सा महाबृहती त्रिष्टुबुच्यते । "चत्वारोऽष्टका जागतस्य महाबृहतीत्युक्तेः" अथाग्नेऽङ्गिरस्त्याद्यपादस्य व्यूहेन द्वादशाक्षरपूरणं । अग्नेरवहरणेऽस्या विनियोगः ॥

पुनर्गायत्र्यौ ॥

पुनरूर्जा सहरय्येतीमे ऋचौ गायत्रीछन्दस्के । अग्निर्देवते । आग्नेयी पदानुवृत्तेः । अग्नेरवहरणेष्वेव विनियोगः । पुनरित्यस्याऽन्तस्य व्यूहेन पूरणम् ॥

आत्वा ध्रुवोऽनुष्टुभम् ॥

आग्नेयमित्यनुवर्त्तते । आत्वा हार्षमितीमामृचमनुष्टुभमग्निर्देवता ध्रुवश्चिरपश्यत् । अभिमन्त्रणेऽस्याविनियोगः ॥

उदुत्तमठं॰ शुनःशेपो वारुणीं त्रिष्टुभम् ॥

उद्धृत्यभिमितीमामृचं यदग्नदेवतां चिष्टुप्छन्दस्कां मुखः शेषमग्निरुपस्थात् । याज्योत्तरयोर्विनियोगः चतुर्थेन व्यूहेन पूर्तिः ॥

अग्ने चितऽआग्नेयीम् ॥

चिष्टुभमित्यनुवर्तते । अग्ने बृहच्छितीमामृचं अग्निदेवतां चिष्टुभं चितश्चिरुपस्थात् । अग्नेः प्राग्दक्षिणाग्रपक्षेऽस्या विनियोगः आद्यांत्ययोर्व्यूहेन पूरणम् ॥

षष्ठं-सऽउक्षा जगतीऽ यजुरन्ता ॥

इष्टाग्निप्रकरणे हंसः शुचिषदितीयंपृथक्जगतीछन्दस्कां त्रुत्या उक्षा । क्रीड्यी । यजुरन्ते यस्याः सा तथा । राजसूयप्रकरणे त्रियमतिजगतीत्युक्ता न तत्र यजुरन्ता । कुतः । एतामतिछन्दः संपत्तिश्रुतेर्बृहदित्यवयवस्यापृथक्यजुरभावात् । अत्र तु "अग्नेनसुपावक्रतीति प्रत्यक्षजगत्या जगतीऽइमांलोकानमुतोवाचोव्यश्नुते" षष्ठं- सः शुचिषदितिश्रूयते । बृहदिति निदधातीत्यवयवस्यपृथग् विनियोगश्च श्रूयते । तेनात्र जगती यजुरन्तेति युक्तमेवोक्तं । तृतीयस्य व्यूहेन पूरणम् किन्तयजुरित्यपेक्षायामाह ॥

अन्ते बृहद्यजुः ॥

हंसः शुचिषदित्यस्याऽअन्ते बृहदित्येतावद्यजुः । षष्ठं-सदित्यस्या अग्नेरवक्षरणे विनियोगः बृहदित्यासदृचां निधाने ॥

सीद त्वमाग्नेयी चिष्टुप् ॥

सीद त्वं मातुरित्येषा अग्निदेवत्या चिष्टुप् । उपस्थाने विनियोगः आद्यपादयोर्व्यूहेन पूर्तिः ॥

अन्तरग्नेऽनुष्टुभौ ॥

आग्नेयीपदमनुवर्तते । अन्तरग्ने दक्षा, शिवो भूत्येतौ ऋचौ अग्निदेवते अनुष्टुभौ । उक्ताग्नेरुपस्थाने विनियुक्ते । अन्तरित्यस्या आ

यो व्यूहेन पूरयोयो । त्रिय इत्यस्य द्वितीयचतुर्थौ च ॥ ७ ॥

दिवस्पर्य्याग्नेयं त्रैष्टुभम् द्वादशर्चं वसुश्रौर्भालंदनः ॥

दिवस्परि प्रथममित्येतद्द्वादशर्चं अग्निदेवतं त्रिष्टुप्छन्दस्कं भालंदनस्य पुत्रो वसुश्रीऋषिरपश्यत् । उक्थाग्नेयपक्षाग्नेऽस्य द्वादशर्चस्य विनियोगः, इत्थानइत्यस्य व्यूहेन पूरणम् । विश्वातऽइति दध्याचरः, समुद्रे त्वा व्यूहः, आरोदसी भानुनेत्यस्य च । विभात्यग्ने । मर्त्तेष्वग्निः दध्याचरः, समुद्रे त्वा व्यूहः आरोदसी भानुनेत्यस्य । विभात्यग्ने । मर्त्तेष्वग्निः । दृशानो रुक्मः, अस्य द्वितीयो यो दध्यक्षः, पातंभज,त्वामग्ने इयोः । अस्तावीति व्यूहेन ज्ञतेऽपि दध्यक्षः । एतेषु पादेषु व्यूहः ॥

समिधाग्निं विरूपाक्षऽआङ्गिरसऽआग्नेयं गायत्रीम् ॥

इतिसूक्तमिहकेचित्र पठन्ति समिधाग्निमित्यस्याक्षपादेः प्रागुक्तत्वात् । उरुव्यचसमिद्धाग्नेऽस्या विनियोगो वनीवाहने । अथ विरूपाक्षविरूपइति नामभेदात्पुनः पाठइत्यपरे ॥

उदुत्वा तापसोऽनुष्टुभम् ॥

उदुत्वा विश्वे देवाइतीमामृचमग्निदेवतामनुष्टुभम् तापसऋषिरपश्यत् । सासंदीवक्षोव्याग्नेयमग्ने विनियोगः अथ द्वितीयचतुर्थयोर्व्यूहः ॥

प्रेद्धनुष्टुप् ॥

प्रेद्धमित्यस्या अनुष्टुप्छन्दः । अग्निर्देवतापाग्नमने विनियोगः अथापि द्वितीयचतुर्थयोर्व्यूहः ॥

प्रप्रायमग्नेर्वा वासिष्ठं त्रिष्टुभम् ॥

प्रप्रायमग्निरितीमामृचमग्निदेवत्यां त्रिष्टुप्छन्दस्कां वसिष्ठऋषि-

रपश्यत् । समिदाधानेऽस्या विनियोगः ॥

आपो देवीरापो ॥

त्रिष्टुप्पदमनुवर्त्तते । आपो देवीरित्येषा आपो ऽग्निदेवता । त्रिष्टुप् भक्षणोऽपु प्रक्षेपे विनियुक्ता । प्रथमो द्वादशाक्षरः ॥

अस्मन्ने विरूपमाग्नेयीं गायत्रीम् ॥

अग्नेऽयन्नदतीमामृचं अग्निदेवतां गायत्रीछन्दस्कां विरूपऋषिरपश्यत् । भक्षणोऽप्सु प्रक्षेपे विनियोगोऽस्याः । अत्र प्रथमे व्यूहः ॥

गर्भोऽसि तिस्रोऽनुष्टुभः ॥

गर्भो अग्नेऽषधीनामित्याद्यास्तिस्रऋचोऽनुष्टुप्छन्दस्काः । अग्नि देवताः । आग्नेयीपदानुवृत्तेः । गर्भइत्यस्याप्सु भक्षप्रक्षेपे विनियोगः । प्रसद्येत्यनयोरनामिकया भक्षादाने विनियोगः । गर्भइत्याद्ये व्यूहः द्वितीयः सप्तकः पुनरूर्ज्जां महरद्येत्यनयोः प्रागुक्तम् ॥

बोधा मे दीर्घतमास्त्रिष्टुभम् ॥

बोधामदतीमामृचं त्रिष्टुभं दीर्घतमाऋषिरपश्यत् । उपस्थानेऽस्या विनियोगः । चतुर्थे व्यूहः ॥

स बोधि सोमाहुतिराग्नेयीं यजुरन्तां गायत्रीम् ॥

स बोधि सूरिरितीमामृचं अग्निदेवत्यां यजुरन्तां गायत्रीछन्दस्कां सोमाहुतिऋषिरपश्यत् । उपस्थाने विनियोगः तृतीये व्यूहः ॥

यज्ञैर्विश्वकर्मणाम् ॥

सर्वोषौत्यस्याग्नेते विश्वकर्मणे स्वाहेत्येतद्यजुर्विश्वकर्मदेवतम् । प्रायश्चित्तिहोमे विनियुक्तं । दैवीजगती ॥

पुनस्त्वा त्रिष्टुबाग्नेयीम् ॥

पुनस्त्वाऽऽदित्या इतीयमृक् त्रिष्टुप्छन्दस्का अग्निदेवता । समिदाधाने विनियुक्ता । अष्टाक्षरचतुर्थपादः । द्वितीयएकादशकः । चतुः

र्षएकादशकः । दृष्यधिका ॥ ८ ॥

अपेत लिङ्गोक्तबहुदेवत्या ॥

त्रिष्टुबित्यनुवर्त्तते । अपेत वीतेतीयमृक् त्रिष्टुप्छन्दस्का । लिङ्गोक्ता बहवो देवता यस्याः स लिङ्गोक्तबहुदेवत्या गार्हपत्यव्यूहने विनियुक्ता तृतीये व्यूहः ॥

सञ्ज्ञानमूषदेवत्यम् ॥

सञ्ज्ञानमित्यूषदेवत्यं यजुः । प्राजापत्यबृहती । जघनिधापित्र विनियोगः ॥

अग्नेः सिकता ॥

अग्नेर्भस्मासीत्यस्य सिकतादेवता यजुस्त्रिष्टुप् । सिकतानिधापे विनियोगः ॥

चितः परिचितः ॥

चितस्य परिचितइत्यस्य परिचितोदेवताः साम्नोष्णिक् । परिचितां परिस्तरणे विनियोगः ॥

अयर्ठ० सः पञ्चर्चमाग्नेयं त्रैष्टुभं विश्वामित्रः ॥

अयर्ठ०सो अग्नि , अग्ने यत्ते दिवि, । अग्ने दिवोऽर्ण, पुरीषासः, इडामग्नइत्येतत्पञ्चर्चमग्निदेवत्यं त्रिष्टुप्छन्दस्कं विश्वामित्रऋषिरपश्यत् । आधानां चतसृणामङ्गबृहतीनामुपधाने विनियोगः, इडामग्नइत्यस्यास्तिरश्चयुपधाने विनियोगः, यद्दोषधीष्विति नवाक्षरो व्यूहइयेनपूरणीयः । येनांतरिक्षमितिचैकेन । अच्छादेवानिति च, या रोचने, याचावस्तादिति च ॥

चतुर्थ्यनुष्टुप् ॥

अस्मिन्पञ्चर्चे चतुर्थी पुरीषासइत्येषाऽनुष्टुभोऽपवादः । अत्र यजमे व्यूहः इडामग्नइत्यत्र तृतीयचतुर्थयोर्व्यूहः ॥

अयं तेऽनुष्टुप् ॥

अयं तइत्येषाऽग्निदेवत्याऽनुष्टुपछन्दस्का तिरश्चूपधानेऽस्य विनियोगः । आग्नेयपदमनुवर्त्तते । इदमपि पुनरुक्तं मन्त्रं । अयं ते इत्येतस्याः पूर्वमुक्तत्वात् ॥

चिदेष्टके ॥

चिदसि, परिचिदसीत्येते यजुषी ऐष्टके इष्टके देवते । पूर्ववोच्छिरश्चोपधाने विनियोगः चिदसि प्राजापत्यानुष्टुप् । परिचिदग्निर्वर्गमायची ॥

लोकं लिगोक्तानुष्टुप् ॥

लोकं पृणेतीयमृक्लिङ्गोक्तदेवता अनुष्टुप् । लोकंपृणैवोऽस्यादेवतेत्यर्थः । द्वितीये त्वंशब्दे व्यूहः । लोकंपृणाभिमन्त्रणे विनियुक्ता ॥

ताऽअस्यापीं प्रीयमेधऽऐन्द्रः ॥

अनुष्टुबित्यनुवर्त्तते । ताऽअस्य सूददोहसऽइतीमामृचमैन्द्रानुष्टुभं ऐन्द्रः इद्वत्सःपुत्र प्रियमेधसक्तविरपश्यत् । सूददोहसाधिवदने विनियोगोऽस्याः ॥

इन्द्रं जेता माधुछन्दसऽऐन्द्रः ॥

अनुष्टुभमित्यनुवर्त्तते । इन्द्रं विश्वाऽइतीमामृचं इन्द्रदेवत्यामनुष्टुभं मधुच्छन्दसोऽपत्यं जेताऽपश्यत पुरीषनिधावेऽस्या विनियोगः ॥

समितं चतस्रो दृष्यग्निदेवत्या उष्णिगुपरिष्टाद्बृहत्युष्णिक्पङ्क्तयः ॥

समितं संकल्पेयां । संवां । अग्ने त्वं पुरीष्यो, भवतन्नःसंताबत-

स्त्र ऋषी दृष्यग्निदेवताः द्वावग्नीदेवते यासां तादृष्यग्निदेवताः। यजाक्षनसुष्णिगुपरिष्टादृबृहत्सुष्णिक्पङ्क्तयः। समितनेत्रया ऋष्यक्छन्दः एकाधिकाप्युष्णिक्। अनियताक्षरपादत्वेऽप्यक्षराणामष्टाविंशतिसंख्यत्वात्। सर्वामित्यस्या उपरिष्टादृबृहती। अथ द्वितीयसप्तकः तृतीयो नवकः चतुर्थदशयोदशकद्वयेकाधिका। अग्नेर्त्वं उष्णिक्। इयं एकाधिका। आयुष्णिक् अनियताक्षरपादत्वेऽप्यक्षरैस्तथात्वात्। भवतं नः पङ्क्तिः। इयमाद्याऽर्धापङ्क्तिः अनियताक्षरपादत्वेऽप्यक्षरैस्तथात्वात्। उखास्राग्नेर्गार्हपत्यचितौ स्रापने घृतमृचां विनियोगः॥

मातेवोरवाद्युतिरिष्टुप्॥

मातेव पुत्रमितीयमृगुखायाः स्तुतिः उखेव देवनेऽर्चेः त्रिष्टुप्। उखायाः। शिक्षाद्विमोचने विनियोगः। अथ द्वितीयो नवकः। चतुर्थो द्वादशकः॥ २॥

असुन्वन्तं नैर्ऋतं तृचं वैष्टुभम्॥

असुन्वंतमयजमानं, नमः सूते। यस्यास्ते घोरमित्येतत्तृचं निर्ऋतिदेवत्यं त्रिष्टुप्छन्दस्कं नैर्ऋतीनामुपधाने विनियुक्तं। प्रथमायास्तृतीयो दशकः द्वितीयायाश्च। तृतीयोदशकः तृतीयायाः प्रथमो दशकः तृतीयचतुर्थौ द्वादशकौ॥

यन्ते यजमानदेवत्या॥

त्रिष्टुप्पदमत्रानुवर्त्तते। यन्ते देवीरितीयं यजमानदेवत्या त्रिष्टुप्। शिक्षकल्पाग्नेष्ठवाऽऽसन्दीनां निरसने विनियुक्ता, अत्र द्वितीयादिपादत्रयं व्यूहनेव पूर्यम्॥

नमो विराड्भूतिदैवत्यैकपदा॥

नमो भूत्वा इत्येकपदा विराट्भूतिदेवत्या इमाधरा हि विरा-

द्वित्युच्यते । चतीव व्यूहेन पूर्वाऽत्याने विनियोगः ॥

निवेशनऐंद्रीं त्रिष्टुभं विश्वावसुर्दैवगन्धर्वः ॥

निवेशनः सङ्गमनइतीमामृचं इन्द्रदेवत्यां त्रिष्टुभं विश्वावसुर्दैवगन्धर्वोऽपश्यत् । आत्मादारि भवत्य गार्हपत्यचितिरूपस्याग्नेरुपस्थाने विनियोगः । द्वितीये व्यूहः ॥

सीरा हे सीरदैवत्ये बुधसौम्यो गायत्रीत्रिष्टुभौ ॥

सीरा युञ्जति, युनक्त सीरा इतीमे ऋचौ सीरदैवत्ये क्रमेण गायत्री त्रिष्टुभौ सौमपुत्रौ बुधऋषिरपश्यत् । युज्यमानस्य सीरस्याभिमन्त्रणे विनियुक्ते । युनक्त सीरेत्यत्र द्वितीयचतुर्थयोर्व्यूहः ॥

शुनं चतस्रः सीतादैवत्याः कुमारहारितो हे त्रिष्टुभौ तृतीयापङ्क्तिश्चतुर्थ्यनुष्टुप् ॥

शुनं सुफाला, घृतेन सीता, लांगल, कामदुघे । एतायतस्रः सीतादेवत्याः कुमारहारितऋषिरपश्यत् । आसु चतसृषु शुनं सुफाला, घृतेन सीता एते द्वे त्रिष्टुप्छन्दस्के । तृतीया लाङ्गलमित्येषा पङ्क्तिछन्दस्का । चतुर्थी कामं कामदुघे इत्येषा अनुष्टुप्छन्दस्का । सर्वासां ऋषीणां विनियोगः, घृतेन सीतेति द्वादशाक्षरः । तेनैकाधिका । लाङ्गलम् सप्तकः । तेनैकोना प्रथमे व्यूहः । इन्द्राग्निभ्यां व्यूहः । प्रजाभ्यः सप्तकस्तेनैकोना ॥

विसृज्यध्वमानडुहो गायत्रो ॥

विसृज्यध्वमित्येषा अनडुद्देवता गायत्री । अनडुदिमोक्षे विनियुक्ता एकाधिका आर्षीगायत्री । पादानामनियताक्षरत्वेऽपि चतुर्विंशत्यक्षरत्वात् ॥

सजूर्ऋतुभिरुक्षदेवतम् ॥

सजूरृतुभिरित्येतत्सजूर्ऋतुभिरुक्षदेवतम् । कुशसम्बे चतुर्गृहीतहोमे वि-

नियुत्वं । त्राह्मीबृहती । अग्निः देवता: अग्निनो मूरो मेधामदत्वेति त्रिशोक्ता देवता: ॥ १० ॥

याओषधीः सप्तविंशं प्रतिमनुष्टुभओषधिस्तुतिमाथर्वणो भिषक् ॥

याऽओषधीः पूर्वाजाताइत्याद्या, योऽअक्षां अभिदासतीत्यन्ताः सप्तविंशतिसंख्या अनुष्टुप्छन्दस्का ओषधिस्तुतिमोषधिदेवत्या अथर्वणः पुत्रो भिषक्सञ्ज्ञक ऋषिरपश्यत् । अनुष्टुभइतिद्वितीयाबहुवचनम् । तद्विशेषणम् तु सप्तविंशतिमिति द्वितीयैकवचनं "विंशत्याद्याःसदैकत्वइतिवचनात्" । वीरुधः पारदिवस्वः, इन्द्रजुष्टा:, धनं सनिष्यन्तीनां । अतिविध्याः इतेनइवेति, नवक. ओषधीः प्रातुथवुर्यत्किञ्च,साकं यद्यत्र, साकं वातस्य । हृदस्यतिस्तानो मुञ्चन्तु, एते मातमाक्षरः एतेषु व्यूहः । असंभवेएकोनं छन्द. । आद्याः पञ्चदश सर्वौषधवपने विनियुक्ताः अवशिष्टानां द्वादशानां मुञ्चन्तु मा शपथ्यादित्यादीनां क्वापि विनियोगो नास्तीत्याह ॥

मुञ्चन्तु बध्नद्वादशानारभ्याधीताः ॥

मुञ्चन्तु मा शपथ्यादित्याद्या द्वादशर्चोऽनारभ्याधीतः बध्नुक्ष ऋषिरपश्यत् । कञ्चन कर्म विशेषमारभ्याधीता, अनारभ्याधीताः । नचारभ्याधीता अनारभ्याधीताः आसां क्वापि विनियोगो नास्तीत्यर्थः, मुञ्चन्तु मा । अथो वरुण्यात् । बृहस्पतीति सप्तकः । अस्मैसं ते । मा वः । सवमस्तु । उषसयइतिनवकः । सोमेनेति सप्तकः । अर्यमइति नवकः, त्वांगन्धर्वाः । सहस्व । सहस्वपाप्मा, दीर्घायुस्ते, दृषकः तेन दृव्यधिका । त्वमुत्तमा । अत्र एतेषु पादेषु यथासंभवं व्यूहः । तदसंभवे छन्दसो न्यूनता ॥

मा मा हिरण्यगर्भः कायीं त्रिष्टुभम् ॥

मा आग्नि एषीद्वितीयाक्षरं कार्षी कायदेवत्यां त्रिष्टुभम् हिरण्यगर्भऋषिरपश्यत् । द्वितीये व्यूहः पुरस्ताल्लोगेष्टकोपधाने विनियोगोऽस्याः ॥

अभ्यावर्त्तस्वोष्णिगाग्नेयी ॥

अभ्यावर्त्तस्वेतीयमृक् सप्तिक् अग्निदेवत्या । अस्याएकादशकस्तेने कोना । दक्षिणतो लोगेष्टकोपधाने विनियुक्ता ॥

अग्ने यद्गायत्री ॥

आग्नेयीत्यनुवर्त्तते । अग्ने यत्ते शुक्रमितीयमृक् अग्निदेवत्या गायत्रीछन्दस्का पश्चाल्लोगेष्टकोपधाने विनियुक्ता । अत्र प्रथमो नवकः तेनैकाधिका ॥

इषं त्रिष्टुप् ॥

इषमूर्जमित्यस्यास्त्रिष्टुप्छन्दः आग्नीर्देवता । यावत्यस्योत्तरतो लोगेष्टकोपधाने विनियोगः चतुर्थस्य सिकतापातने । अत्र प्रथमद्वितीयर्यार्व्यूढ ॥

अग्ने तव पावकोऽग्निराग्नेयऽषड्चम् ॥

अग्ने तवेति षड्चम् अग्निदेवतम् पावकोग्निऋषिरपश्यत् सिकतावापे विनियोगोऽस्यषड्चस्य ॥

प्रथमे विष्टारपङ्क्तिः ॥

यस्या द्वितीयतृतीयौ पादौ द्वादशकौ आद्यतुरीयावष्टकौ । सा विष्टारपङ्क्तिः । "मध्यमौ चेद्विष्टारपङ्क्ति" रितिवचनात् । बृहद्भानो । अस्य व्यूहेन पूरणम् । पावकवर्चाइत्ययं नवकस्तेनैकाधिका ॥

तिस्रः सतोबृहत्यः ॥

ऊर्जो नपात् । इरज्यन्नग्ने, इन्नक्तोषसं इत्येतास्तिस्रऋचः सतोबृहत्यः । यस्याः प्रथमतृतीयौ द्वादशकौ इतरावष्टकौ सा सतोबृहती-

"वसुजो जागतो ऋतोवृष्टतीत्युक्तेः" त्रेऽष्टवरत्वञ्च व्यूहः। यज्ञे दाने। वृत्वञ्च ॥

उपरिष्टाज्ज्योतिःषष्टौ ॥

अस्मिन्नेव षड्चेषष्टौ ऋतावाजसित्वेषा ऋचमुपरिष्टाज्ज्योतिरृच्छन्दस्का। अक्षा ऋचस्त्रयः पादा हादयाक्षरायतुर्थोऽष्टाक्षरः। सोपरिष्टाज्ज्योति" अतोऽष्टकस्ततो ज्योतिरित्युक्तेः" अत्र युत्कर्षं देवं मानुषत्वनयोर्व्यूहेनपूरणम् ॥

आप्यायस्व गोतमः सौमीर्गायत्रीत्रिष्टुबुष्णिहः ॥

आप्यायस्व समेतु। सन्ते पयांसि। आप्यायस्व मन्दितमेत्येतास्तिस्रऋचः सौमीः सोमदेवताः। क्रमेण गायत्रीत्रिष्टुबुष्णिक्छन्दस्का गोतमऋषयश्चक्षत्। आद्ययोराप्यायस्व, सन्ते पयांसीत्येतयोः सिक्तानामाप्यायने विनियोगः, तृतीयस्या विनियोगउक्तो नास्ति। विश्वतः सोमेत्यत्र व्यूहः। संवृण्वानीत्यत्र होव्यूहौ। दिवीत्यत्र च ॥

आतेऽ वत्सारः ॥

आते वत्सो मनइत्येतामवत्सारऋषिरपश्यत् ॥

तुभ्यंता द्वे विरूपः ॥

तुभ्यंता, अग्निः प्रियेष्वितीमे द्वे ऋचौ विरूपऋषिरपश्यत्। तिस्रो गायत्र्य आग्नेय्यः, आते वत्सस्तुभ्यंता, अग्निः, प्रियेष्वितीमास्तिस्रऋचोऽग्नि देवता गायत्रीछन्दस्काः। तिसृणामपि चयने अग्निभ्यः प्रक्रियमाणेभ्योऽनुब्रूहीति प्रेषितस्य होतरनुदानने विनियोगः। वरमाचित्। अयं समकः। तनेकोना ॥ ११ ॥

मयि ककुबाग्नेयी ॥

मयि यज्ञामीतीयमृक्ककुप्छन्दस्काग्निदेवता। अक्षाक्षिपदा मध्यमो हादयक्षः। प्रथमस्तृतीयावष्टकौ। सा ककुबुष्णिगुच्यते।

"मध्यमयेत्कनकमिति" वदनात् । अत्र तु मध्यमषष्ठदैवकर्मीन दृश्याधिका यजमानजपेऽस्या विनियोगः ॥

ब्रह्मादित्यदेवता त्रिष्टुप् ॥

ब्रह्मवज्ञानमित्येषा त्रिष्टुप्छन्दस्का । आदित्यदेवता च । द्वतीये व्यूहः । एकोनता वा । रुक्मोपधाने विनियोगः ॥

हिरण्यगर्भो हिरण्यगर्भः कायं त्रिष्टुभम् ॥

हिरण्यगर्भः समवर्त्ततेतीमामृचं कायदेवतां त्रिष्टुभं हिरण्यगर्भः ऋषिरपश्यत् । हिरण्यपुरुषोपधानेऽस्या विनियोगः । चतुर्थे व्यूहः ॥

नमोऽस्तुसर्पं तृचमानुष्टुभम् ॥

नमोऽस्तु सर्पेभ्यइतीदं तृचं सर्पदेवतमनुष्टुपछन्दस्कं । यजमानस्योपस्थाने विनियुक्तं । नमोऽस्त्वित्ययं षडक्षरः व्यूहेन समाक्षरः । तेनैकोना । सर्पेभ्यइत्यत्र पुनर्यकारव्यूहो वा, याऽइषवइति नवकस्तेनैकाधिका ॥

क्रमुश्च पञ्च प्रतिसरा राक्षोघ्नादेवानामार्षम् ॥

क्रमुश्च पाजइत्याद्याः पञ्चर्चः प्रतिसरा राक्षोघ्नाः राक्षसान्प्रत्यस्त्रस्वरूपेण सरन्तीति प्रतिसराः अतएव रक्षोहननसम्बन्धात् राक्षोघ्नाइत्यासां संज्ञाः । देवानामार्षं । देवा आमासूषयइत्यर्थं । "एतद्वै देवा अविभयुरिति देवान्प्रकृत्य तएता राक्षोघ्नान्प्रतिसरानपश्यः क्रमुश्चपाजइत्यादिश्रवणात्" ॥

सर्वास्त्रिष्टुभ आग्नेयी वामदेवश्चापश्यत् ॥

क्रमुश्चपाज इत्याद्याः सर्वाः पञ्चापि त्रिष्टुपछन्दस्का अग्निदेवताः वामदेवश्च ऋषिरपश्यत् । वकारः पूर्वोक्तैर्देवैर्ऋषिभिः समुच्चयार्थः पुरुषे पञ्चगृहीतहोमे सर्वासां विनियोगः । याऽइह राजेव । तृच्यौ अनयोर्व्यूहः । तपूंष्यग्ने हो व्यूहो उदग्ने अग्निवान् । अनयो

र्ग्यूहः । नीचा तं । उद्भ्यो भवेत्यत्र च । आविरित्यत्र द्वौ ॥

अग्नेऽङ्गा यजुराग्नेयम् ॥

अग्नेऽङ्गा इत्येतदग्निदेवतम् यजुःपङ्क्तिः काण्डर्षयेषुगुपधाने विनियोगः । अग्निर्मूर्द्धेत्यस्याः प्रागुक्तं सर्वम् ॥

इन्द्रस्यैन्द्रम् ॥

इन्द्रस्य त्वौजसेति यजुरिन्द्रदेवतम् । यजुःपङ्क्तिः । औदुम्बरेषुगुपधाने विनियोगः ॥

भुवस्त्विगिरा आग्नेयी विष्टभम् ॥

भुवो यज्ञस्येतीमास्रुचं अग्निर्देवता विष्टुभम् त्रिभिराक्षरैरुपक्रमात् । औदुम्बर्याः स्रुचश्चमधानएवास्या अपि विनियोगः ॥ १२ ॥

ध्रुवास्यूर्ध्वबृहती ॥

ध्रुवासि धरुणेतीयमृक् ऊर्ध्वबृहती, यस्मात्त्रयः पादा द्वादशकाः । सोर्ध्वबृहती । "विजागतोर्ध्वबृहतीत्युक्तेः" । अत्र प्रथमस्त्रयोदशकः द्वितीयो द्वादशकः । तृतीयो दशकइति । व्यूहेन छन्दः पूर्तिः ॥

प्रजापतिरनुष्टुप् ॥

प्रजापतिरितीयमनुष्टुप् । आद्यौ नवकौ । चतुर्थः सप्तकः ॥

भूरसि प्रस्तारपङ्क्तिः ॥

भूरसीत्यस्याः प्रस्तारपङ्क्तिश्छन्दः । यस्या आद्यौ द्वादशकौ । अन्त्यावष्टकौ सा प्रस्तारपङ्क्तिः । "आद्यौ चेत्प्रस्तारपङ्क्तिरित्युक्तेः" अत्र आद्यएकादशकः द्वितीयस्त्रयोदशकः तृतीयश्चतुर्थो पञ्चमश्चैकादशइति एवं चत्वारिंशदक्षरैषा ॥

आसाए स्वयमातृण्णा देवता विश्वस्माएतस्य च यजुषः ॥

आसां ध्रुवासीत्यादिचतसृणामासां विश्वस्मै प्राचायेत्येतस्य यजुषश्च स्वयमातृण्णादेवता । स्वयमातृण्णोपधाने सर्वेषां विनियोगः । वि-

अ एकाधिकारमे आर्षी यजुष्टुप् ॥

कांडात्कांडादानुष्टुभं दृग्वृचमग्निना दृष्टम् दूर्वेष्टकादेवतम् ॥

काण्डात्कांडात्, या अतेनेत्येतदृग्वृचमनुष्टुभं दूर्वेष्टकादेवतमग्निना दृष्टं अग्निरस्यऋषिरित्यर्थः । तस्यास्तं इत्यस्य व्यूहः । दूर्वेष्टकोपधाने विनियोगः ॥

यास्ते अग्नेयं दृग्यजुरानुष्टुभमिन्द्राग्निभ्यां दृष्टम् ॥

यास्ते अग्ने, या वो देवादित्येतदृग्यजुः अनुष्टुप्छन्दस्कमिन्द्राग्निभ्यां दृष्टं । इन्द्राग्नी अस्य ऋषिरित्यर्थः । अस्य दिवमग्नेत्यन्वयीति नवकः । तेनैकाधिका । गोप्यश्वेत्यस्य व्यूहः । दिवजुषउपधाने विनियोगः ॥

विराडयं श्लोकः ॥

विराड्ज्योतिरित्यस्यायं श्लोको देवता । यजुरनुष्टुप् । रेतः सिगुपधाने विनियोगः ॥

स्वराडसौ श्लोकः ॥

स्वराड्ज्योतिरित्यस्यासौ श्लोको देवता । यजुरनुष्टुप् । रेतः सिगुपधाने विनियोगः ॥

प्रजापतिर्द्वा वैश्वज्योतिषम् ॥

प्रजापतिर्द्वेत्येतद्यजुर्वैश्वज्योतिषम् । विश्वज्योतिरस्य देवतेत्यर्थः । व्यूहः यजुरीछन्दः । विश्वज्योतिषउपधाने विनियोगः ॥

मधुश्चर्तुदैवतम् ॥

मधुश्चर्तुदैवतं । मधुश्च माधवश्चेत्येतद्यजुश्चर्तुदेवतं अस्य अष्टोत्तरशतमक्षराणि सन्ति तेनानियताक्षरत्वाच्छन्दसोऽभावः । ऋतव्योपधानेऽत्र विनियोगः ॥

अपाद्दाऽसि सविताऽपश्यत्। देवा वाऽअश्वस्त्रिष्टका-देवतम् ॥(१)

अपाद्दासि तृतीयामृचं इष्टकादेवतं विराडनुष्टुप्छन्दस्कां सवि-ताऽऋषिरपश्यत् ॥

अपादौ एकादशाक्षरौ तृतीयोऽपि व्यूहेनैकादशकः । तेनेयं विराडनुष्टुप्। "दशकाक्षरो विराडेकादश्यका वेति"वचनात्।अश्व-ष्टोपधानेऽस्या विनियोगः ॥ १३ ॥

मधु वाता वैश्वदेवं तृचं गायत्रं गौतमः ॥

मधु वाता इत्येतत्तृचं विश्वदेवतं गायत्रीछन्दस्कं गौतमऋषिरप-श्यत्। दधिमधुघृतैः कूर्माऽभ्युक्षणेऽस्य विनियोगः। अस्य माध्यीनः इत्यस्य व्यूहः। मधुमाँअस्तु सप्तकः। तेनैकोना ॥

अपां गंभन्यङ्क्तिः ॥

अपां गंभन्नित्यस्याः पङ्क्तिः छन्दः अस्य तृतीयो द्वादशकः अन्ये दशकाः। तेन दृव्यधिका स्वराट्पङ्क्तिरियं कूर्मोपधाने विनियोगः ॥

चीन्त्समुद्रांस्त्रिष्टुप् ॥

चींस्समुद्रानित्यस्यास्त्रिष्टुप्छन्दः। अस्य प्रथमो दशकः तृतीयोद्वा-दशकः अन्यौ एकादशकौ ॥

कौर्म्यं तृच्यृचम् ॥

अपां गंभन् चींसमुद्रानित्येतत् ऋग्द्वयं कौर्म्यं कूर्मदेवतम् कूर्मश्च "प्रजापतिरादित्यो वेति संहिताभाष्ये" चींसमुद्रानित्यस्य कू-र्मकांडे विनियोगः। तृतीयाऽश्व मक्षी वोरिति कूर्मोपधाने विनियुक्ता। तस्या ऋचाहि प्रागुक्तम् ॥

ध्रुवाऽसि त्रिष्टुप् ॥

---

(१) अपाद्दासि द्वे सविताऽपश्यद्देवा वाऽअश्वस्त्रिष्टकादेवते विराडनुष्टुभौ इति. काण्वशाखीय सर्वानुक्रमपाठो बोध्यः ॥

ध्रुवाऽसि यदेतदक्षरमित्यनुष्टुप्छन्दः उक्षोपधानेऽभ्या विनियोगः । प्रथमो द्वादशकपालेनेत्याधिका ॥

दृषे वृहती ॥

दृषे रायस्पोषाय बृहतीछन्दः उक्षोपधानएव विनियोगः । अथा सौ दृषकः । अग्नावपि व्यूहेन दृषकः द्वादशकपालः । तंत्रैवमार्षीबृहती पादाक्षरनियमाभावेऽपि ॥

औखं दृष्यूचम् ॥

ध्रुवाऽसि, दृषे रायस्पोषायेतदृष्यूचमौखं उक्षादेवताम् ॥

अग्ने युक्ष्वाग्नेयन् दृष्यूचङ्गायत्रम् ॥

अग्ने युक्ष्वाहीत्येतत्दृष्यूचमग्निदेवतम् गायत्रीछन्दस्कं । उक्षायां खुवाहुतिहोमे उपस्थाने वा विनियुक्तम् ॥

आद्यायां भरद्वाजः ॥

आद्यायाः अग्ने युक्ष्वाहीत्यस्याः भरद्वाजऋषिः ॥

द्वितीयस्या विरूपः ॥

द्वितीयस्या युक्ष्वाहीत्यस्याः विरूपऋषिः । अथ तृतीये व्यूहः ॥

सम्यक्स्रवन्तीत्यनुष्टुब्लिङ्गोक्तदेवता ॥

सम्यक्स्रवन्तीतीयमनुष्टुप्छन्दस्का लिङ्गोक्तदेवतामुखे शिरस्यग्नकलप्रासने विनियुक्ता ॥

घृते त्वा बृहती ॥

घृते त्वा रूपे त्वेतीयं लिङ्गोक्तदेवता शिरस्यग्नकलदेवतेत्यर्थः । बृहतीछन्दस्का । व्यूहेनैवमार्षीबृहती । पादानामक्षरनियमाभावात् । अस्यमः षट्स्वानेषु शिरस्यग्नकलप्रासने विनियुक्ता । घृते त्वेत्यस्य दधिघनासिकायाम् । रूपे त्वेति सव्यायां । भासे त्वा दधिघचक्षुषि अभूदिदं । दधिघत्रीवे ॥

अग्निर्ज्योतिषोष्णिक् ॥

लिङ्गोक्तदेवतेत्यनुवर्त्तते । अग्निर्ज्योतिषेतीयमृक्तत्रोष्णिक्छन्दस्का । आद्यस्यार्द्धोत्तरार्द्धे शिरस्यग्नवक्षसि विनियोगः, सहस्रदाइत्यस्य पुरुषशिरसउदपक्षे । द्वावाद्यावष्टभौ । तृतीयस्य व्यूहेन हृदयाक्षरपूरणम् ॥

आदित्यं गर्भं पञ्चर्चमाग्नेयं त्रैष्टुभम् ॥

आदित्यं गर्भं पयसा । वातस्य जूतिम् । अजस्रमिन्दुम् । बृहतीं त्वष्टुः, योऽग्निरग्ने रित्येतत्पञ्चर्चं अग्निदेवतं त्रिष्टुप्छन्दस्कं । आदित्यं गर्भमित्यस्याः पुरुषशिरसउपधाने विनियोगः, वातस्य जूतिमित्यस्यांसयोः शिरसउपधाने । अजस्रमिन्दुमित्यस्या गोः शिरसउपधाने । बृहतीमित्यस्या अविशिरसउपधाने । योऽग्निरित्यस्याजशिरसउपधाने विनियोगः । अत्र पञ्चर्चं अग्ने माहिष्मीः । अजस्रमिन्दुं अमयोर्व्यूहः । मा माहिष्ठं-सीः दृशकः, योऽग्निः व्यूहः । योकादृहादृशकः, त्रिपंक्तेवानामित्यस्यास्तु ऋचादि प्रागुक्तं । (१)अथार्द्धर्चेषु सुवाहुत्योर्होमे विनियोगइतिविशेषः ॥

इमंमा पञ्चर्चमाग्नेयं त्रैष्टुभमेव हंहे चांते यजुषी ॥

इमं माहिष्मीः । इमं मा हिष्मीर्दृहिपादं । इमंसाहस्रम । इममूर्णायुं । अजो अग्नेरित्येतत्पञ्चर्चमग्निदेवतं त्रिष्टुप्छन्दस्कमेव तनूमयुन्ते शुष्टुक्षत्रित्यादीनामन्तराले मध्ये गायत्र्यादिकछन्दोऽन्तरांका कार्येवकारार्थं । पञ्चानामप्यृचामन्ते प्रत्येकं हंहे यजुषी । मयुन्ते शुक् । संहितस्तंतइत्यादिके । उपधाक्रमेण पुरुषाविशिरसामुपधाने क्रमेण पञ्चानामृचां सयजुष्काणां विनियोगः । इमंमा हिष्ठं-सीर्दृहिपादं । दृशकः, तेन चिन्वानः व्यूहः । मयुन्ते । देवीजगती । यन्हि

---

(१) अदृहंचेशः सुरुत्योर्होमे विनियोगइति पञ्चातपाठः ॥

ऋः यजुर्बृहती । गोरग्ने देवीजगती । मयस्ते यजुरनुष्टुप् । अङ्गे । देवीजगती । अरभ्ते यजुरनुष्टुप् यन्दिवश्चरतियजुर्बृहतीभ्यां चर्वः च । व्यचसाम । अजो ह्यग्नेः व्यूढः । सोऽयरदश्वकः । इमेऽसाङ्कसमित्याद्यासु तिसृषु अवसानदयात्परासि तीणि यजूंषि । मयस्मारण्य, उष्ट्रमारण्यं । अरभमारण्यमित्यादीनि, मयस्यं, अरभं । इमे सामचिष्टुभौ । उष्ट्रं ऋगुष्णिक ॥

त्वं यविष्ठोग्नाः काव्यग्नेयीमनिरुक्तां गायत्रीम् ॥

त्वं यविष्ठेतीनामृचं अग्निदेवतामनिरुक्तां मध्येऽग्निपदनिरुक्तिरहिता गायत्रीं कूवेरपत्यमुशना ऋषिरपश्यत्, प्रथमे व्यूढः, चित्तोपस्थानेऽस्या विनियोगः ॥

अपां त्वा विश्वतिरैष्टकानि ॥

अपां त्वेमसित्यादीनि पाङ्क्तेनत्वा छन्दसेत्यन्तानि विंशतियजूंषि इष्टकादेवतानि । अपस्थानामुपधाने विनियुक्तानि । अपांत्वेमन् । १ । अपांत्वोदमन् । २ । यजुरनुष्टुभौ । अपां त्वा भस्मन् । यजुर्बृहती ॥ ३ ॥ ज्योतिषि । यजुः पङ्क्तिः ॥ ४ ॥ अयने । यजुर्बृहती ॥ ५ ॥ अर्णवे ॥ ६ ॥ समुद्रे ॥ ७ ॥ सरिरे ॥ ८ ॥ यजुरवस्तिष्टुभः । अपये । यजुर्बृहती ॥ ९ ॥ सधिषि ॥ १० ॥ सदने ॥ ११ ॥ सधस्थे ॥ १२ ॥ यजुः पङ्क्तयः । योनौ ॥ १३ ॥ यजुर्बृहती । पुरीषे ॥ १४ ॥ पायसि ॥ १५ ॥ यजुःपङ्क्तौ । गायत्रेण ॥ १६ ॥ त्रैष्टुभेन ॥ १७ ॥ आगतेन ॥ १८ ॥ यजुर्जगत्यः । आनुष्टुभेन ॥ १९ ॥ आसुर्यनुष्टुप् । पाङ्क्तेन त्वा ॥ २० ॥ यजुस्त्रिष्टुप् ॥

अयं पुरः पञ्चाशत्प्राणभृद्देवत्यानि ॥

अयंपुरोभुवदित्यादीनि वाचं ग्रहाणि प्रजाभ्यइत्यन्तानि पञ्चाशदजूंष्यपि प्राणभृतामुपधाने विनियुक्तानि । एषां छन्दांस्युच्यंते । अ-

र्बृहतः । यजुर्गायत्री ॥ १ ॥ तस्य प्राचः । यजुरनुष्टुप् ॥ २ ॥ वसन्तः यजुरुष्णिक् ॥ ३ ॥ गायत्री । वासन्ती ॥ ४ ॥ गायत्र्यै ॥ ५ ॥ गायत्रात् ॥ ६ ॥ दैव्यस्त्रिष्टुभः, उपाएगो देवीपङ्क्तिः ॥ ७ ॥ विश्वतः । देवीजगती ॥ ८ ॥ वसिष्ठः दैवीपङ्क्तिः । ९ ॥ प्रजापतिर्बृहत्यायत्री ॥ १० ॥ अयं दक्षिणा । यजुर्बृहती । १ ॥ तस्य मनो । यजुर्बृहती ॥ २ । पौष्णो दैवीपङ्क्तिः, । ३ । त्रिष्टुप् । दैवी बृहती ॥ ४ ॥ त्रिष्टुभः दैवीपङ्क्तिः ॥ ५ ॥ स्वाराट् यजुर्गायत्री ॥ ६ ॥ अन्तर्यामात् यजुरनुष्टुप् ॥ ७ ॥ पञ्चदशात्यजुर्गायत्री ॥ ८ ॥ भरद्वाजो यजुर्गायत्री ॥ ९ ॥ प्रजा० ऋग्गायत्री ॥ १० ॥ अयं पञ्चात् । यजुर्बृहती ॥ १ ॥ तस्य चक्षुः । यजुर्बृहती । २ । वर्षाः दैवीपङ्क्तिः ३ जगती दैवीपङ्क्तिः ४ जगत्याऽऋक्षमं । यजुर्गायत्री । ५ । ऋक्षसमात् दैवीपङ्क्तिः । ६ । शुक्रात् । दैवीत्रिष्टुप् । ७ । सप्तदशात् । दैवीजगती । ८ । जमदग्निः, यजुर्गायत्री । ९ । प्रजापतिः । ऋग्गायत्री । १० । इदमुत्तरात्तस्थः । यजुर्गायत्री । १ । तस्य श्रोत्रं यजुर्गायत्री । २ । शरच्छ्रोत्री । यजुर्बृहती । ३ । अनुष्टुप् । यजुर्गायत्री । ४ अनुष्टुभ ऐडम् । यजुर्गायत्री । ५ । ऐडात् । दैवीबृहती । ६ । मन्त्रिणो दैवीजगती । ७ । एकविंश० शात् । दैवीजगती । ८ । विश्वा । दैवीत्रिष्टुप् । ९ । प्रजापतिः, ऋग्गायत्री ॥ १० ॥ इयमुपरि । दैवीजगती । १ । तस्यै । दैवीपङ्क्तिः । २ । हेमन्तो । दैवीपङ्क्तिः । ३ । पङ्क्तिर्हेमन्तोदैवी पङ्क्तिः । ४ । पङ्क्त्यै । यजुर्गायत्री । ५ । निधनवतः । यजुर्बृहती । ६ । आयव्यात् । यजुस्त्रिष्टुप् । ७ । विश्वयत् । सामोष्णिक् । ८ । विश्वकर्मऋषिः । यजुर्गायत्री । ९ । प्रजापतिर्बृहत्यायत्री । १० ।

श्लोकं ताऽइन्द्रं तिस्रः प्रतीकोक्ताः ॥(१)

---

(१) श्लोकपूर्ण ताऽइन्द्रेत्यादिस्तिस्रः प्रतीकोक्ताः इति काण्वपाठः ॥

लोकं पृण च्छिद्रं पृण । ताऽयक्ष मूदृदोहसः, इन्द्रं विश्वा इत्ये-तास्तिस्रऋचो ऽथ प्रतीकोत्ताः । प्रतीकेनादिमाभेचोत्ताः सन्त्यः स-कलाः प्रयोगकाले ज्ञेयाः, लोकं पृणेत्यन्ताः । लोकंपृणाभिमन्त्रणे वि-नियोगः । ताऽयक्षेत्यन्ताः मूदृदोहसाभिवदने । इन्द्रं विश्वाइत्यन्ताः पुरीषनिक्षपणे ॥ (१)

एवर्ठ॰ सर्वत्र ॥

अत्र लोकं ता इन्द्रमित्येवं संहितायां पठ्यते । अनड्वान्वयइत्यन्तां कं डिकायां । यन्त्रीराडित्यन्तां । नवविर्ठ॰ग्रत्या स्तुवंतत्यन्ताध्यायांते तत्र सर्वत्र । एतास्तिस्रऋचः प्रतीकोत्ताः सकला ज्ञेयाः ॥ २४ ॥

इति प्रथमा चितिः समाप्ता । अथ द्वितीया चि-तिः ॥

अभिधीयतइतिशेषः द्वितीया देवानामित्यस्य विषयोप प्रदर्शना-र्थमिदमुत्तरम् ॥

ध्रुवक्षितिः षडचाश्विन्यः ॥

ध्रुवक्षितिर्ध्रुवयोनिः । कुलायिनी । स्वैर्दक्षैः । पृथिव्याः पुरीषं । यदित्यास्वाष्टप्रष्ठेइत्येताः षड्ऋचश्चाश्विन्यः अश्विदेवत्याः आश्विनी-नामुपधाने क्रमेणविनियुक्ताः । आसां छन्दांस्याह ॥

तासां प्रथमा विराट्चतस्रस्त्रिष्टुभो यजुरन्ताः ॥

तासां षड्चानां प्रथमा ध्रुवक्षितिरित्येषा विराडनुष्टुप् । "दश-काक्षयो विराडेकादशकावित्युक्ते." । कुलायिनीत्याद्याश्चतस्रस्त्रिष्टु-भः । षड्चापि यजुरन्ताः । षड्ऋच्यश्विनाध्वर्यूइत्येतद्यजुरन्ते यस्मा-त्सर्वः । अस्य यजुषः । सामगायत्रीछन्दः ध्रुवक्षितिः आद्यतृतीया-वेकादशकौ । द्वितीयो दशकः । स्योने सीद स्वैर्दक्षैः । आवेशा ।

(१) निवापे विनियोग इतिपद्धतिपाठः ॥

एष ब्रूहः, अदित्यास्त्वा आर्ष्यनुष्टुप् एकाधिका। पादानामनियताक्षरत्वेप्यक्षरैस्तथात्वात्

शुक्रश्चर्त्तव्यम् ॥

शुक्रश्च शुचिश्चेत्येतद्यजुर्ऋतव्यं। ऋतुदेवतम्। "वाऽऋतुपितृषसोयत्" ऋतव्ययोरुपधाने विनियुक्तः, अत्र दृश्यधिकं मतद्वयमत्रराधि सन्ति स्थानद्वये ब्रूहः कर्त्तव्यः। तथाचेयमप्रकृतिः संपद्यते ॥

सजूः पञ्च विश्वेषां देवानामार्षम् ॥

सजूर्ऋतुभिरित्यादीनि पञ्च यजूंषि विश्वेषां देवानामार्षं विश्वेदेवा एवां ऋषयइत्यर्थः ॥

ताएव देवताः ॥

विश्वेदेवा एवैषां यजुषांदेवता इत्यर्थः। वैश्वदेवीनामुपधाने क्रमेण पञ्चानां विनियोगः। पञ्चानामपि ब्राह्मीउष्णिक्छन्दः। अधिका ॥

प्राणम् मे पञ्च वायव्यानि ॥

प्राणम् मे पाहीत्यादीनि पञ्चयजूंषि वायुदेवतानि। प्राणभृतामुपधाने क्रमेण विनियुक्तानि, प्राणम् मे। दैवीपङ्क्तिः,। १। अपानं दैवीत्रिष्टुप्। । व्यानं दैवीपङ्क्तिः,। ३। चक्षुर्मे। यजुरनुष्टुप्। ओंत्रं यजुर्गायत्री ॥ ५ ॥

अपः पञ्चापानि ॥

अपः पिन्वेत्यादीनि पञ्चापानि अब्देवतानि अपस्यानामुपधाने क्रमेण विनियुक्तानि। अपः पिन्व। देवीबृहती। १। ओषधीः देवीपङ्क्तिः। २। द्विपात्देवीबृहती। ३। चतुष्पात्। देवीपङ्क्तिः। ४। दिवो। देवीजगती ॥ ५ ॥

मूर्द्धा वयएकोनविंशतिलिङ्गोक्तदेवतानि ॥ १५ ॥

वयस्यानामुपधाने क्रमेण विनियुक्तानि। मूर्द्धा वयः। यजुःपङ्-

क्तिः, । १ । अर्चं । यजुर्बृहती । २ । विश्वकर्मा यजुः पङ्क्तिः, । ३ । विश्व-कर्मा । ४ । यजुर्जगती, । ५ । वृष्टिः । यजुर्बृहती । ६ । सुवर्यो । यजुर्बृहती । ७ । स्वाग्नो यजुर्बृहती । ८ । सिनीवाली यजुरनुष्टुप् । ९ । पञ्चवाट् यजुः पङ्क्तिः, । १० । उषा यजुरनुष्टुप् । ११ । अदभ्यो यजुर्जगती । १२ । अनड्वान् । १३ । धेनुः । यजुर्बृहत्यौ, । १४ । पृथिविः यजुरनुष्टुप् । १५ । द्विपदाड् यजुर्बृहती । १६ । पशवि: यजुः पङ्क्तिः । १७ । चिवत्यौ । १८ । तुर्यवाट् । यजुर्बृहत्यौ । १९ । लोकंपृ-णताऽपस्य । इन्द्रैविश्वा इतितिस्रोऽर्चोऽप्रतीकोपात्ताः पूर्ववत् ॥

इतिद्वितीया चितिः समाप्ता ॥ १५ ॥

अथ तृतीया चितिः ॥

अग्नीषतइति शेषः तृतीयेन्द्राग्न्योर्विश्वकर्मचैत्यस्य विश्वो-पपदर्शनार्थमिदमुक्तम् ॥

इन्द्राग्नी अनुष्टुप्पूर्वार्धौ ॥

ऐन्द्राग्नऽउत्तरः ॥

इन्द्राग्नीदेवते: पृष्ठेनेत्ययंद्वितीयोऽर्धः ॥

स्वयमातृण्णदेवतः ॥

स्वयमातृण्णोपधानेऽस्याः समंसाया विनियोगः । चतुर्थी नवकः । ते-नैवमेकाऽधिका ॥

विश्वकर्मा वायव्यम् ॥

विश्वकर्मैत्येतद्यजुर्वायुदेवतम् । अत्रापि स्वयमातृण्णोपधानएव विनियोगः, एकाक्षरा विकृतिश्छन्दः ॥

राड्यसि पञ्च दिग्देवत्यानि ॥

राड्यसि प्राचीत्यादीनि पञ्च यजूंषि दिक्षानामुपधाने क्रमेण विनियुक्तानि । राड्यसि । यजुर्गायत्री । १ । विराडसि यजुरनुष्टुप् । २ । संराडसि यजुरनुष्टुप् । ३ । स्वराट् । देवीजगती । ४ । अधिपत्नी ।

वसुर्गृहपतौ ॥

विश्वकर्मा वायव्यम् ॥

विश्वकर्मेत्येतदृषभुर्वायुदेवतं । विश्वज्योतिषऽउपधानं विनियुक्तं। [illegible]रीछन्दः ॥

नमश्चेषश्चर्तव्ये ॥

नमश्च नमश्चय,इषवेऽजयेत्येते ऋतुदेवते । ऋतव्यानामुपधाने विनियुक्ते । नमश्च एकाधिका उच्यन्ते, इषवेति पूर्वैरोत्पन्नाः ॥

आयुर्मे दशलिङ्गोक्तदेवतानि ॥

आयुर्मे पाहीत्यादीनि दश यजूंषिलिङ्गोक्तदेवतानि । प्राणभृतामुपधाने विनियुक्तानि । आयुर्मे, । १। प्राणं मे, देवीपङ्क्तौ । २। अपानं यजुर्गायत्री । ३। व्यानं मे, । ४। चक्षुर्मे,। ५ । श्रोत्रमे । ६ । वाचं मे। ७ । मनोमे। देव्यः षड्वयः । ८ । आत्मानं । देवीबिष्टुप् । ९ । ज्योतिर्मे यच्छ देवीपङ्क्तिः ॥ १० ॥

मा छन्दश्च षड्विंशत्यत् ॥

चकारेण लिङ्गोक्तदेवतानीत्याख्यायते । मा छन्दइत्यादीनि षड्विंशत्यक्षराण्यानि यजूंषि चकारालिङ्गोक्तदेवतानि । छन्दस्यानामुपधाने विनियुक्तानि । अष्ट अक्षराणां देव्यनुष्टुप् । चतुरक्षराणां देवीबृहती,पञ्चाक्षराणां । देवीपङ्क्तिः, षडक्षराणां देवीबिष्टुप् । सप्ताक्षराणां देवीजगतीति ॥

मूर्धोऽनुष्टुप् ॥

मूर्धासि राडित्येषानुष्टुप्छन्दस्का । आर्षीमनुष्टुप् । व्यूहश्च ॥

वग्नी परोक्षिक् ॥

वंग्नी राडित्येषा परोक्षिक् । यस्मिन्पदाक्षरावृत्तीवो हादश्यः । आद्यावृत्तौ सा परोक्षिक् "परोक्षिक्परतश्चतुरः" ॥

चतुर्दश यजूंषि प्राणदेवत्यानि ॥

सूर्यादि राज्यन्तोरादित्यनयोः प्रागुक्तयोरनुष्टुप्परोष्णिहोः प्रत्येकं स प्तधाविभागेन चतुर्दश यजूंषि भवन्ति । तानि च प्राणदेवतानि । "प्राणा वै वालखिल्याइतिश्रुतेः" वालखिल्येष्टकादेवत्यानीत्यर्थः । वालखिल्यानामुपधाने विनियुक्तानि । अथवा अत्र विकल्पोगम्यते ऋक्त्वजुश्शब्दयो रेकत्वायोगात् । तेनायमर्थः । इमानि चतुर्दश यजूंषि । नानुष्टुप्परोष्णिहो । कुतः खण्डशएव पृथक्पृथग्विनियोगात् । तदा च त्र्यक्षराणां दैव्यनुष्टुप्, चतुरक्षराणां दैवीबृहती । षडक्षराणांपङ्क्तिरिति । लोकंपृण, तामस्य, इन्द्रंविश्वाइति तिस्रोऽत्र प्रतीकोपात्ताः तासां प्रथमावद्विनियोगादि ॥

इतितृतीया चितिः ॥ १६ ॥

अथ चतुर्थी ॥

चितिरभिधीयतइतिशेषः । चतुर्थीकृषीष्वामित्यस्य विषयोपप्रदर्शनायेतदुक्तम् ॥

आशुरष्टादश ॥

आशुस्त्रिवृदित्यादीन्यष्टादशयजूंषि । आशुरित्यस्य दैवीपङ्क्तिः । १ । भान्तः । दैवीत्रिष्टुप् । २ । व्योमा । दैवीत्रिष्टुप् । ३ । धरुणः दैवीजगती । ४ । चतुर्थी मृत्युमोक्ष्यन्तुपधाने विनियोगः । प्रतूर्त्तिः । ५ । तयादैवीजगती । ६ । तयादैवीत्रिष्टुप् । अभीवर्त्तः । दैवीजगती । वर्चो दैवीपङ्क्तिः । ८ । संभरणः । यजुरनुष्टुप् । ९ । योनिर्दैवीजगती । १० । गर्भाः । दैवीत्रि ष्टुप् । ११ । ओजस्त्रिवृत्तः । दैवीपङ्क्तिः । १२ । क्रतुः दैवीत्रिष्टुप् । १३ । प्रतिष्ठादैवीजगती । १४ । वृष्णश्च । यजुःपङ्क्तिः । १५ । नाकः दैवीपङ्क्तिः । १६ । विवर्त्तः । १७ । यजुर्बृहती, धर्त्र । यजुर्गायत्री । १८ । प्रतूर्त्तिरष्टादशइत्यादीनां चतुर्दशार्द्धयर्चोपधाने विनियोगः ॥

अग्नेदश ॥

अग्नेदश अग्नेर्भागोऽसीत्यादीनि दशयजूंषि । अग्नेर्भागः । प्राजापत्यानुष्टुभी । १ । इन्द्रस्य । सामत्रिष्टुप् । २ । मरुत्वतां । सामजगती । ३ । मित्रस्य । ऋग्बृहती । ४ । अग्नेरित्यादीनां चतुर्णां मृत्युमोचिन्युपधाने विनियोगः । वसूनां भागः । ५ । आदित्यानां । सामजगत्यौ । ६ । अदित्ये प्राजापत्याबृहती । ७ । देवस्य ऋचां पङ्क्तिः । ८ । यवानां । व्यूहो । ऋग्बृहती । २ । ऋभूणां व्यूहः । ऋग्बृहती । १० वसूनामित्यादिषण्णां षट्पद्योपधाने विनियोगः ॥

एकया सप्तदश ॥

एयाऽस्तुवतेत्यादीनि सप्तदशयजूंषि सप्तदशमृष्टीनामुपधाने विनियुक्तानि ॥

सर्वाणि लिङ्गोक्तदेवतानि ॥

सर्वाणीति आशुरित्यादीन्यष्टादश, अग्नेरित्यादीनि दश, एकयेत्यादीनि सप्तदशैतानि, । लिङ्गोक्तदेवतानि । आशुरित्यादीनां विवृत्स्तोमादयो देवता । अग्नेरित्यादीनां च अथवा सर्वेषामुपधीयमाना इष्टका एव देवताः ॥

सहश्चर्तव्यम् ॥

सहश्च सहस्यश्चेत्येतदृतव्यं । ऋतुदेवतं पत्र चाष्टोतरं शतमक्षराणि । एतावत्परिमाणश्च छन्दसोऽभावाच्च छन्दो नास्ति । तदुक्तं । यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यतइति । एकयाऽस्तुवतेत्यादीनां छन्दांस्युच्यते । एकया । सामत्रिष्टुप् । १ तिसृभिः । व्यूहेन सामजगती २ । पञ्चभिः । सामजगती ३ । सप्तभिः । सामत्रिष्टुप् । ४ नवभिः । प्राजापत्याबृहती ५ । एकादशभिः । सामजगती ६ । त्रयोदशभिः सामजगती ७ । पञ्चदशभिर्भुरिक्पङ्क्तिः । ८ । सप्तदशभिः । ऋग्बृह

ती ८ । नवदशभिः । व्यूहेनर्क्षग्बृहती १० । एकविंशत्यक्षरा । साम-जगती । ११ । त्रयोविंश० यत्या सामजगती । १२ । पञ्चविंश० यत्या सामजगती । १३ । सप्तविंश० यत्या ब्राह्मीबृहती । १४ । नवविंशत्यक्षरा । व्यूहेन सामजगती, । ५ । एकत्रिंशत्यक्षरा व्यूहेन ऋग्बृहती । १६ । चतुस्त्रिंश० यत्या । व्यूहेन ऋग्बृहती । १७ । शेषं तां, ऽइन्द्रमिति-प्रथमावत् ॥

इति चतुर्थीचितिः ॥ १७ ॥

अथ पञ्चमी ॥

चितिरभिधीयते पञ्चमी परमेष्ठिनश्चत्यस्य विषयोपप्रदर्शनार्थमिदमुक्तम् ॥

अग्ने जातानाग्नेय्यौ त्रिष्टुभौ ॥

अग्ने जातान्, सहसाजातान्इत्येते ऋचौ अग्निदेवत्ये त्रिष्टुभौ । पुरस्तात्पक्षाच्च क्रमेणासपक्षोपधाने विनियुक्ते । अग्नेश्चत्यस्य द्वितीये व्यूहः चतुर्थो द्वादशकः । सहसाजातान्द्वादशकः ॥

षोडशी चतुश्चत्वारिंश० ग्रो लिङ्गोक्ते ॥

षोडशी स्तोमश्चतुश्चत्वारिंश०स्तोमस्तौमे यजुषी लिङ्गोक्तदेवते । उपधीयमानेष्टकदेवते । षोडशी यजुः पङ्क्तिः । चतुश्चत्वारिंश०मः आसुर्यनुष्टुप् । दक्षिणतश्चोत्तरतश्च क्रमेणासपक्षोपधाने विनियुक्ते ॥

अग्नेस्त्रिष्टुप् ॥

अग्नेः पुरोऽमित्यस्यास्त्रिष्टुप्छन्द इष्टकादेवता पञ्चम्या असपक्षायाश्चोपधाने विनियोगः । प्रथमे व्यूहः ॥

एवश्चत्वारिंशत् ॥

एवश्छन्दश्चत्वारिंशद्यजूंषि विराजाद्युपधाने विनियुक्तानि अत्र चतुरक्षराणां यजुषां देवीबृहतीछन्दः पञ्चाक्षराणां देवीपङ्क्तिः, षडक्षराणां देवीत्रिष्टुप् । सप्ताक्षराणां देवीजगतीति ॥

रश्मिनैकान्नचिंट • मन्त्र ॥

रश्मिना सत्यायेत्यादीन्येकान्नविंशयजूंषि सोमभागानामुपधाने विनियुक्तानि। तत्र। रश्मिना १ प्रेतिना।२। यजुः पङ्क्तिः, अग्नित्वा यजुर्वृहती। ३। सन्धिना। ४ प्रतिधिना। ५। यजुर्जगत्यौ। विष्टम्भेन यजुः पङ्क्तिः, ६ प्रथया दैवीजगती, ७ अनुया। यजुर्बृहती। ८ उपिजा यजुः। पङ्क्तिः ९ प्रक्रेतेन। यजुर्जगती। १०। तन्तुना। सामोच्छिष्ट्, ११ षठं०सर्वेण। यजुस्त्रिष्टुप् १२ ऐडेन। यजुस्त्रिष्टुप्। १३। उपमेन। यजुस्त्रिष्टुप १५ वयोधसा। १५। अभिजिता। १६। यजुस्त्रिष्टुभौ, प्रतिपदसि १७ यजुः पङ्क्तिः, । अनुपदसि १८ यजुर्बृहती। संपदसि १९ यजुरनुष्टुप्। तेजोसि। २०। दैवीजगती, । विवृदसि २१ प्रवृदसि। २२। विवृदसि २३। अवृदसि। २४। आक्रमोऽसि। २५। यजुरनुष्टुभः, सङ्क्रमोऽसि। २६। यजुर्बृहती। उत्क्रमोसि। २७। उत्क्रान्तिरसि। २८। यजुरनुष्टुभौ। अधिपतिना। २९। यजुर्बृहती ॥

राड्यसि पञ्च ॥

राड्यसीत्यादीनि पञ्चयजूंषि। नाकसदामुपधाने विनियुक्तानि। तत्र राड्यसीत्यस्यापष्टाद्योत्तरं शतमक्षराणि। विराडसि। अथ वा विंशयतमक्षराणि। सम्राडसि। अथ सप्तविंशयतमक्षराणि। स्वराडसि। अथ त्रयोविंशयतमक्षराणि। अधिपत्न्यसि। अथ अष्टाविंशयतमक्षराणि। एतेषु राड्यसीत्यादिषु पञ्चसु छन्दोनास्ति एतावत्परिमाणस्य छन्दसोऽभावात्। तदुक्तं यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यतइति ॥

अयं पुरःपञ्च ॥

अयं पुरो हरिकेशइत्यादीनि पञ्चयजूंषि। पञ्चचूडानामुपधाने विनियुक्तानि। तत्रायं पुरः इयं हा नवत्यक्षरा विकृतिः, अयं इयिचा

इयं व्यूढेन चतुरक्षरापङ्क्तिः, अयं पश्चात् । इयमक्षरापङ्क्तिः । अयमुत्तरात् । इयं सप्तसप्ताक्षरा तैत्तैकाधिका अतिधृतिः । अयमुपरि । इयं व्यूढेनाष्टाक्षरापङ्क्तिः । एतानि सर्वाणि लिङ्गोक्तदेवतानि एवञ्छन्दस्त्वारभ्यायमुपर्यर्वाक्सुवित्यन्तानि एतानि सर्वाणि यजूंषि लिङ्गोक्तदेवतानि । उपधीयमानेष्टकैव एतेषां देवताख्यं ॥१८॥

अग्निर्मूर्द्धाग्नेयोऽनुवाकः ॥

अग्निर्मूर्द्धा दिवः ककुदित्ययमनुवाकस्तन्त्वा शोचिष्टदीदिवइत्यंतः आग्नेयः अग्निदेवत अचैव क्रमेण छन्दांस्याह ॥

प्रथमस्तृचो गायत्रः ॥

गायत्रीछन्दस्कः । गायत्रीणामुपधाने विनियुक्तः, अच पतिः पृथिव्या इत्यस्य व्यूढे चरणः ॥

द्वितीयस्त्रिष्टुभो भुवः ॥

अग्निन्नेवानुवाके भुवो यज्ञस्य रयाणामग्निः । अवोचाम कवयइत्ययं द्वितीयस्तृच त्रिष्टुप्छन्दस्कः त्रिष्टुभामुपधाने विनियुक्तः । दिवि मूर्द्धानं । अवोध्यग्निः, अवोचाम एषु व्यूढः ॥

तृतीयो जागतोऽयमिह ॥

अग्निन्नेवानुवाके अयमिह, जनस्य गोपा, त्वामग्ने अङ्गिरसइत्ययं तृतीयस्तृचो जगतीछन्दस्क । जगतीनामुपधाने विनियुक्तः होता यजिष्ठः, वनेषु चित्रं, द्युमद्विभाति । त्वामग्ने अङ्गिरसः । त्वमाहुः । एषु व्यूढः ॥

चतुर्थ आनुष्टुभः ॥

सखायः, सठः समित्, । त्वां चित्रश्रवस्तमेत्ययं चतुर्थ ऋच आनुष्टुभः अनुष्टुप्छन्दस्कः । अनुष्टुभामुपधाने विनियुक्तः ॥

सखायः सम् ॥(१)

अथ सखायः सम्। इष एकोनं, अनवोर्ब्यूढः। वर्धिष्ठाय। सप्तधः, अग्ने विश्वानि। सनो वसूनि अनयोर्ब्यूढः॥

प्रजन्मः प्रगाथ एना वः ॥

अस्मिन्नुवाके एना वदत्ययं पञ्चमस्तृचः प्रगाथसञ्ज्ञः। इषोर्ब्यूढोः। प्राग्दृश्यप्रथनेन ऋतुत्रयसम्पादनं प्रगाथवदुच्यते। तत्प्रकारमाह॥

तत्र पूर्वा बृहती सतोबृहत्युत्तरा ताभ्यां तिस्रो बृहत्यः सम्पादिताः ॥

तत्र एना व इत्यत्र ऋचे पूर्वा एनावदति। उत्तरा सयोजतदृती यंसतोबृहती। यस्यास्तृतीयः पादो द्वादशाक्षरः सा बृहती "ऋतीयो द्वादशकदृत्यृक्षे:"। यस्याश्च प्रथमतृतीयौ पादौ द्वादशाक्षरौ। द्वितीयचतुर्थावष्टाक्षरौ। सतोबृहती। "अयुजौ त्रागतौ सतोबृहती-त्युक्ते." ताभ्यां बृहती सतोबृहती। ताभ्यां तिस्रो बृहत्यः बृहतीछन्दस्का ऋचः संहिता पाठएव संपादिताः कृताः। तत्रायं प्रकारः। एना वो अग्निं नमसोर्जो न पातमाहुवे। प्रियं चेतिष्ठमरतिंए स्वध्वरं विश्वस्य दूतममृतमितीयं बृहती, सयोजते अरुषा विश्वभोजसा सदुद्रवत्स्वाहुतः। सुब्रह्मा यज्ञः सुशमी वसूनां देवंऽराधो जनानामिति सतोबृहती, तत्र एनावदतीयमेका सतोबृहती। विश्वस्य दूतममृतमिति सतोबृहती, एषामन्त्यं अष्टाक्षरं पादं द्विः पठित्वा, सयोजते अरुषेति तृतीयो द्वादशाक्षरः सदुद्रवदित्यष्टाक्षरचतुर्थः पठितः। एवं द्वितीयाबृहती संपादिता। ततः पुनः सदुद्रवदितीममष्टाक्षरं पादं द्विः पठित्वा सुब्रह्मा यज्ञइतितृतीयो द्वादशाक्षरो देवं-

(१) त्वा विश्वश्रवस्तम वैकल्पिकीम्। इत्यधिकः काण्वपाठः॥

राधद्त्यथमष्टाचरश्चतुर्थः पठितः एवमृचोः परस्परं प्रथमान्प्रगाथद्त्युच्यते । अत्र द्वयस्य बृहतीनामुपधाने विनियोगः । अत्र प्रियं-चेतिष्टेत्यत्र व्यूहः । सदुद्रवदित्यत्र च । सुब्रह्मा अयमेकादशकः । देवं राधद्त्यथमष्टकः । तेन दृब्यूना ॥

षष्ठमौष्णिहोऽग्ने वाजस्य ॥

अग्निमेधानुवाके अग्नेवाजस्य सद्दधानः, अमोराजनित्यं षष्टकः-षमौष्णिहः । उष्णिक्छन्दस्कः । उष्णिहामुपधाने विनियुक्तः अग्नि-रीडेभ्यः सप्तकः । अत्र व्यूहः न्यूनता वा ॥

सप्तमः पुनः काकुभः प्रगाथो भद्रो नः ॥

अग्निमनुवाके भद्रो नो अग्निरित्ययं सप्तमस्तृचः पुनः काकुभः प्रगाथः ककुप्छन्दस्कः प्रगाथद्त्यर्थः ककुभामुपधाने विनियुक्ताः । नवमे प्रगाथमाह ॥

तत्र पूर्वा ककुप् सतोबृहत्युत्तरा ताभ्यां तिस्रः ककु-भः सम्पादिताः ॥

तत्र भद्रो न इत्यस्मिन्सप्तमे तृचे पूर्वा भद्रो न इत्येषा ककुप्छन्दस्का । उत्तरा भद्रं मनः कृणुष्वेत्येषा सतोबृहती य-स्यास्त्रिपदाया मध्यमः पादो द्वादशाक्षरः अन्त्यावष्टको सा ककुप् । "मध्यमयेत्ककुबित्युक्तेः" यस्याश्च प्रथमतृतीयौ द्वादशकौ अन्त्यावष्टकौ सा सतोबृहती । "अयुजौ जागतौ सतोबृहतीत्युक्तेः" । ताभ्यां ककुप्-सतोबृहतीभ्यां तिस्रः ककुभः ककुप्छन्दस्का ऋचः संपादिताः । तत्रायंप्रकारः । भद्रो नो अग्निराहुतो भद्रारातिः सुभगभद्रोऽध्व-रः । भद्राऽउत प्रशस्तयः । इत्येषा ककुप्, भद्रंमनः कृणुष्व वृषनूर्यं । येना समत्सु सासहः, अवस्थिरा तनुहि भूरि शर्धतां, वनेमातेऽअभि-ष्टिभिरिति, सतोबृहती, तत्र भद्रोनो अग्निराहुतइतीयमेका स्वत

एव ककुप् । अस्याएवांत्यं भद्रा उत प्रशस्तयइतीयमष्टाक्षरं पादं पुनः पठित्वा भद्रं मनइति द्वादशाक्षरो द्वितीयः पठितः । ततो येना समस्त्वित्ययं तृतीयोऽष्टाक्षरः पठितः एवं ककुप्द्वितीया संपादिता । अथ तृतीया । येनासमस्त्वितीममेवाष्टाक्षरं पादं पुनः पठित्वा अवस्थिरा तनुहीत्ययं द्वादशाक्षरो द्वितीयः पठितः । वनेमातइत्ययमष्टाक्षरस्तृतीयः पठितः । एवंतृतीया ककुप्संपादितः, एकः पूर्वं प्रगाथ उक्तः, अयं द्वितीयः प्रगाथइति, पुनः शब्दप्रयोगः अत्रभद्रम् मनः अयमेकादशकः । तेनैकोनता वा व्यूहेन पूरणम् वा, पदपाङ्क्तो नवमोऽग्नेतं । अस्मिन्नेवानुवाके अग्नेतमद्य, अधाह्यग्ने, एभिर्नो अर्कैरित्ययं नवमस्तृचः ॥

अष्टमः पाङ्क्तोऽग्निं तं पदपाङ्क्तो नवमोऽग्ने तम् ॥

पदपङ्क्तिः छन्दस्कः, यस्याः पञ्चाक्षरास्चत्वारः पादाः षडक्षरः सा पदपङ्क्तिः । अथवा यस्यास्त्रयः पञ्चाक्षराः । चतुर्थश्चतुरः । पञ्चमः षडक्षरः । सापि पदपङ्क्तिः, पञ्चकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्को वा पदपङ्क्तिरित्युभयथोक्तेः" । पदपङ्क्तीनामुपधाने अस्य तृचस्य विनियोगः । तत्राग्नेतमद्येत्यत्र चतुर्थश्चतुष्कोपेतिपदपङ्क्तिः, अधाह्यग्ने । व्यूह. स्वर्णज्योतिरित्ययमपि चतुष्कः, अत्रापि व्यूहो वा ॥

अग्निर्ठं॰ होतारमतिच्छन्दास्त्र्यवसाना ॥

त्र्यवसाना अवसानत्रययुक्ता । अतिछन्दास्त्र्यवसाना । ८ । अग्निर्ठं॰ होतारमितीयमृक् अतिच्छन्दा । छन्दांस्यतिक्रान्ता अतिच्छन्दाछन्दसउपधाने विनियुक्ता । इयं चतुःषष्ट्यक्षरा तेनाष्टिछन्दस्का । अत्यष्टिरितिषट्कृचाः । तत्र व्यूहाः "अष्टिरत्यष्टिर्वेतिसंहिताभाष्ये" अत्र च"अथैतासां ककुभां चत्वारि चत्वार्यक्षराण्यादायातिछन्दांस्युपदधतीतिश्रुत्या"भद्रारातिः, अत्र तृचे अवस्थिराग्निर्ठं॰होतारमित्येता-

नि हादशाचरादि प्रयोगकाले अधिकानि संविहितानि सन्ति तेन तत्रैयमतिधृतिछन्दस्का ॥

अग्ने त्वं द्वैपदस्तृचः ॥

अग्निवाग्नेये अनुवाके अग्ने त्वंनो अन्तमः, वसुरग्निः । तन्त्वा शोचिष्टेत्ययं द्वैपदः । द्विपदाछन्दस्काः द्विपदानामुपधाने विनियुक्ताः । (१८) अथाग्निर्नेवाग्निर्मूर्द्धेत्यनुवाके मन्त्राणामृषीनाह ॥

अयमग्निर्विरूपः ॥(१)

अयमग्निः सहस्रिणइत्यस्या विरूपऋषिः ॥

अबोधि बुधगविष्ठिरौ ॥

अबोध्यग्निरित्यस्या बुधगविष्ठिराहर्षी ॥

जनस्य सुतम्भरः ॥

जनस्य गोपा इत्यस्याः सुतंभरऋषिः ॥

सखायऽइषः ॥

सखायः सँवइत्यस्य इषऋषिः ॥

सऽठ्ँसमित्सँ्वनन ॥

सऽठ्ँ समिदित्यस्याः सँ्वननऋषिः ॥

त्वां प्रस्कण्वः ॥

त्वां चित्रश्रवस्तमेत्यस्याः प्रस्कण्वऋषिः ॥

एनावो वसिष्ठः ॥

एनावो अग्निमित्यस्या वसिष्ठऋषिः ॥

अग्ने वाजस्य गोतमः ॥

अग्ने वाजस्येत्यस्या गोतमः । अग्निर्ऋषिः ॥

भद्रो नः सौभरिः ॥

---

(१) अथैषामृषयः । इति काण्वसर्वानुक्रमेऽधिकः पाठो बोध्यः ॥

भद्रो नो अग्निरित्यस्याः सौभरिर्ऋषिः ॥

अग्निं तं कुमारवृषौ ॥

अग्निं तं कुमारवृषौ । अग्निं तं मन्थदित्यस्याः कुमारवृषाहषी । अनुज्ञानां साधारणः परमेष्ठीऋषिः ॥

येनाष्टावाग्नेय्यः षड्विष्टुभौ द्वे अनुष्टुभौ ॥

येनऋषयइत्याद्या अष्टौऋचोऽग्निदेवताः । तासां मध्ये आद्या षड्विष्टुपछन्दस्का । येन वहसि । अयं ते योनिरितीमे द्वे ऋचावनुष्टुपछन्दस्के । पुनश्चित्युपधाने विनियोगोऽष्टानामपि ॥

तपश्चर्तव्यम् ॥

तपस तपस्यसेत्येतद्वृतुदेवतं ऋतव्योपधाने विनियुक्तम् दृष्यधिकाक्षरकृतिः छन्दः ॥

परमेष्ठी सौरम् ॥

परमेष्ठीत्वेतीदं यजुः सूर्यदेवतं विश्वज्योतिषउपधाने विनियुक्तम् । व्यूहौ । गायत्रीछन्दः ॥

प्रोथदश्वो वसिष्ठस्त्रिष्टुभमाग्नेयीम् ॥

प्रोथदश्वइतीमामृचं त्रिष्टुपछन्दस्कामग्निदेवत्यां वसिष्ठऋषिरपश्यत् । विकर्ण्युपधानेऽस्या विनियोगः । आद्ययोर्व्यूहः ॥

आयोर्द्वे स्वयमातृण्णादेवते ॥

आयोष्टा । परमेष्ठीत्वेत्येते द्वे यजुषी स्वयमातृण्णादेवते । स्वयमातृण्णोपधाने विनियुक्ते । आयोरिति ब्राह्मी उष्णिक्, परमेष्ठीत्वा । आकृतिछन्दः ॥

सहस्रस्य प्रमाः पञ्चाग्नेयानि ॥

सहस्रस्य प्रमासीत्यादीनि पञ्च यजूंष्यग्निदेवतानि हिरण्यशकलैरग्ने. प्रोक्षणे विनियुक्तानि । प्रमासि । दैवीजगती । प्रतिमा-

सि । प्राजापत्यागायत्री । उष्णिक् । दैवीत्रिष्टुप् । साहस्रोसि । दैवीबृहती सहस्रायत्ता । दैवीपङ्क्तिः ॥ २० ॥

रौद्राध्यायः परमेष्ठिन आर्षं देवनां वा प्रजापतेर्वा ॥

नमस्ते रुद्र मन्यवइत्ययं रुद्रदेवत्योऽध्यायः परमेष्ठिनआर्षं । अस्याध्यायस्य प्रमेष्ठीऋषिरित्यर्थः ॥

देवानां वा आर्षम् ॥

अथवाऽस्याध्यायस्य देवाऋषयः प्रजापतेर्वार्षं । अथवाऽस्याध्यायस्य प्रजापतिऋषिरित्यर्थः ॥

आद्योऽनुवाकः षोडशर्च एकरुद्रदेवत्यः ॥

अस्मिन्नध्याये आद्यः षोडशर्चोऽनुवाकोरुद्रदेवत्यः । एको रुद्रो देवता यस्य एकरुद्रदेवतः ॥

प्रथमा गायत्री ॥

अस्मिन्नाद्येऽनुवाके प्रथमा नमस्ते रुद्रमन्यवऽइत्येषा गायत्रीछन्दस्का ॥

तिस्रोऽनुष्टुभः ॥

ततो या ते रुद्र । यामिषुं । शिवेन वचसा, इत्येतास्तिस्रोऽनुष्टुप्छन्दस्काः । यामिषुमित्यस्यास्तृतीयचतुर्थौ नवकौ । तेन दृब्धिका । यामिषुं । सप्तकः । हस्तेइत्यत्र व्यूहः । एकोना । शिवेन । व्यूहः ॥

तिस्रः पङ्क्तयः ॥

पञ्चम्याद्या अध्यवोचत् । असौ यस्ताम्रः । असौ यो व इत्येतास्तिस्रः पङ्क्तिश्छन्दस्काः । अत्र प्रथमो देव्यः । अहीँग्श्चेति सप्तकः सर्वाग्श्चेति व्यूहः । असौ यो वेति व्यूहः, अदृश्रन् सप्तकः ॥

सप्तानुष्टुभः ॥

ततोऽष्टम्यायाः सप्तऋचो [illegible], प्रमुञ्च । विध्य । याते । परिते धन्वनो । अवतत्य । नमस्ताऽऽयुधायेत्येताः अनुष्टुप्छन्दस्काः ॥

द्वे जगत्यौ ॥

ततः आद्येऽनुवाके पञ्चदश्यीषोडश्यौ मानो महान्तं । मानस्तोकइति द्वे ऋचौ जगत्यौ जगतीछन्दस्के । मा नः प्रियाइत्यत्र व्यूहः । मा नो वीरानित्येकादश्यकः ॥

मा नो द्वे कुत्सः ॥

मा नो हान्तं, मानस्तोकइतीमे द्वे ऋचौ कुत्सऋषिरपश्यत् ॥ २१ ॥

अन्त्यानुवाके सप्तैकरुद्रस्तुतिः ॥

अन्त्यानुवाके द्वापेऽन्यसदृत्यस्मिन्नित्तिमे अनुवाके सप्तऋचएकस्य रुद्रस्य स्तुतिः । आसां सप्तानामृचामेको रुद्रोदेवताइत्यर्थः ॥

आद्योपरिष्टाद्बृहती ॥

तासां सप्तानामाद्या प्रथमा द्वापेऽन्यसदृत्येषा उपरिष्टाद्बृहतीछन्दस्का अनाद्यः सप्तकः द्वितीयोऽष्टकः । तृतीयो दशकः । चतुर्थी द्वादशकइतिनैकान्तोऽधिका ॥

द्वितीया जगती कुत्सस्य ॥

द्वितीया इमा रुद्रायेतीयं जगतीछन्दस्का कुत्सस्य आर्षः कुत्सोऽस्या ऋषिरित्यर्थः ॥

तृतीयाऽनुष्टुप् ॥

तृतीया याते रुद्रेत्येषाऽनुष्टुप्छन्दस्का ॥

द्वे त्रिष्टुभौ ॥

परिनो रुद्रस्य मीढुष्टमेत्येते द्वे ऋचौ त्रिष्टुभौ । मीढुष्टमेत्यस्यां तृतीयएकादश्यः । प्रथमद्वितीयचतुर्थपञ्चमा अष्टाक्षराः । एवमेकोना

अक्षरसङ्ख्या भिद्यते ॥

देवानुष्टुभौ ॥

त्रिभिरिद्रं सहस्राणीत्येते द्वे ऋचौ अनुष्टुप्छन्दस्के । वाग्नीस्त्रैति सप्तकः अथ विकारविकर्षौ वा जनता वा ॥

असङ्ख्याता बहुरुद्रदेवत्या दशानुष्टुभोमन्त्रा अवतानसञ्ज्ञकाः ॥

असङ्ख्यातासहस्राणीत्यादयः यएतावन्तश्चत्वारिंशन्मन्त्रा बहुरुद्रदेवत्या अनुष्टुप्छन्दस्का अवतानसञ्ज्ञकाः । बहवो रुद्रा देवता यासां ता बहुरुद्रदेवत्याः सञ्ज्ञाकरणमवतानां जुहोतीत्यादौ संव्यवहारार्थं । अथ । ये रुद्राः । अस्मिन् । अनयोर्यकारव्यूहेन पूरणं । ये भूतानामिति नवकः । येऽग्नेषु । यकारव्यूहः । अएतावन्तश्चेति दशकः । तेन दृष्यधिका ॥

ततोऽन्त्यानि चीणि यजूंष्यपि बहुरुद्रदेवत्यानि प्रत्यवरोहसञ्ज्ञका मन्त्राः ॥ २२ ॥

ततश्चत्वारिंशत्सङ्ख्यातेत्यादिदशकानन्तरं अन्त्यानि अध्यायान्ते पठ्यमानानि नमोऽस्तुरुद्रेभ्यो ये दिवीत्यादीनि चीणि यजूंषि बहुरुद्रदेवत्यानि । एते मन्त्राः प्रत्यवरोहसञ्ज्ञका भवन्ति । सञ्ज्ञाकरणमेषामवरोहाञ्जुहोतीत्यादौ संव्यवहारार्थं । त्र्यक्षरत्वेऽपि यजुषां धृतिश्छन्दः । आद्यस्य नमोऽस्त्वित्येकाक्षरीभाव नमोऽस्त्वित्येवं पृथक्करणं पूरणम् ॥ २२ ॥

मध्ये सर्वाणि यजूंष्यपि हिरण्यबाहवइति तिस्रोऽग्नीतयो रुद्राण्याम् ॥

मध्येरुद्राध्यायं ऽष्टमानुवाकान्ते । अनयोर्मध्ये नमो हिरण्यबाहवइत्यादीनि नमऽआनिर्हतेभ्यइत्यन्त्यानि सर्वाणि यजूंषि । एषां

यजुषां रुद्राणां तिस्रोऽग्नितयो देवताः ॥

तेषामुभयतो नमस्कारा मध्ये ॥

तेषां रुद्राणां मध्ये मध्ये केचिद्रुद्रा उभयतो नमस्काराः । नमो दिग्व्यवाहवे रेनाम्ने दिशां च पतये नमइत्यादि, नमः स्रुभ्यः स्रुवतिभ्यश्च वो नमइत्यन्ताः ॥

अत्यतरतो नमस्कारा अपरे ॥

अपरे केवल रुद्राअत्यतरतो नमस्काराः अत्यतरतः आदावेव नमस्कारो येषां तेऽत्यतरतो नमस्काराः । नमो भवाय चेत्यादयो नमःखाखिदते च प्रखिदते चेत्यन्ताः । नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वोनमइत्येतेषूभयतो नमस्काराः ॥

जातानामरुद्राः सभाभ्यइत्यादयः ॥

नमः सभाभ्य इत्यादयो जातानामरुद्राः जातसञ्ज्ञका रुद्राइत्यर्थः । सञ्ज्ञाकरण "मधजातेभ्यो जुहोतीत्यत्र" संव्यवहारार्थः । तदेवमत्र तिस्रोऽग्नितयो रुद्राः पूर्णाः, अथ नमो वः किरिकेभ्यइत्यादीनां चतुर्णां यजुषां । हृदयभूता अग्निवायुसूर्याः किरिकादिशब्दवाच्या देवता आहु ॥

नमो वः किरिकेभ्यइत्यग्निवायुसूर्यहृदयभूताः पञ्चव्याहृतयो बज्रुरुद्रदेवत्याः ॥ २३ ॥

किरिकेभ्यो विचिन्वत्केभ्यइत्येवमादिव्यइत्यविशिष्टानामेवदेवतात्वेन श्रवणात् । अग्निवायुसूर्यहृदयभूता इति आसां चतसृणां व्याहृतीनां अग्निवायुसूर्याएव देवता हृदयभूता रुद्राणां प्रधानभूता देवताः किरिकादिशब्दैर्यौगिकैरग्न्यादय एवाभिधीयन्तइत्यर्थः । अथवा व्याहृतिविशेषवत्त्वेन व्याख्येयं । कीदृश्यो व्याहृतयो अग्निवायुसूर्याः हृदयभूताः प्रधानभूताः किरिकविचिन्वत्कादिभिर्यौगिकै

अग्नेर्देवतात्वेन प्रतिपाद्या वाचां व्याहृतीनां तावग्निवायुसूर्यरूपभूताः । अत एव किरिका विकिरिका विविचला आनिर्हंतारश्च वायुसूर्या एव । ते च रुद्राणां देवानां हृदयभूताः, कुतः नमो वः किरिकेभ्यइतिमन्त्रस्य देवानाठं० हृदयेभ्य इत्यग्निवायुरादित्या"एतानि हृतानि देवानाएंहृदयानीतिश्रुतेः" । हृदयानीव हृदयानि । यथा हृदयं सर्वेषामङ्गानां प्रधानभूतं । एवमेते रुद्राणां प्रधानभूतास्तत्वार्थः । अत्र नमो वः किरिकेभ्यइत्यादीनिचत्वार्येव यजूंषि चतुर्थीमेवादौ नमः शब्दपाठात् । देवानां हृदयेभ्यइत्येतत्तु किरिकेभ्यइत्यादीनां चतुर्थी विशेषणमेव । न पृथग्भूता इतरेषामिवादौ नमः शब्दभावात् । नमोभवाय चेत्यादीनामिव चकारोपबन्धाभावाच्च । एवमेव हरिकेशनिभाधकाचार्यैरं हृताभाष्यकारैरपि खलपत्रेषूक्तवत्तः । अतोऽग्न्यादय एवेदं सर्वं जगत्कुर्वंतीति किरिकाइत्युच्यन्ते । "एते ह्येदठं० सर्वं कुर्वंतीतिश्रुतेः" एतेषां प्राजापत्यबुद्धिप्रभवेभ्य उत्पत्तेः प्राजापत्यवशवत्वात् । तथा विविञ्चन्ति धर्मकारिजनधर्मकारिणं च पृथक्कुर्वंतीतिविविञ्चलाइत्यपि । तथा विविधं विञ्चन्ति हिंसन्तीति विविञ्चलाः । तएव । तथा आनिर्हंतेभ्यः हंतिर्गत्यर्थः । एते ह्यग्निवायुसूर्याः समीहाभिमुख्येन एतेभ्यो लोकेभ्यो निर्हंताः निर्गताः । "तेभ्यस्तेभ्यस्त्रीणि ज्योतीएंषजायन्ताग्निर्वायुं वने सूर्यइतिश्रुतेः" । नमो विविञ्चलेभ्यइत्येते ह्येदठं० सर्वं विविञ्चन्तीत्यादौ सर्वमेतच्छ्रूयते । अग्न्यादिदेवतालसाम्याच्चैतेषां व्याहृतीत्वमुक्तम् । अत्र केचित्पञ्चव्याहृतयइतिपठन्ति । तदयुक्तं । पञ्चमस्य यजुषोऽभावात् । अत्र समस्तस्य रौद्राध्यायस्य प्रतिरुद्रियस्तोमे विनियोगः ॥ १६ ॥ अथ नमोहिरण्यबाहवइत्यादीनां प्रत्येकं छन्दांस्यभिधीयन्ते ॥ १७ ॥ नमो हिरण्य०यजुस्त्रिष्टुप् । दिग्भ्यश्च । यजुरनुष्टुप् । वृक्षेभ्यः । यजुः पङ्क्तिः । अधिपतये । हरिकेशायच यजुस्त्रिष्टुभौ । पशूनां । पुष्टानां । यजुरनुष्टुभश्चित्रः । १७ । य

भ्रातृव्याय यजुर्बृहती । अभ्यः । दैवीजगती । वज्राय । यजुर्बृहती । सूनाय यजुर्जगती । अह्ने पञ्च यजुरनुष्टुभः । १८ । रोहिताय । यजुः पङ्क्तिः, हायनीनां यजुरनुष्टुप् । भुवनाय । यजुर्जगती । ओषधीनां यजुर्बृहती । अस्थिने । यजुर्बृहती । अश्वानां अनुष्टुप् । उर्वरे । यजुस्त्रिष्टुप् । पत्नीनां । तिस्रो गायत्री । १९ । क्षत्राय तया । यजुः पङ्क्तिः, अवतानां । अनुष्टुप् । सहमानाय । त्रिष्टुप् । आख्याधिनीनां । पङ्क्तिः, निषङ्गिणे । पङ्क्तिः । स्तेनानां । अनुष्टुप् । निषेदुषे । त्रिष्टुप् । अरण्यानां । बृहती ॥ २० ॥ यच्छते पङ्क्तिः, स्रोतॄणां अनुष्टुप् । निमज्जते । त्रिष्टुप्, तक्षरथानां । बृहती । सृकाविभ्यः । पङ्क्तिः । तृष्णतां अनुष्टुप् । सिमद्भ्य पङ्क्तिः, विकृन्तानां । बृहती ॥ २१ ॥ उच्चीविषे । त्रिष्टुप् । कुलुङ्गानां । बृहती । इषुमद्भ्यः । गायत्री । धन्वा । अनुष्टुप् । आतन्वा० उष्णिक् । प्रतिदधा० पङ्क्तिः । आयच्छद्भ्यः । गायत्री । अयच्छद्भ्योऽनुष्टुप् । २२ । विसृजद्भ्य. गायत्री । विद्ध्यद्भ्य । उष्णिक् । खादद्भ्य. । दैवीपङ्क्तिः, आसद्भ्यः उष्णिक् । प्रयानेभ्यः । गायत्री । आसीनेभ्य. अनुष्टुप् । तिष्ठद्भ्यः दैवीपङ्क्तिः । धावद्भ्यः उष्णिक् । २३ । सभाभ्यः । दैवीपङ्क्तिः, सभापतिभ्यः । बृहती । अश्वेभ्यः दैवीबृहती । अश्वपति० । बृहती, आख्याधिनीभ्यः । उष्णिक् । विविध्यन्ति । उष्णिक् । उग्रा । गायत्री । छठं०हती०अनुष्टुप् ॥ २४ अश्वेभ्यः । दैवीपङ्क्तिः, गणपति०बृहती, व्रातेभ्यः । दैवीपङ्क्तिः । व्रातपति० । बृहती । गृत्सेभ्य. दैवीपङ्क्तिः, गृत्सपति । बृहती, विरूपेभ्यः गायत्री । विश्व० बृहती । २५ । सेनाभ्य. दैवीपङ्क्तिः, सेनानिभ्यः । अनुष्टुप् । दृष्टिभ्यः । दैवीपङ्क्तिः, अरुणेभ्यः । अनुष्टुप् । जग्धभ्यः । दैवीपङ्क्तिः, सङ्ग्रही० । बृहती, । मरुद्भ्यः दैवीपङ्क्तिः, अभिकेभ्य । २६ । अनुष्टुप् । तक्षभ्य. । दैवीपङ्क्तिः । रथकारेभ्यः बृहती, कुलालेभ्यः । गायत्री । कर्मारेभ्यः अनुष्टुप् निषादे भ्यः । गायत्री । पुञ्जिष्टेभ्यः । अनु-

ष्टुप् । ऋषिभ्यः दैवीपङ्क्तिः । मृगयु० । अनुष्टुप् ॥ २७ ॥ ऋषभ्यः । दैवीबृहती । ऋषभ० अनुष्टुप् । भवाय । गायत्री । रुद्राय च दैवी बृहती । सर्वाय गायत्री । पशुप० । गायत्री । नीलग्रीवाय । अनुष्टुप् । शितिकण्ठा० । गायत्री । २८ । कपर्दि० । उष्णिक् । व्यक्ष० गायत्री । सहस्रा० । अनुष्टुप् । शत० । गायत्री । गिरिशयायअनुष्टुप् । शिपि० गायत्री, मीढु० । अनुष्टुप् । इषुमते च । दैवीपङ्क्तिः ॥ २९ ॥ क्षत्राय । गायत्री । वामना । दैवीपङ्क्तिः । बृहते । व्यर्षी यसे । दैवी पङ्क्तिः, हरिकेशाय गायत्री । सहसे च । दैवी बृहती । अग्रण्याय पङ्क्तिः, प्रथमाय । पङ्क्तिः । ३० । आशवे । गायत्री । अजिराय, पङ्क्तिः, शीघ्रण्याय । गायत्री । शीभ्याय । बृहती । ऊर्म्याय । गायत्री, अवस्वन्याय । गायत्री । नादेयाय । उष्णिक् । द्वीप्याय । बृहती ॥ ३१ ॥ ज्येष्ठाय । गायत्री । कनि० । पङ्क्तिः, पूर्वजाय । उष्णिक् । अपर० गायत्री । मध्यमाय । उष्णिक् । अपगल्भाय । गायत्री । जघन्या । उष्णिक् । बुध्न्याय । दैवीबृहती ॥ ३२ ॥ सोभ्याय । गायत्री । प्रतिगायत्री । याम्याय । गायत्री, क्षेम्याय पङ्क्तिः । श्लोक्याय । गायत्री । अवसान्याय । गायत्री । उर्वर्य्याय । उष्णिक् । खल्याय । बृहती । ३३ वन्याय । गायत्री । कक्ष्याय च । बृहती । श्रवाय । गायत्री । प्रतिश्रवाय । गायत्री । आशुषेणाय । अनुष्टुप् । आशुरथाय । गायत्री । शूराय । गायत्री । अवभेदिने गायत्री । ३४ । विल्मिने । गायत्री । कवचिने । पङ्क्तिः । बर्हिमते गायत्री । वरूथिने पङ्क्तिः, श्रुताय । गायत्री, श्रुतसेनाय । गायत्री । दुन्दुभ्या० । उष्णिक् । आहन० । गायत्री ॥ ३५ ॥ धृष्णवे । गायत्री । प्रमृ० । पङ्क्तिः । निषङ्गि० । उष्णिक् । इषुधि । गायत्री । तीक्ष्णो० । उष्णिक् । आयु०पङ्क्तिः, स्वायु० । उष्णिक्, सुध०पङ्क्तिः । ३६ । स्रुत्याय । गायत्री । पथ्याय बृहती । काट्या० । गायत्री । नीप्या० । बृहती कुल्या० । गायत्री । सर० । गायत्री । नादेया उष्णिक् । वैशं । पङ्क्-

क्तिः । ३७ । कूप्याय । गायत्री ॥ अवट्याय । पङ्क्तिः । वीदुध्नाय । गायत्री । आतप्या० पङ्क्तिः मेग्ध्या० । गायत्री । विद्युत्याय । पङ्क्तिः । वर्ष्याय । गायत्री । अवर्ष्या० । पङ्क्तिः । ३८ । वात्याय । गायत्री । रेवत्या० । पङ्क्तिः । वास्तव्या० । उष्णिक् । वास्तु० । पङ्क्तिः । सोमाय गायत्री, रुद्राय । बृहती । ताम्राय । गायत्री । अरु० पङ्क्तिः, । ३९ । अरुणाय । गायत्री । पशु० गायत्री । उग्रा० । गायत्री । भीमा० । बृहती । अग्रेवधा० उष्णिक् । दूरे० । गायत्री । हन्त्रे पङ्क्तिः । हनीयसे । पङ्क्तिः । वृक्षेभ्यः हरिकेशेभ्यः । यजुः पङ्क्तीः । ताराय । दैवीपङ्क्तिः ॥ ४० ॥ शम्भवाय । उष्णिक् । मयो० । गायत्री, शङ्क० । उष्णिक् । मयस्कराय । गायत्री । शिवाय । शिवतरा० । गायत्री ॥ ४१ ॥ पार्य्याय । गायत्री । अवार्य्याय पङ्क्तिः । प्रतरणाय । अनुष्टुप् । उत्तरणा । गायत्री । तीर्थ्याय । गायत्री । कूल्या । बृहती । शष्प्याय गायत्री । फेन्याय । बृहती ॥ ४२ ॥ सिकत्याय । उष्णिक् । प्रवा० । पङ्क्तिः । किंठं० शि० । उष्णिक् । क्षय० पङ्क्तिः, क्षप० उष्णिक् । पुल० पङ्क्तिः । धूलि० । उष्णिक् । प्रप० । पङ्क्तिः ॥ ४३ ॥ अश्म्याय । गायत्री । गोष्ट्या० । बृहती । तरुण्या० । गायत्री । गेह्या० । बृहती । हृद० । उष्णिक् । निवे० । पङ्क्तिः । काट्या । गायत्री । गह्व । गायत्री ॥ ४४ ॥ गुहक्या० । गायत्री । हरि० । पङ्क्तिः । पाल्म० । उष्णिक् । रज० पङ्क्तिः । लोप्या । गायत्री । उल० । पङ्क्तिः, ऊर्व्या । गायत्री । सूर्व्या० बृहती ॥ ४५ ॥ पर्णाय । गायत्री । पर्ण० गायत्री । उद्गुर० । अनि० । पङ्क्तिः, आखिद० उष्णिक् । पर्ण० । पङ्क्तिः । इषु० गायत्री । धनु० अनुष्टुप् । किरिकेभ्यः । ४६ । देवानार्ठ० हृदयेभ्यः सामोष्णिक् । विचि० । उष्णिक् । विच्छि० । नमऽआनिर्हतेभ्यो यजुरुष्णिक् । अनेदं रूपम् । षडक्षरा यजुर्गायत्री । सप्ताक्षरा । यजुरुष्णिक्, अष्टाक्षरा यजुरनुष्टुप् । नवाक्षरा यजुर्बृहती । दशाक्षरा यजुः पङ्क्तिः, एकादशाक्षरा यजुस्त्रिष्टुप् । द्वादशाक्षरायजुर्जगती, पञ्चाक्षरा दैवीप

ङ्गिः, चतुरक्षरादेवी बृहतीछेतान्येवाप छन्दांसि यन्ति ॥ २३ ॥

अश्वाग्न्याहृतम् ॥

अश्वाग्नूर्जमित्येतद्यजुर्माहृतं । मरुद्देवतं । विश्वपरिषेके विनियुक्तम् । आर्षीत्रिष्टुप् ॥

अश्मन्वतेऽश्मा ॥

अश्मन्वते पृदित्यस्याश्मा देवता आद्यौ कुम्भकरणे विनियोगः । दैवी बृहती ॥

मय्याग्नीः ॥

मयि तऽऊर्गित्यस्याग्नीदेवता पुनः कुम्भादाने विनियोगः । दैवीबृहती ॥

यद्विष्णऽअभिचारिकम् ॥

यद्विष्णवस्त्वदृत्येतदाभिचारिकं अभिचारप्रयोजनं । अस्य शुक्। देवता । यजुर्बृहती । अद्भिसहितस्य कुम्भस्य निरसने विनियोगः ॥

इमा मऽआग्नेयम् ॥

इमा मे अग्नइत्येतद्यजुरग्निदेवतं । इयं व्यूहेन ब्राह्मणत्वचरादिच्छतिः । ब्राह्मणऽउपरि प्रायश्चित्ते जपे विनियोगः ॥

ऋतवोबृहती षड्ऋचा ॥

ऋतवस्त्वदृत्यस्या बृहतीछन्दः षड्ऋचा । अष्टाचिंशदक्षरत्वाद्विकल्पः । दृश्यधिका बृहती द्यूनापड्ऋचेति । एषाऽप्याग्नेयी । आग्नेयपदानुवृत्तेः । इष्टकादेवतेतिकल्पभाष्ये प्रायश्चित्तजपएव विनियुक्ता ॥

समुद्रस्य त्वा गायत्र्यौ ॥

आग्नेयपदमनुवर्तते । तच्च यथार्थं विपरिणम्यते । समुद्रस्य त्वा, क्षित्यै त्वेतीमे ऋचौ अग्निदेवते गायत्र्यौ । अग्नेरवकर्षणे विनियुक्ते । अनयोरन्त्यौ पादोदयको । तेन दृश्यधिके ॥

उपप्रयन्नध्वरं जगती त्रिष्टुब्भा ॥

आग्नेयपदमनुवर्तते । उपप्रयन्नध्वरं मनुपवेतसदृतीयकमग्निदेवता जगतीछन्दस्का त्रिष्टुप्छन्दस्का वा । इयं चतुष्चत्वारिंशदक्षरा । तेन त्रिष्टुब्भवत्येव, नदीषु वासादमसिति व्यूहद्वयेन दृष्ट्वा जगती भवति । अग्नेरवकर्षणे विनियोगः ॥

अपामिदम् बृहती ॥

अपामिदमित्यस्या बृहतीछन्दः । अग्निर्देवता आग्नेयपदानुवृत्तेः अग्नेर्विकर्षणे विनियोगः ॥

अग्ने पावक वसूयवः ॥

अग्ने पावकदृतीमां वसूयवऋषयोऽपश्यन् ॥

स नो मेधातिथिः ॥

सनः पावकदीदिवदृतीमां मेधातिथिऋषिरपश्यत् ॥

एते आग्नेय्यौ गायत्र्यौ ॥

अग्ने पावक, सनः पावकदृत्येते, अग्निदेवत्ये गायत्रीछन्दस्के । अग्नदृत्यस्या दक्षिणपक्षविकर्षणे विनियोगः, स नः पावकेत्यस्याः पुच्छविकर्षणे विनियोगः ॥

पावकया जगती भरद्वाजः ॥

आग्नेयपदमनुवर्तते । पावकया दृतीमारभ्यमग्निदेवतां जगतीं भरद्वाजऋषिरपश्यत् । उत्तरपक्षे विकर्षणेऽस्या विनियोगः । आ यो व्यूढः ॥

नमस्ते बृहतीमाग्नेयोऽत्रिसुता स्तोपामुद्रा ॥

नमस्ते हरसदृतीमारभ्यं बृहतीमग्निदेवताऽत्रिसुता ऋषेः पुत्री स्तोपामुद्रे तिनाम्नी अपश्यत् दृष्टवती । अग्नेरासेचनेऽस्या विनियोगः । अग्नाधौ नवकः । द्वितीयः सप्तकः । तृतीयएकादशकः । चतु-

र्यो दशकद्वयं । तेनेयं सप्तविंशदक्षरत्वादेकाधिका बृहती ॥ २४ ॥

नृषदे पञ्चाग्नेयानि ॥

नृषदे वेडित्यादीनि पञ्चयजूंष्यग्नेयानि । अग्निदेवतानि । स्वयमाहवनीयां पञ्चगृहीतहोमे विनियुक्तानि । नृषदे । दैवीबृहती । अप्सुषदे । बर्हिषदे । वनसदे । दैव्यः पङ्क्तयः । स्वर्विदे दैवीबृहती ॥

ये देवा जगत्यौ प्राणदेवत्ये ॥

ये देवा देवानां, ये देवा देवेष्वितीमे जगत्यौ प्राणदेवत्ये । दधिमधुघृतैरग्नेः प्रोक्षणे विनियुक्ते । व्यूहेनाद्यायाः पूर्त्तिः ॥

प्राणदा बृहतीपङ्क्तिर्वाग्नेयी ॥

प्राणदा अपानदा इतीयं बृहती वा पङ्क्तिर्वाग्निदेवत्या । अष्टाविंशदक्षरत्वाद्विकल्पः । अग्नेः सकाशादवरोहणे विनियोगः ॥

अग्निस्तिग्मेनाग्नेयीं गायत्रीं भरद्वाजः ॥

अग्निस्तिग्मेन प्रोक्षणेतीमामृचमग्निदेवत्यां गायत्रीछन्दस्कां भरद्वाजसञ्ज्ञकऋषिरपश्यत् । पञ्चगृहीतहोमेऽस्या विनियोगः । द्वितीये यकारस्य व्यूहः ॥

यऽइमा वैश्वकर्मणीस्त्रैष्टुभो विश्वकर्माभौवनः ॥

यऽइमा विश्वा इत्याद्या विश्वकर्मा ह्याजनिष्टेत्यंता वैश्वकर्मणी विश्वकर्मदेवताः त्रिष्टुप्छन्दस्का विश्वकर्माभौवनऋषिरपश्यत् । प्रोक्षणगृहीतार्घ्ये होमे विनियुक्ताः ऋषिर्हौता । व्यूहः, किंस्विदासीदष्टकः, किंस्विदुहादशकः, अग्नौ द्वादशकौ । यातेद्वादशकः । स्वयं । व्यूहः, वाचस्पतिं । द्वादशकः । अयमुग्र, व्यूहः । यज्ञासम । द्वादशकः, तर्ठ्ंसं । व्यूहः । ऋषयः द्वादशकः, नीहारेण । व्यूहः । विश्वकर्मा हि व्यूहः । अपां गर्भं व्यूहः ॥ २५ ॥

आशुरैन्द्रीर्हादय त्रिष्टुभोऽप्रतिरथः ॥

आशु शिशानदित्याद्या चमीषां चित्तमित्यन्ता हादय ऋषिस्त्रिष्टुभ इन्द्रदेवत्या इन्द्रस्य पुनोऽप्रतिरथसञ्ज्ञकऋषिरपश्यत् । स चयनेऽग्निचयने ब्राह्मणो जपे हादयानां विनियोगः । सङ्ख्यानेन हौ हादयकौ । तथापीयं त्रिष्टुप् । हौ तु जागतौ यस्याः सा जागती "जगती चैष्टुभे त्रिष्टुविति वचनात्" । सऽइषुहस्तैः हादयकः, प्रभञ्जन् । हादयकः, अस्माकं दयकः । जयन्तं हादयकः, अभिगोचापि हादयकः, । इन्द्रःसासां दयकः । जयंतीनां । व्यूहः । अस्माकमिन्द्रो हादयकः । ग्रहाणाङ्गानि हौव्यूहौ ॥

अवसृष्टानुष्टुविषदेवत्या ॥

अवसृष्टा परेत्येषा अनुष्टुप् इषुदेवत्या । मर्माणि ते इत्येतत्पर्यंतानामप्रतिरथेतिसंहिताभाष्ये, अत्रौ विनियोगाभावात्तन्नजापतिः । सांध्या वा न भवन्ति । सर्वसाधारणे विश्वामित्रऋषिरित्यपरे ॥

प्रेत योद्दृष्टन्त्स्तौत्यनुष्टुप् ॥

प्रेताजयतेतीयमनुष्टुप् । योद्दारोऽस्या देवतादित्यर्थः, प्रहरतीत्येवमत्र व्यूहः ॥

असौ या सेनेति ॥

असौ या इत्यस्या अग्नास्यत्रियोदेवता त्रिष्टुप् ॥

यच्च लिङ्गोक्तदेवता पङ्क्तिः ॥

यच्च वाणा इतीयं लिङ्गोक्तदेवता पङ्क्तिश्छन्दस्का पञ्चपदा चत्वारिंशदक्षरा पङ्क्तिरित्युच्यते । इन्द्रो बृहस्पतिरदितिश्चेत्र देवता लिङ्गोक्ताः ॥

मर्माणि लिङ्गोक्तैवत्रिष्टुप् ॥

मर्ष्णोपि तऽइतीयं लिङ्गोक्तदेवताग्निर्विष्टुप् । मन्त्रान्ते अग्नि-याय अन्यत्सर्वमेतेऽस्या विनियोगः पूर्वासां चतसृणां ज्ञाऽपि विनियोगः कल्पकृतोक्तो नास्ति । अयन्तं त्वाग्निरिति व्यूहः, ज्ञाऽपि सोमो वरुणो देवाश्च लिङ्गोक्ता देवताः । अथवा अग्निरेव देवता । तस्य सम्बोध्यत्वेनाऽत्र प्राधान्यात् । न सोमाद्यः ॥

उदेनं तिस्रोऽनुष्टुभः ॥

उदेनमुत्तरानित्याद्यास्तिस्रोऽनुष्टुप्छन्दस्का ज्ञेयाः ॥

आद्याग्नेयी ॥

तिसृणामाद्या उदेनमित्येषाग्निदेवत्या द्वितीये व्यूहः ॥

द्वितीयैन्द्री ॥

पूर्वोक्तानां तिसृणां मध्ये द्वितीया इद्रेममित्येषा इन्द्रदेवत्या ॥

तृतीया लिङ्गोक्तदेवता ॥

पूर्वोक्तानां तिसृणां मध्ये तृतीया, यत्र कूर्मइत्येषा लिङ्गोक्तदेवता, तमग्ने व्यूहः । घृतोक्षिताद्यैर्दुग्धरसमिदाधाने विनियोगः । आसां । अवोदुत्येत्यस्य ऋष्यादिपूर्वमुक्तं । अत्र प्रदीप्तस्येध्मस्योद्यमने विनियोग इतिविशेषः ॥

पञ्चदिशं पञ्चयज्ञाग्निसाधनवादिन्यः ॥

पञ्च दिशो दैवीरित्याद्याः पञ्चऋचो यज्ञाग्निसाधनवादिन्यः यज्ञं अग्निसाधनं यागसाधनञ्चेति वदन्तीति यज्ञाग्निसाधनवादिन्यः । अथासां छन्दांसि क्रमेणाह ॥

आद्ये द्वे त्रिष्टुभौ ॥

आसां पञ्चानां मध्ये प्रथमद्वितीये पञ्चदिशः समिद्धेऽग्नावित्येते द्वे त्रिष्टुभौ । पञ्चदिशः दिशोदेवताः । आद्यस्योद्यजः । द्वितीयएकादशकः । तृतीयो द्वादशकः । चतुर्थो दशकः । ध्रुवाधिकाऽ-

भयम इतिनवर्चः, व्यूहेनछन्दः पूर्क्तिः, अध्यग्निर्देवता ॥

तृतीया पङ्क्तिर्बृहती वा ॥

पञ्चानां मध्ये तृतीया देव्याय धर्त्रइत्येषा पङ्क्तिर्ना । बृहतीवा । अष्टाचिंशदक्षरत्वादिकल्पः । अध्यग्निर्देवता । अक्षरसंख्ययैव पङ्क्तिर्बृहती वा पादाक्षरनियमस्तु नास्ति ॥

चतुर्थी बृहत्येव ॥

पूर्वोक्तानां पञ्चानां मध्ये चतुर्थी कीलर्ठ० हविरित्येषा बृहत्येव । बृहतीछन्दस्केन, यकारव्यूहेनाक्षरैर्बृहती । अत्रापि पादाक्षरनियमो नास्ति । हविर्यज्ञश्च देवता ॥

अन्त्या त्रिष्टुप् ॥

पञ्चदिशदित्यादिपंचानामन्त्या सूर्यरश्मिरितीयं त्रिष्टुप् । अग्निश्च देवता । पञ्चानामपि त्रित्वंपति ममने विनियोगः ॥

विमानो द्वे आदित्यदेवते ॥

त्रिष्टुप्पदमनुवर्त्तते । विमानऽएष,ऽउषा समुद्रऽइतीमे द्वे ऋचौत्रिष्टुभौ । आदित्यदेवते । पृश्नस्योपधाने विनियुक्ते । विचक्रमे व्यूहः ॥

आद्या विश्वावसोः ॥

विश्वावसुरस्या ऋषिरित्यर्थः ॥

द्वितीयाऽप्रतिरथस्य ॥

पूर्वोक्तयोर्मध्ये द्वितीया उषा समुद्रइत्येषा अप्रतिरथस्यार्षं । अप्रतिरथोऽस्या ऋषिरित्यर्थः, इन्द्रं विश्वाऽइत्यस्यार्ष्यादि प्रागुक्तं । अतिक्रमणेऽस्य विनियोगइति विशेषः ॥

देवबर्हूर्विधृतिरनुष्टुब्यज्ञोदेवता ॥

देवबर्हूरित्यस्या विधृतिऋषिरनुष्टुप्छन्दो यज्ञोदेवता त्रिंशदक्षरत्वादियं दृश्यूनानुष्टुप् । उच्चिश्वेति संहिताभाष्ये । अत्रापि पादा-

अरे नियमो नास्ति ॥

वाजस्यैन्द्र्यनुष्टुप् ॥

वाजस्य मा प्रसवइतीयमैन्द्री इन्द्रदेवत्या अनुष्टुप्छन्दस्का ॥

उद्ग्राभमैन्द्राग्न्यनुष्टुबेव ॥

उद्ग्राभं च निग्राभं चेतीयसूक्तेऽयमग्नी । इन्द्राग्नी अस्या देवता अनुष्टुप्छन्दः, देवसूरित्यादीनामस्मिं प्रतिगमने विनियोगः । तृतीयो नवकः । चतुर्थः सप्तकः तेन पूर्तिरेव ॥ २६ ॥

क्रमध्वं पञ्चाग्नेय्योऽग्र्याऽनुष्टुप्तत्रिष्टुप्। ततोबृहती पिपीलिकमध्या ॥

क्रमदृध्वमग्निनेत्याद्याः पञ्चमयोऽग्निदेवताः तासां पञ्चानां मध्ये आद्या क्रमध्वमित्यनुष्टुप् । अन्त्ययोर्बृहः, ततोऽनन्तरं द्वितीया प्राजापत्यनुष्टुप्, अत्र तृतीयो दशकः, चतुर्थौ द्वादशकः । तेन पूर्तिः । ततोऽनन्तरं तृतीया पृथिव्याऽग्रं पिपीलिकमध्याबृहती । यस्याः प्रथमतृतीयौ त्रयोदशकौ । मध्यमो द्वितीयोऽष्टकः सा पिपीलिकमध्याबृहतीत्युच्यते । "त्रयोदशिनोमध्येऽष्टकः पिपीलिकमध्येत्युक्तेः" । अथाद्यस्त्रयोदशकः द्वितीयोनवकः, तृतीयश्चतुर्दशकइति षट्त्रिंशदक्षरत्वात्बृहती त्रिपादष्टिसध्यापिपीलिकमध्येतिवचनात्पिपीलिकमध्या च ॥

ततोऽनुष्टुप्त्रिष्टुबन्त्या ॥

ततोऽनन्तरं चतुर्थी त्र्यर्चोन्त्याऽनुष्टुप् । आद्ये बृहः । तस्या अन्त्याऽग्नेप्रेहीति पञ्चमी त्रिष्टुप् । द्वितीये बृहः, चतुर्थे सुअर्चीतिति बृहेऽपि दशकः । क्रमध्वमित्यादिपञ्चानामग्न्याराधने विनियोगः ॥

अग्ने सहस्वाग्निर्विराडाग्नेयी ॥

अग्ने सहस्राक्षेत्येषाग्निदेवत्या विराट्छन्दस्का । यस्या इमाश्चत्वार: पादा: सा विराट्पङ्क्ति: । अथ चतुष्पदा विराड्द्व्यक्षरत्युत्ते." । चतुर्थीऽत्र नवक:, स्वाहा । पृथग्यजु: । स्वयमातृण्णायांऽपरि पयोहोमे विनियोग: ॥

सुपर्णो हे पङ्क्तिस्त्रिष्टुभौ ॥

सुपर्णोऽसि आजुह्वानस्तीमे हे ऋचौ अग्निदेवत्ये यथाक्रमं पङ्क्तित्रिष्टुभौ । सुपर्णोऽसि पङ्क्ति: । आजुह्वानास्त्रिष्टुप् । अग्निनिधाने विनियोग: । आग्नेयीत्यनुवर्त्तते । तस्माच्चाग्नेयी इतिविपरिणम्यते । अथ सुपर्ण: असीत्येवं व्यूह: तेनेयं चत्वारिंशदक्षरापङ्क्ति: । पञ्चपदा च पादानामक्षरसंख्या नियता वास्ति । आजुह्वानइत्यत्र तृतीयेन व्यूह: चतुर्थो द्वादशकोपेत: ॥

ताए सवितु: सावित्रीं त्रिष्टुभं पुरस्ताऽज्र्योतिषं कृणवो ददर्श ॥

ताए सवितुरित्येतां सवितृदेवत्यामृचं त्रिष्टुभं कण्वऋषिर्ददर्श । अत्र वरेण्यस्येति व्यूह: । पुरस्ताज्ज्योतिषमिति केचित्पठन्ति । तदयुक्तं । तल्लक्षणस्याभावात् । तेन त्रिष्टुभंकरावी ददर्शेत्येव सत्य: पाठ:, संहिताभाष्ययोस्तु पुरस्ताज्ज्योतिषमित्यपिपाठो लिखितोऽस्ति । तदा दृश्यधिका सा भवति शमीमयसमिदाधाने विनियोग: ॥

विधेमाग्नेयी गृत्समदस्त्रिष्टुभमस्यास्त्रिस्थानोऽग्निर्देवता ॥

विधेम तइतीमामृचमग्निदेवता त्रिष्टुभं गृत्समदोऽपश्यत् अस्या ऋषस्त्रिस्थानोऽग्निर्देवता । त्रीणि स्थानानि यस्यासौ त्रिस्थान: तानि त्रीणि स्थानानि मन्त्रमध्ये ऋषितानि सन्ति । वैकंकतसमिदाधानेऽस्या विनियोग: ॥

प्रेदृचो विराडाग्नेयी वसिष्ठस्य ॥

प्रेदृचोऽग्नदित्येषा अग्निदेवत्या विराट्वसिष्ठस्यार्षं वसिष्ठोऽस्या ऋषिरित्यर्थः । अस्या दशाक्षराण्यः पादा वर्त्तन्ते, द्वितीयस्य व्यूहेन पूर्त्तिः । तेनेयं विराडनुष्टुप् । "दशकाश्चयो विराडितिवचनात्" । औदुम्बरसमिदाधाने विनियोगः ॥

चित्तिं वैश्वकर्मण्यतिजगती ॥

चित्तिं जुहोमीतीयमृक् विश्वकर्मदेवता अतिजगतीछन्दस्का । "द्वापञ्चाशदक्षरा अतिजगतीत्युच्यते" । अत्र द्वाभ्यां व्यूहाभ्यां पूरणं । स्रुवाहुतिहोमे विनियोगः ॥

सप्ततऽआग्नेयीचिष्टुप्सप्तऽऋषीणाम् ॥

सप्ततऽअग्नदित्येषा अग्निदेवत्या चिष्टुप्छन्दस्का सप्तऋषीणामार्षं सप्तऋषयोऽस्या ऋषयइत्यर्थः, षड्चत्वारिंशदक्षरेयं । येन दृब्धिका चिष्टुप् । सर्वाहुतिहोमेऽस्य विनियोगः ॥ २७ ॥

शुक्रज्योतिः षण्मारुत्यः ॥

शुक्रज्योतिरित्याद्याः षड्ऋचो मारुत्यः । मरुतआसां देवताइत्यर्थः । ते च शुक्रज्योतिरित्यादिनामकाः । मन्त्रलिङ्गात् । ते चैकैकस्याऋचि सप्त सन्ति । तेन प्रत्यृचं सप्तानां सप्तानां मन्त्रलिङ्गनामकानामुद्देशः कार्यः, आसां क्रमेण छन्दांस्याह ॥

आद्या चतुर्थी चोष्णिक् ॥(१)

षण्णां मध्ये आद्या शुक्रज्योतिरितीयं उष्णिक्, चतुर्थी ऋतजिच्चेति द्वयञ्चोष्णिक् । प्रथमाऽष्टाविंशत्यक्षरा । चतुर्थी एकाऽधिका ॥

द्वितीया तृतीयाच गायत्री ॥(२)

---

(१) आद्या तृतीयोष्णिक् इति काण्वसर्वानुक्रमपाठः ॥

(२) द्वितीया चतुर्थी च गायत्री इत्यपि तत्रस्थः पाठश्च ॥

ऋचां वषां द्वितीया ईडेऽग्नेति गायत्री । ऋतवेति द्वितीया च गायत्री ॥

पञ्चमी जगती ॥

ऋचां मध्ये पञ्चमी ईडेन्यासदिति जगती । अष्टाचत्वारिंशदक्षरत्वात् ॥

षष्ठी गायत्र्युष्णिग्वा ॥

षष्ठी स्रुतवानित्येषा गायत्री । उष्णिग्वा । षड्विंशत्यक्षरत्वादिकल्पः । ऋचामपि क्रमेण मारुतपुरोडाशहोमे विनियोगः ॥

इन्द्रं दैवीर्मरुतम् ॥(१)

इन्द्रं दैवीरित्येतन्मरुतं दैवतं यजुः व्यूहेन षट्पञ्चाशदक्षराग्नेयी । जपे विनियोगः ॥

इमं चयोदशर्चं आग्नेयस्त्रैष्टुभोऽनुवाको यज्ञस्तुतिर्घृतस्तुतिर्वा वसोर्धारा अभिवादिनी वा ॥

इमꣳ स्तनमित्येवस्त्रयोदशर्चोऽनुवाकोऽग्निदेवतस्त्रिष्टुप् छन्दस्कः एषोऽनुवाको यज्ञस्तुतिर्वा वसोर्धाराऽभिवादिनी घृतस्तुतिकः, अग्नये वसोर्धाराहोमो भविष्यति तदभिवादिनी घृतस्तुतिरप्यत्र दृश्यते सकलस्यानुवाकस्य जपे वाचने वा विनियोगः ॥

घृतं मिमिक्षे गृत्समदः ॥

अस्मिन्ननुवाके घृतं मिमिक्षेत्यस्या ऋचो गृत्समदऋषिः ॥

समुद्रादूर्मिदेवः ॥

समुद्रादूर्मिः । इत्यस्या वामदेवऋषिः ॥

चत्वारि शृङ्गा यज्ञपुरुषदेवत्यऽऋषभो मन्त्रः ॥

---

(१) इन्द्रं दैवीर्मरुतो शक्वरी इत्यपि तथैव पाठः ॥

चक्षुरादि मृदोऽन्तं मन्त्रो यज्ञपुरुषदेवतः ऋषभः मन्त्रोक्तलक्षणयज्ञपुरुषोऽस्य देवतेत्यर्थः अत्र । घृते स्थितः । व्यूहः, घृतस्य नाम । व्यूहः । चतुः मृदः व्यूहः, हे शीर्षं व्यूहः । एता अर्षन्ति । व्यूहः । कल्याणः । अन्नयज्ञाना । व्यूहः । धामन्ते दादृशकः । अपामतीके हे दृशकौ । अथानुक्रमणीषां सर्वमन्त्राणामथाग्निं प्रजापतिरपश्यत्साध्या वाऽपश्यन्नित्येतएव ऋषयः ॥ २८ ॥

१ वाजश्च मे देवानामार्षम् ॥ १८ /

वाजश्च मदित्याद्यानि वेट्स्वाहेत्यन्तानि वसोर्धाराहोममन्त्रभूतानि यजूंषि देवानामार्षं । एतेषां यजुषां देवाऋषयइत्यर्थः, वसोर्धाराहोमे विनियोगः ॥

एतैर्यजुर्भिर्यजमानोऽग्नेः कामान्याचते ॥

यजमानः एतैर्वाजश्चमदित्यादिभिर्यजुर्भिरग्नेः सकाशात् । वाजोऽन्नं मेऽस्त्वित्येवं कामानभिलाषान्याचते प्रार्थयते । अतएवैतेषां यजुषामग्निरेव देवता । तथा च श्रुतिः । "अथाऽतो वसोर्धारां जुहोत्यग्नेर्वै सर्वौषधेः संकृतः साऽएषोऽन्न वसुस्तस्मै देवा एतां धारां प्राग्रह्णँस्तयेनमप्रीणंनित्यादि" । कामप्रार्थनं चाम्नायते सम्यादेहं च मदद्य मदित्यनेन चात्वा प्रीणाम्यनेन चात्वाभिषिञ्चाम्यनेन चेत्येतदर्थो इदं च मे देहादश्चमदितीति। तथा "एतद्वै देवा अब्रुवन्कथेनेमान्कामान्प्रतिग्रहीष्यामदित्यात्मनेवेत्यब्रुवन्यज्ञो वै देवानामात्मा यतऽएव यजमानश्च स यदाह यज्ञेन कल्पन्तामित्यात्मना मे कल्पन्तामित्याहेति" । अत्र वाजादयः काम्यमानत्वात्कामः । अत्र त्र्यक्षराणां । जक्चमेदित्यादियजुषां दैव्यनुष्टुप् । वाजश्च मे इत्यादिचतुरक्षराणां दैवीबृहती, मयस्तिश्च मे इत्येवं पञ्चाक्षराणां दैवीपङ्क्तिः, आधिपत्यं च मदित्यादि षडक्षराणां दैवीत्रिष्टुप् यजुर्गायत्री वा । सप्ताक्षराणां द्यावापृथिवीभ्यामश्वम इत्यादीनां दैवीजगती । यजुरुष्णिग्वा । अष्टाक्ष-

राचां त्रायुर्यज्ञेन इत्यादीनां यजुरनुष्टुप्। मुखतश्च पत्ये स्वाहेत्यादीनां नवाक्षराचां यजुर्बृहती। दशाक्षराचां सुधाय वैनर्त० ग्निनायेत्यादीनां यजुः पङ्क्तिः। एकादशाक्षराचां विनर्ठ ग्निनर्धात्मावनाय स्वाहेत्यादीनां यजुस्त्रिष्टुप् द्वादशाक्षरस्य अङ्कुलयः। अक्षरयो दिग्वसमदित्यस्य यजुर्जगती एवमनुक्तानामपि कल्पनीयं, अत्र च चत्वारिंशताग्येकाधिकानि यजूंषि सन्ति। तत्र वाजस्य मदित्याद्यासु ज्येष्ठं च मे, वसु च म इतिकण्डिकाद्यवर्जितास्वेकोनविंशतिकण्डिकासु त्रयोदश त्रयोदश यजूंषि सन्ति। ज्येष्ठं च मदित्यस्यां तु पञ्चदश यजूंषि। वसु च म इत्यस्यां नव। अग्निश्च मे घर्मश्च मदित्यस्यां कामास्त्रयोदश। यजूंषि तु द्वादशैव। अङ्कुलयः अक्षरयो दिग्वसमदित्येकमेव यजुः अत्र कामास्त्रयः। यजुर्जगतीछन्दो, व्रतं च म इत्यस्यां कामा दश यजूंषि षडेव, पक्षोरात्रे उर्वष्ठीवे हनूद्वन्तरे च म इत्येतावदेकं यजुः। अग्निनषट्कामाः। प्राजापत्यानुष्टुप्सामानुष्टुप् छन्दः, एका च मदित्यस्यां त्रयस्त्रिंशत्। चतस्रश्च मदित्यस्यां त्रयोविंशतिः। ग्र्यश्च म इत्यस्यामेकादश। षडवाट्च मेत्यस्यां नव, वाजाय स्वाहेत्यस्यां चतुर्दश। तत्र त्रयोदश स्वाहाकाराणि। ग्रहमिष्टं चतुर्दश व्यूहाभ्यामष्टाविंशत्यक्षरा प्राजापत्या अनुष्टुप् तस्य छन्दः। आयुर्यज्ञेनेत्येतत्रैकविंशतिः। तत्र द्वादश कल्पनामन्त्राणि। स्तोमश्चेत्यादीनि षट्। स्वर्देवा अगन्मामृता अभूमेत्येकं। सामगायत्री तस्य छन्दः। व्यूहश्च। प्रजापतेः प्रजाऽ अभूमेत्येकं। यजुर्बृहती। वेट्स्वाहेत्येकं। दैव्यनुष्टुप्, एवं च चत्वारिंशताग्येकाधिकानि पूर्णानि॥

वाजप्रसवीयर्ठ० सप्तर्चम्॥

सप्तानामृचां समाहारः सप्तर्चं वाजप्रसवीयसम्बन्धिसप्तर्चं अभिधीयतइति शेषः। वाजस्य नित्यस्या अपि ऋचो मध्ये गणनास-

सप्तर्चो भवन्ति । पञ्चास्तु ऋचो भवन्ति । पञ्चास्तु ऋत्यादि प्रागुक्तम् ॥

विश्वे चैष्टुभं (१)वैश्वदेवं लुप्तोधानाकः ॥ १८/३१

विश्वे अद्येत्येतत्त्रिष्टुप् छन्दस्कं विश्वेदेवदेवतं लुप्तोधानाकोऽपश्यत् । अत्र द्वितीये व्यूहः । आग्निकराजप्रसवीयहोमे.स्य मन्त्रस्य विनियोगः ॥

वाजो नस्त्रिस्त्रोऽन्नदेवत्या आद्याऽनुष्टुप् द्वे त्रिष्टुभौ ॥

वाजो नः सप्त,इत्याद्यास्तिस्र ऋचोऽन्नदेवत्याः । तासामाद्याऽनुष्टुप् छन्दस्का वाजो नः सप्तइत्येषा । तृतीये व्यूहः । तत्रो वाजो नो अद्य, वाजः पुरस्तादितीमे द्वे त्रिष्टुभौ ॥

सम्राड् विराजावाग्नेय्यौ ॥

सम्राड्, पयः पृथिव्यामित्यनयोः प्रजापतिर्ऋषिः अग्निर्देवता विराडनुष्टुप्छन्दः । देवस्य त्वा प्रा०सवितादेव०प्रजापत्यावृहतीछन्दोऽभिषेके विनियोगः ॥

सरस्वत्यै लिङ्गोक्तम् ॥

सरस्वत्यै प्र०यजमानो देवता प्राजापत्या बृहतीछन्दोऽभिषेके विनियोगः ॥

ऋताषाड्गन्धर्वोऽप्सरसः ॥

ऋताषाट्प्र०ऋतधामाग्निर्यजापत्या बृहती । ऋषिरो व्यूहेन ऋग्बृहती । तस्यापो आसुरी उष्णिक्, भुज्यु । एकाधिकाप्राजापत्या पङ्क्तिः । तस्य दक्षिणा । एकाधिकाप्राजापत्यानुष्टुप् । प्रजापतिः । प्राजापत्या त्रिष्टुप् । तस्य ऋक्सामानि । ऋग्गायत्री । द्वाद्व

(१) वैश्वदेवीं इति काण्वपाठः ॥

भूर्भुवःस्वरादित्यादिहादश्यमन्त्राणां विनियोगः ॥

सनः प्राजापत्या प्रस्तारपङ्क्तिः ॥

स नो भुवनस्यपतइतीयं प्रजापतिदेवत्या । अस्याः प्रस्तारपङ्क्तिश्छन्दः यस्या आदौ हादशकौ अन्त्यावष्टकौ सा प्रस्तारपङ्क्तिः । "आद्यौचेत्प्रस्तारपङ्क्तिरित्युक्तेः' रथगीर्षे पञ्चगृहीतहोमेऽस्या विनियोगः । अत्र तृतीयो नवकः । चतुर्थः स्वाहाकारेण सहाष्टकः ॥

समुद्रोऽसि वायव्यानि चीणि ॥

समुद्रोऽसि नभस्वानित्यादीनि चीणि यजूंष्यपि वायुदेवतानि वाजहोमे विनियुक्तानि । समुद्रोऽसि व्यूढेन ऋचामनुष्टुप् । मारुतोऽसि । ऋगुणिक् । अवस्यूरसि । प्राजापत्याबृहती, यास्ते अग्ने, यश्च इत्यनयोः प्रागुक्तहोमे विनियोगः ॥

ऋचमाग्नेय्यनुष्टुप् ॥

ऋचं नो धेहीतीयमग्निदेवत्याऽनुष्टुप्होमे विनियुक्ता । प्रथमोऽत्र नवकः । नैतेकाधिका ॥

तत्त्वा वारुणीं त्रिष्टुभर्ठ॰ शुनःशेप । ॥

तत्त्वा यामीमात्रचं वरुणदेवत्यां त्रिष्टुभं शुनःशेपऋषिरपश्यत् । आज्याहुतिहोमेऽस्या विनियोगः ॥

स्वर्णाग्नेयानि पञ्च ॥

स्वर्ण घर्मइत्यादीनि पञ्च यजूंष्यग्निदेवतानि । आज्याहुतिहोमएवैषां विनियोगः । पञ्चानामपि यजुर्गायत्रीछन्दः द्वितीये व्यूहः । दैवीपङ्क्तिः ॥

अग्निं युनज्म्याग्नेय्यस्तिस्रश्चाद्ये द्वे त्रिष्टुभौ पङ्क्तिस्तृतीया ॥

अग्निं युनज्मि, इमौते पक्षौ, इन्दुर्दक्षस्तेताग्निरत्र पक्षोऽग्निदेवताः । तासां आद्ये द्वे त्रिष्टुबुष्णिहौ । तृतीया इन्दुर्दक्षस्तेवा पङ्क्तिः । अग्नियोजने तिसृणां विनियोगः । तेन वयं । द्वादशकः । इमौते । द्वादशकः । याभ्यां द्वौ व्यूहौ । यत ऋषवः चतुर्दशकः, तेनैकाधिका । इंदुर्दक्षः नवकः । द्वितीयतृतीयौ एकादशकौ । चतुर्थो नवकः । तेन चत्वारिंशदक्षरापङ्क्तिः ॥

दिवो द्वे आग्नेय्यौ परोष्णिङ्महापदपङ्क्तौ ॥

दिवो मूर्धोऽसि, विश्वस्य मूर्धेतीमे द्वे ऋचावग्निदेवत्ये यथाक्रमं एरोष्णिङ्महापदपङ्क्तिः । तत्र दिवो मूर्धा परोष्णिक् तस्याग्निपदाद्यावष्टकौ । तृतीयो द्वादशकः । तेनैकाधिका आद्यपादयोरक्षरनियमो नास्ति, विश्वस्य मूर्धेति जगती महापदपङ्क्तिः । अष्टाचत्वारिंशदक्षरा । महापङ्क्तिलक्षणं त्वत्परिभाषायां नास्ति । महापङ्क्तिलक्षणं विद्यते । अष्टकः सप्तकः । षट्को दशको नवकोऽयमष्टका वा महापङ्क्तिरिति, तेनात्र विश्वस्य मूर्धेति प्रथमो यकारव्यूहेन षडक्षरः पादः, तिष्ठसीत्यादिद्वितीयः सप्तकः, समुद्रे ते तृतीयो दशकः । अपोदत्तेऽयमष्टकः, पृथिव्यादत्सेऽपि नवकः । तेनात्र परोष्णिङ्महापङ्क्तीत्येव पाठो युक्तः । इतरस्तु प्रमादपाठः अग्निविमोकेऽनयोर्विनियोगः ॥

दृष्टो यज्ञो दृवृचं यजमानाग्निदैवत्यं गालवः । आद्योष्णिद्वितीया गायत्री ॥

दृष्टो यज्ञस्त्वेतद्दृवृचं ऋग्द्वयं ऋषिरपश्यत् अग्निर्देवृचे आद्या दृष्टो यज्ञस्त्वुष्णिक् अष्टाविंशत्यक्षरत्वात् । पादाक्षरनियमो नास्ति द्वितीया दृष्टोऽग्निर्गायत्री । आद्यः सप्तकः । तेनैकोना । त्वगादृदमिति पूरयं वा । अग्नि-

अग्निमिन्द्रवसुहोमेऽग्नीषोमिनियोगः ॥

यदाकूताद्दृष्टं माग्नेयं विश्वकर्मर्षयः ॥

यदाकूताच्चमसमुद्वोदित्येतद्दृष्टं अग्निदेवतं । विश्वकर्मर्षयेदार्षं विश्वकर्माऽऋषिरित्यर्थः । स्रुवाहुतिहोमे विनियोगोऽप्यार्षः ॥

तृतीया दैवी वा ॥

अग्निमृष्टवे तृतीया एतं जानाथेत्येषा दैवी वा । देवा अग्नादेवतेत्यर्थः । आग्नेयी वेति विकल्पः ॥

आद्या जगती ॥

अथाद्या यदाकूतादित्येषा जगती । अथ चतुर्थं चतुर्दशकः । अथ एकादशकाः । तृतीये व्यूहः ॥

तिस्रस्त्रिष्टुभः ॥

एतर्ट० सधस्थ, एतंजानाथ, उद्बुद्ध्यध्वमित्येतास्तिस्रऋचस्त्रिष्टुभः । एतर्ठ० सधस्थेत्यस्य चतुर्थे व्यूहः । एतं जानाथ । व्यूहः । उद्बुध्वमित्यस्य तृतीयो दशकः, चतुर्थो द्वादशकः ॥

चतस्रोऽनुष्टुभः ॥

येन वहसि । प्रस्तरेण, यद्वक्षं, अथ धारा इत्येताश्चतस्रऋचोऽनुष्टुभः । स्वदेवेषु इत्यस्य सुवर्देवश्चिति चतसृष्वपि चतुर्थपादे व्यूहः, मधोर्घृतस्येत्यन्ततः ॥

अग्निरस्म्यन्यहैतवादिनीत्रिष्टुभं हैवयवाहैवयवातदृषभारतौ ॥

अग्निरस्मि जन्मना इतीमामृचं त्रिष्टुप्छन्दस्कामन्यहैतवादिनौ भारतौ भरतपुत्रौ हैवयवातहैतीमौ द्वावृषी अपश्यतां । अत्रा अग्निर्देवता । आत्मनोऽस्मिन्ना सहाहैतमेवं वदतीत्यन्यहैतवादि-

नीयस्या विनियोगो यज्ञकर्मणि नास्ति ॥

ऋचो यजुः ॥

ऋचो नामासीत्येतद्यजुः । एकवचनादेकमेव समदशाक्षरं व्यूहेन ऋग्गायत्री आत्मादेवता । अस्याऽपि विनियोगस्तत्रैव नास्ति ॥

येऽग्नयोऽनुष्टुबाग्नेयी ॥

येऽग्नयः पांचजन्याइतीयमनुष्टुबग्निदेवत्या । अग्नेरुपस्थाने विनियुक्ता । अस्यां पृथिव्यां । व्यूहः ॥ ३० ॥

वार्चहत्याय समर्चमिन्द्रोऽपश्यत् ॥

आग्नेयपदमनुवर्त्तते, वार्चहत्यायेत्यादि समर्चं ऋक्समकं चित्याग्निदेवतं इन्द्रऋषिरपश्यत् । "इदन्तत्समर्चमपश्यदितिश्रुते." । पुरीषवत्यग्नेरुपस्थाने विनियोगः ॥

आद्ये द्वे वार्चहत्यौ गायत्रिचिष्टुभौ विश्वामित्रस्य च ॥

अत्र सप्तर्चं आद्ये द्वे ऋचौ वार्चहत्याय, सहदानुमित्येते वार्चहत्यौ क्रमेण गायत्री त्रिष्टुभौ विश्वामित्रस्य च ऋषेरार्षं चकारादिन्द्रस्य च । अनयोरिंद्रविश्वामित्रौ द्वावप्यृषी स्तुत्यर्थः । विश्वामित्रेणेंद्रस्य बाधो माभूदिति । चकारः समुच्चयार्थः । अतएव यत्रादन्यविशेषोक्तेन ऋषिणा सामान्यस्यापवादो भवतीति गम्यते, पूतनाषाड्याय चेत्यत्र व्यूहः ॥

विनोऽनुष्टुप् ॥

वि नऽइन्द्रेतीयमनुष्टुप् ॥

मृगो न त्रिष्टुप् ॥

मृगो न भीमइतीयं त्रिष्टुप् ॥

प्रथमाऽश्वाभो भारद्वाज. ॥

प्रथमां विन इन्द्रहतीमां भारद्वाजस्य पुत्रः शास ऋषिरपश्यत् । वि नः शासोभारद्वाजइति पागुक्तेऽपि इन्द्रेण ऋषिणाऽत्र विनियोग दिष्टेन इन्द्रएवसप्तर्चमपश्यदितिपत्यक्षश्रुतेन शासस्य बाधो माभू दिति पुनरुक्तं । इन्द्रोऽप्यत्र भवत्येव । प्रत्यक्षश्रुतत्वात् ॥

द्वितीयां जयऐन्द्र ॥

द्वितीयां मृगो नेतीमां "इन्द्रस्य पुत्रोजयसंज्ञकऋषिरपश्यत् । अत्रापीन्द्रो द्वितीयायास्ते च प्रत्यक्षश्रुते." ॥

द्वे वैश्वानर्यौ गायत्रीत्रिष्टुभौ ॥

वैश्वानरः, पृष्टोदिवीतीमे द्वे ऋचौ वैश्वानरदेवते क्रमेण गायत्रीत्रिष्टुभौ । वैश्वानरो गायत्री । पृष्टोदिवि त्रिष्टुप् ।

पृष्टो दिवि कुत्सस्य च ॥

पृष्टो दिवीत्येषा कुत्सस्यार्षं चकारादिन्द्रस्य च । अस्या इन्द्रकुत्सौ द्वावप्यृषी इत्यर्थः । अत्रापि चकारः समुच्चयार्थः ॥

अश्याम द्वे त्रिष्टुभावाग्नेय्यौ कामवत्यौ ॥

अश्याम तं । वयं ते, अद्येतीमे द्वे ऋचौ त्रिष्टुभौ अग्निदेवते कामशब्दवत्यौ ॥

अश्याम भरद्वाजस्य च ॥

अश्याम त इत्येषा भरद्वाजस्यार्षं । चकारादिन्द्रस्य च । चकारः समुच्चयार्थः । इन्द्रभरद्वाजावस्य ऋषी इत्यर्थः ॥

वयं ते कात्यस्योत्कीलस्य ॥

त्रिष्टुप्पदमनुवर्त्तते । वयं तइत्येषा त्रिष्टुप् कात्यस्य कतापत्यस्योत्कीलस्य । आर्षमिति शेषः । अस्याः कृतस्य पौत्र उत्कील ऋषिरित्यर्थः । चित्युपस्थानएवविकल्पेन विनियोगः ॥

धामच्छदनुष्टुब्वैश्वदेवी ॥

धामच्छदस्मिरित्येषा विश्वदेवदेवताऽनुष्टुप् दध्यभिघारणानपदे त्रि-त्वुपक्षाने विनियुक्ता, प्रथमः सप्तकः । चतुर्थं व्यूहं कृत्वा छन्दः प-रवत् ॥ २१ ॥ (१)

अथ सौत्रामणी ॥

अथानन्तरं सौत्रामणी । अभिधीयतइतिशेषः । सौत्रामणीम-ग्नाचामृच्यादित्यमभिधीयत इत्यर्थः ॥

प्रजापतेरार्षमश्विनोः सरस्वत्याश्च ॥

सा सौत्रामणी प्रजापतेरार्षं । सरस्वत्याश्चार्षं । सौत्रामण्यां त-स्यामृचां प्रजापतिरश्विनौ च सरस्वतीच एतेऋषयः सन्तीत्यर्थः ॥

स्वादोः स्वाऽनुष्टुप् सुरासोमदेवत्या ॥

स्वादोः स्वा स्वादुमितीयमनुष्टुप् ऋचाः सुरासोमौ देवता । सुरा-रूपः सोमः सुरासोमइत्युच्यते । अत्र प्रथमोऽष्टकः तृतीयोऽष्टकः । चतुर्थसप्तकः । सुरायाः संसर्जने विनियोगः ॥

सोमोऽसि चत्वारि सौराणि ॥

सोमोऽस्यश्विभ्यामित्यादीनि चत्वारि यजूंषि सौराणि सुरा-संसर्जनएव विनियुक्तानि । सोमोऽसि । दैव्यनुष्टुप् । अश्विभ्यां यजु-र्बृहती ॥

परीतो भारद्वाजः सौमीं बृहतीम् ॥

परीतोषिञ्चतेतीमां बृहतीं सोमदेवत्यां भरद्वाजऋषिरभ्यगात् । अथोऽष्टकाः तृतीयो व्यूहाभ्यां द्वादशकः । तेनेयं बृहती । पयसा सु-रापरिषेके विनियोगः ॥

वायोस्तुचो गायत्रः सौम्यऽआभूतेः ॥

---

(१) काण्वसर्वानुक्रमेऽत्रैव द्वितीयाध्यायः समाप्तः कृतः ॥

वायोः पूतस्त्वं इत्यः सोमदेवतो गायत्रीछन्दस्क आसूतेरार्षं अ-
स्य तृचस्याभूतिकर्मविनियोगः । सुरापावनेऽस्य तृचस्य विनियोगः ।
इन्द्रस्य युज्यः, प्राङ्नाभिदघ्नयोर्व्यूहः ॥

ब्रह्मन्वयं त्रिष्टुप् सुरासोमदेवत्या ॥

ब्रह्मन्वयमितीयं त्रिष्टुप्षड्चाः सुरासोमदेवता । पयः पावने विनि-
योगः । आद्यो द्वादशकः । द्वितीयस्त्रयोदशकः अन्त्यावेकादशकौ ।
तेन अधिका अग्निभ्यां त्वा । यजुस्त्रिष्टुप् । सरस्वत्यै त्वा आसुरीय-
मनुष्टुप् । इन्द्राय त्वा सुवाम्ये सामोष्णिक् । उपयामगृहीतोऽसि मध्ये ग-
रायते एष ते योनिर्या प्राजापत्या गायत्रीछन्दः ॥

नानाहि जगती सुरासोमदेवत्या ॥ (१)

नाना हि वामितीयंजगती षड्चाः सुरासोमदेवता । सुरापावा-
भ्यां ग्रहेषु प्रत्येकविनियुक्ता । द्वितीयो व्यूहेनैकादशकः, चतुर्थो व्यू-
हेन द्वादशकः, कुत्रचिद्व्यूहेन छन्दः पूरणं । आग्निनं तेजः । यजुर्जग-
ती । सारस्वती सामोष्णिक् । ऐन्द्रमग्नं । यजुस्त्रिष्टुप् । उपयामगृहीत-
सर्वत्र मध्ये ज्ञेयं । एषते योनिरिति त्रयस्य प्राजापत्यागायत्रीछन्दः ॥

तेजोऽसि पयो देवत्यानि । ८

तेजोऽसीत्यादीनि त्रीणि यजूंषि पयोदेवत्यानि तेजोऽसि यजुर्बृ-
हती । आग्निने पयोग्रहे गोधूमकुबलचूर्णावापे विनियोगः ॥

वीर्यमसि ॥

यजुः पङ्क्तिः । सारस्वते पयोग्रहे उपवाक्षदरचूर्णावापे वि-
नियोगः । वीर्यमसि । यजुः पङ्क्तिः । सारस्वते पयोग्रहे उपवा-
क्षदरचूर्णावापे विनियोगः । बलमसि । यजुः पङ्क्तिः । ऐन्द्र-
पयोग्रहे एव कर्कन्धुचूर्णावापे विनियोगः ॥

---

(१) अन्यानि यजूंषि इति काण्वसर्वानुक्रमपाठोऽधिको बोध्यः ॥

ओजोऽसि सुरादेवत्यानि ॥

ओजोऽस्योजो मयि धेहीत्यादीनि त्रीणि यजूंषि सुरादेवत्यानि । ओजोऽसि यजुरनुष्टुप् सुराग्रहस्पर्शने विनियोगस्त्रयाणामपि मन्त्राणाम् । यजुः षड्भिः । सहोऽसि । यजुर्बृहती ॥

१० **या व्याघ्रं० हैमवर्चरनुष्टुब्विषूचिकास्तुतिः ॥**

या व्याघ्रमित्येषाऽनुष्टुप् हैमवर्चे । आर्षमिति शेषः । हैमवर्चिसंज्ञोऽत्राऽग्निरित्यर्थः । इयं विषूचिकायाः व्याधिविशेषस्य स्तुतिः सैवाऽत्र देवता । स्तुतिभाजो देवताहत्युक्तत्वात्, व्याधीनामप्यधिष्ठात्रीदेवताः सन्ति तन्नामविषूचिकाऽत्र स्तूयमानेत्यर्थः, श्लेष्मपाभ्यां यजमानस्य पावने विनियोगः । या व्याघ्रमित्यस्य व्यूहेन पूर्तिः, सदमं पातु, अंहस इतीदौ व्यूहौ ॥

११ **यदा पिपेषाग्नेयी बृहती ॥**

यदा पिपेषेत्येषाऽग्निदेवत्या बृहती । अग्निप्रेषणे विनियुक्ता । अत्र तृतीयएकादशकः । अन्येऽष्टका एकोना ॥

सम्पृचस्य पयोग्रहाः ॥

सम्पृचस्येत्यस्य यजुष पयोग्रहा देवताः । यजुस्त्रिष्टुप् । पयोग्रहसंमर्शने विनियोगः ॥

विपृचस्य सुराग्रहाः ॥

विपृचस्येत्यस्य सुराग्रहादेवता । यजुस्त्रिष्टुप् । सुराग्रहसंमर्शने विनियोगः ॥

देवा यज्ञं ब्राह्मणानुवाको विर्ठ० प्रतिरनुष्टुभः सोमसम्पत् ॥

देवा यज्ञमतन्वतेत्याद्या विंशतिऋचोऽनुष्टुप्छन्दस्काः । ब्राह्मणानुवाकः । अयं विंशतिकण्डिकात्मको ब्राह्मणकपोऽनुवाको न तु सं-

[illegible]र्थः । सोमसम्पदिति । सोमानक्षाः सोमसम्पत्तिः सोमसाकल्यमनुवादे प्रतिपाद्यतदर्थः । अतएवास्य ब्राह्मणरूपता सोमसम्पदादिप्रतिपादने । अग्नेर्द्व्येन्द्रियादि नवकः । वायव्दीरूपं नवकः । पुरोडाशैः व्यूढः । छन्दोभिः सप्तकः । याज्याभिः व्यूढः । यजेति । व्यूढः । अर्धर्चेर्नवकः । वायव्यैर्नवकः ॥ ३३ ॥

सुरावन्तं चतुर्ऋचं त्रिष्टुभमश्विसरस्वतीन्द्रदेवत्यम् ॥

सुरावन्तं बर्हिषदं, यज्ञे रसः । यमश्विना । यद्व दिवः । इत्येतच्चतुर्ऋचं ऋचां चतुष्कं त्रैष्टुभं त्रिष्टुप्छन्दस्कं अश्विसरस्वतीन्द्रदेवत्यं । अश्विनौ सरस्वती इन्द्रश्चैते अस्यदेवताइत्यर्थः, मदेमेद्रं, । व्यूढः । यमश्विना । आद्यो द्वादशकः । यदिन्द्रोऽपिबदिति नवकः । सुरावन्तमित्यस्याः पर्यो ग्रहाणां होमे विनियोगः । यज्ञे रसइत्यस्याः सुराग्रहहोमे । यमश्विनेति पयोग्रहभक्षे । यदग्नेरसमिति सुराग्रहभक्षे

पितृभ्यः सप्त पित्र्याणि ॥

पितृभ्यः स्वधाभिरित्यादीनि सप्त यजूंषि पितृदेवत्यानि । एषामुच्चारणानन्तरमर्थां स्वर्गः पितृलोक, तत्र पितृभ्यइत्यादीनां त्रयाणां सुराग्रहग्रेषहोमे क्रमेण विनियोगः । अक्षन्नित्यादीनां प्रक्षालनेनाङ्गारोपसेचने । पितरइत्यस्य जपे । पितृभ्यः यजुस्त्रिष्टुप् पितामहेभ्यः प्रसुयजुष्टुप् । प्रपितामो० सामोष्णिक् । अक्षन्नेतेऽपङ्क्तिः । अमीमदन्त, अतीतृपन्त यजुरनुष्टुभौ । पितरः० यजुर्गायत्री ॥

पुनन्तु मा नवर्चं पावमानम् ॥

पुनन्तु मापितरइत्यादि नवर्चं ऋचां नवकं पावमानसञ्ज्ञं । वाचने विनियुक्तम् ॥

आद्ये द्वे पित्र्येऽनुष्टुभौ ॥

अथ नवर्चे चाचे हे ऋचौ पुनन्तु मा इत्येते चतुष्टुभौ विश्वदेवत्ये । चाचायाः प्रथमो दशकः । तेन दृष्ट्यधिका वा ॥

प्रजापतिस्तृतीयां वैखानसश्चाग्नेयीं गायत्रीम् ॥

अग्नेऽयाड्भूर्ग्वीतीमां तृतीयां गायत्रीमग्निदेवतां वैखानसः प्रजापतिर्ऋषिरपश्यत् ॥

चतुर्थी लिङ्गोक्तदेवतानुष्टुप् ॥ (१)

पुनन्तु मा देवजनाइत्येषा चतुर्थी लिङ्गोक्तदेवताऽनुष्टुप्छन्दस्का देवजना धियो, विश्वा भूतानि जातवेदश्चाप्यालिङ्गोक्ता देवता ॥

पञ्चम्यग्नेयी गायत्री ॥

पवित्रेण पुनीहिमेत्येषा गायत्री अग्निदेवता च । ऋक्षेष । ऋषिः ॥

षष्ठाग्नेयी ब्राह्मी वा गायत्री ॥ (२)

यत्ते पवित्रमित्येषा षष्ठी गायत्री अग्निदेवत्या ब्रह्मदेवत्या वा ॥

ब्राह्मस्तृतीयः पादः ॥

यत्तदित्यस्यास्तृतीयः पादएषां, ब्रह्म तेनेयं ब्राह्मः ब्रह्मदेवताः ॥

सौमी सप्तमी ॥

पवमानः सहस्रेत्येषा सप्तमी ऋक् गायत्री सोमदेवता च गायत्रीत्यनुवर्त्तते ॥

सावित्र्यष्टमी ॥

गायत्रीत्यनुवर्त्तते । उभाभ्यामित्येषा अष्टमी गायत्री सवितृदेवत्या च । मां पुनीहीति सप्तकः । तस्य व्यूहो वा ॥

नवमी विष्टुप्वैश्वदेवी ॥

---

(१) दैवतमनुष्टुप् । इति काण्वसर्वानुक्रमणिकाष्ठः ॥

(२) ब्राह्मी च गायत्री इति काण्वसर्वानुक्रमणिकाष्ठश्च वेभ्यः ॥

नवमी वैश्वदेवी पुनतीत्येषा त्रिष्टुब्विश्वेदेवदेवता । अत्र द्वितीयो द्वादशकः । अन्ये दशकाः व्यूहेन पूर्याः ॥

ये समाना अनुष्टुभौ पितृव्याऽऽद्या द्वितीया यजमानाग्नीः ॥

ये समाना इतीमे द्वे अनुष्टुभौ । तयोराद्या पितृदेवत्या । द्वितीया यजमानाग्नीर्देवतेति केचित् । मन्त्रोक्ता अग्निदेवता इत्याश्वलायनिनः । यमराज्यङ्गत्वेन व्यूहः । इत्यनयोरुत्तरयोरन्त्योः क्रमेणाऽऽद्याहुतिद्वयेन द्वयोर्विनियोगः ॥

देवी सती त्रिष्टुबेव यानपितृयाणौ पन्थानौ ब्रवीति ॥

हे सृतीऽमृतवमितीयं त्रिष्टुप् । देवयानपितृयाणसंज्ञकौ पन्थानौ द्वौ मार्गौ ब्रवीति । वक्ति । तृतीयमार्गो । तावेवाग्न देवते पथो इतीमेऽऽद्या विनियोगः । तत्र चेदं सृतीभ्यामिति त्यागः ॥

इदꣳ हविः प्रजननमित्यष्टर्चꣳ यजमानाग्नीः ॥

इदं हविः प्रजननमितीयमष्टिकन्दका व्यवसाना । यजमानाग्नीर्देवता । चतुः षड्यचरा अष्टिः । एकोऽत्र व्यूहः । यजमानस्य पयः शेषभक्षे विनियोगः ॥ ३४ ॥

उदीरतां त्रयोदशर्चं पित्र्यं त्रैष्टुभटं शंखः ॥ (१)

उदीरतामित्येतत्त्रयोदशर्चं पित्र्यदेवत्यं त्रिष्टुप्कन्दस्कं शंखऋषिरपश्यत् । अस्मिन्त्रयोदशर्चे त्वं सोम पवित्रमिति तृचस्य वाचमे विनियोगः । बर्हिषदः पितरऊति तृचस्य च । परिशिष्टानां विनियोगउक्तो नास्ति ॥

एकादशी तु जगती ॥ (२)

---

(१) उदीरतामेकादशर्चं इतिकाण्वपाठः ॥

(२) अष्टमी जगती इत्यपि काण्वसर्वानुक्रमणादृश्यते ॥

अग्निनृचयोदशर्चे एकादशी अग्निष्वात्ताः पितरस्तृतीयं जगती । अन्ये द्वादश त्रिष्टुभएव । अत्र । उपध्वमाः । ते नोऽवन्तु । अयर्वाणः । अपि भद्रे । ये नः पूर्वे । त्वष्ठः॰सोम गन्धि॰ । त्वं रजिष्ठ । त्वं सोमपि॰ । वयं स्याम । बर्हिषदः । तमागता । उपहूताः । बर्हिष्येषु । अधिब्रुवन्तु । आयन्तु । अग्निष्वात्ते । तेभ्यः स्वराट् । यथा वयं । एतेषु व्यूह । अग्निष्वात्तानृतुमतइति द्वादशकः ॥

अग्न्याजानु दशर्चोऽनुवाकः ॥

आग्न्याजानु दक्षिणतइत्ययं दशर्चः ऋग्दशकात्मकोऽनुवाकः ॥

नव पित्र्याः ॥

पित्र्यदशर्चेऽनुवाके आद्या नव ऋचः पितृदेवत्याः ॥

दशम्यैन्द्री गायत्री ॥

दशमीमपांफेनेनेतीयं इन्द्रदेवत्या गायत्री ॥

तृतीयाचतुर्थीनवम्योऽनुष्टुभः ॥

अग्निव्रतर्चेऽनुवाके तृतीया यमग्ने कव्यवाहनेति । योऽग्निं कव्यवाहनइतिचतुर्थी । उशन्तस्त्वेति नवमी । एताऋचोऽनुष्टुभः । अत्र त्वं चित्, तन्नो गौर्भिः । अनयोर्व्यूहः ॥

त्रिष्टुभइतराः ॥

इतराः षट् प्रथमा द्वितीया पञ्चमीषष्ठीसप्तम्यष्टम्यः । आग्न्याजानु, आसीनास, त्वमग्नऽईळतः, ये चेह, इदं पितृभ्यः, अधा यथा, इत्येता त्रिष्टुभः । रयिंधत्त । पुत्रेभ्यः, ये चेह । त्वंवत्थ । इदं पितृभ्यः । ये पार्थिवे । एतेषु व्यूहः । सुरावन्तमित्यादीनामुशन्तस्त्वेत्यन्तानां श्राद्धकाले भुञ्जत्सु ब्राह्मणेषु जपे विनियोगः ॥

सोमो राजाऽर्चन्नग्निरसरस्वतीन्द्राऽपश्यन् ॥

सोमोराजामृतमित्याद्यष्टर्चं ऋग्दशकमग्निरसरस्वतीन्द्रा ऋषयोऽ-

पश्यन् दृष्टवत: प्रजापतेरनुपश्याने विनियोग: । अतएवास्य बृहद्दे-वता: ॥

आद्यास्तिस्रो महाबृहत्यऽउपान्त्या च ॥

अग्निश्चर्षे आद्यास्तिस्रऋच: सोमो राजा, अद्भ्य: क्षीरं, सोम-मद्भ्यइत्येता महाबृहत्य: । अन्त्याया: उपान्त्या समीपे, तत: पूर्वा उ पान्त्या, येदेन रूपइत्येषा च महाबृहती । यस्याश्चत्वार: पादा अष्ट-का:, पञ्चमो दाश्यक: । सा महाबृहती । "चत्वारोऽष्टका जागतस्य महाबृहतीत्युक्ते" । अथ इन्द्रश्चेन्द्रियमिति त्रयोदशक: । अद्भ्य: क्षीरं । क्रुङ्ङांगिरसो । सोममद्भ्य: । एतेषु व्यूह: ॥

चतुर्थ्यन्ते अतिजगत्यौ ॥

चतुर्थ्यौ अन्नात्परिस्रुतइति । अन्त्या दृष्टापरिस्रुत इती मे द्वे ऋचौ अतिजगत्यौ । दाप्त्याग्रदक्षरा अतिजगती । अथ तु एकाधिका ॥

शेषे अतिशक्वर्यौ त्र्यवसाने ॥

शेषे रेत: सूर्यं, दृष्टा रूपे व्याकरोदित्येते पञ्चमीषष्ठ्यौ । अति-शक्वरीछन्दस्के त्र्यवसाने । अवसानत्रययुक्ते षष्ठ्यक्षरा अतिशक्वरी द्वितीया एकाधिका ॥

सीसेन तन्त्रमश्विसरस्वतीन्द्रदेवत्या: षोडशऋचस्त्र्य: ॥

सीसेन तन्त्रमित्याद्या: षोडशऋचोऽश्विसरस्वतीन्द्रदेवत्या ज-गतीछन्दस्का: । "जगतीभिर्जुहोति जागता वै पशव: षोडशभिर्ऋ-भिर्जुहोतीति पशुत्वाय, षोडशानामपि जगतीत्वमुक्तं । खुरैर्वसाय-ज्ञपने विनियुक्ता । तासांसूत्रेण एकादशक: । इन्द्रस्य रूपं । व्यू-ह:, तद्वज्र रूपमित्यस्यां त्रयएकादशका:, तद्वज्रविनेत्यस्यां तृतीयोऽ-ष्टक: । तेन चतुरूनाऽपि सा जगत्येव, बहूनामपि त्रिष्टुभएवेत्यु-

दृष्टेश्चदृत्युक्तत्वात्, दृशंच मध्ये ज्योतिर्जगतीत्युक्तेः, अथ अयस्या एकपादोऽष्टकः । मा ज्योतिषती । तथा चोक्तं । पिङ्गले । एकेन पिङ्गज्योतिषती । तथा जगती । पुरस्ताज्ज्योतिः प्रथमेन । मध्ये ज्योतिर्मध्येनोपरिष्टाज्ज्योतिरंतेनेति । सरस्वतीत्यन्त्यां अन्त्यो दशकैकादशकः । तथाऽपि जगती द्वौ तु जागतौ यस्याः सा जागतं जगतीत्युक्तत्वात् । पयसा युक्तमित्यस्यां चयएकादशकाः । चतुर्थो दशकः । तत्र तृतीये एको व्यूहः । चतुर्थे द्वौ व्यूहौ । एवं द्वौ द्वादशकौ । चतुर्थस्तु स्वतएव द्वादशकः । एवं द्वौ द्वादशकौ तेनेयमपि जगती । आन्त्राणीत्यत्र चत्वारोऽप्येकादशकाः । चतुरुनाऽपि सा अगत्येव । इत्यृग्दृदृत्युक्तत्वात् । "जगतीभिर्जुहोतीत्यृतेत्र" । कुर्भावनिष्टुरित्यत्र आद्यएकादशकः त्रयोदशकः । तथाऽपि जगत्येव बहुनाऽपि । सुखं सदित्यत्र द्वितीयो द्वादशकः । त्रय एकादशकाः । तथापि जगती अस्थिभ्यां चतुरित्यत्रापि तृतीयो द्वादशकः । त्रयएकादशकाः अविर्नेत्यत्राद्यो दशकः, द्वितीयांत्यावेकादशकौ । तृतीयो नवकः, इन्द्रस्यरूपमित्यत्र चतुर्थो द्वादशकः । त्रय एकादशकाः । आत्मन्नुपक्षदृत्यत्र तृतीयो द्वादशकः । अन्त्य एकादशकः, अङ्गान्यात्मन्नित्यत्र द्वितीयो द्वादशकः । प्रथमो व्यूहेन तथा । अन्त्यावेकादशकौ । सरस्वती योन्यामित्यत्राद्यो दशकः । त्रयएकादशकाः । तेजः पशूनामित्यत्र प्रथमएकादशकः । त्रयो द्वादशकाः । अत्र "जगतीभिर्जुहोति षोडशभिर्जगतीभिर्जुहोतीति" श्रुतिबलाद्बहुभिरक्षरैरन्यूनानां जगतीमेव । न छन्दोऽन्तरत्वम् ॥ ३५ ॥

घनस्य योनिर्द्विपदा गायत्र्यासन्दीदेवताका ॥ (१)

घनस्य योनिरितीयं द्विपदा गायत्री । आसन्दी देवता यस्याः सा आसन्दीदेवता । "ग्रैवाहिभ्यामेति कप् । "वेत्रंमध्ये आसन्द्यां-

(१) योनिरित्यत्र नाभिरिति काण्वसर्वानुक्रमपाठः ॥

निधानेऽस्या विनियोगः ॥

मा त्वा कृष्णाजिनम् ॥

मा त्वेत्यस्य यजुषः कृष्णाजिनं देवता । कृष्णाजिनस्यासयामास्तरणे विनियोगः । प्राजापत्या गायत्री ॥

मृत्योरुक्मौ ॥

मृत्योः पाहि विद्योत्पाहीत्यनयोर्द्वयोर्यजुषो रुक्मौ देवते पाद्ययोरुक्मोपासने उभयोर्विनियोगः । देव्यौ बृहत्यौ निषसादेत्यस्य तु प्रागुक्तम् ॥

अश्विनोर्भैषज्येन लिङ्गोक्तदेवतानि त्रीणि ॥

अश्विनोर्भैषज्येनेत्यादीनि त्रीणि लिङ्गोक्तदेवतानि । वसायहसंस्रवैर्यजमानाभिषेके विनियुक्तानि । अश्विनोः प्राजापत्याबृहती सरस्वत्यै भुरिग्गायत्री । इन्द्रस्य भुरिग्गायत्री ॥

कोऽसि प्राजापत्याग यत्री ॥

कोऽसि कतमोऽसीत्येषा प्रजापतिदेवता गायत्रीछन्दस्का। यजमानालम्भने विनियुक्ता । अत्रैको व्यूहेन समाक्षरः । द्वितीयः षडक्षरः । तृतीयएकादशकः । तेनेयमुष्णिग्गर्भागायत्रीत्युच्यते । "षट् सप्तैकादशोष्णिग्गर्भेत्युक्तेः" ॥

शिरो मे पञ्चर्चमिन्द्रशरीरावयवदेवताकम् ॥

इन्द्रस्य शरीरावयवा देवता यस्य तादृशरीरावयवदेवताकं । तृतीया गायत्री । अत्र पञ्चर्चे तृतीया बाहू मे बलमित्येषा गायत्रीछन्दस्का । अत्र द्वितीयः सप्तकः । अन्त्या महापङ्क्तिरवसाना । अत्र पञ्चर्चे नाभिर्मेचित्तमित्येषा अन्त्या महापङ्क्तिः । अवसानवय युक्ता च । अत्राष्टाक्षराः । षडृदाः सन्ति तेनेयं महापङ्क्तिः "षडष्टका वा महापङ्क्तिरित्युक्तेः" पायुर्मे । भगः, सौभाग्यं । अनयो-

ष्णुक् । अनुष्टुभौ ऋत्याः, अत्र पञ्चर्चे ऋत्या शिरो मे, जिह्वा मे, पृष्टीर्मे, इत्येता अनुष्टुभः । अस्य पञ्चर्चस्य यजमानकर्तृके यथालिङ्गं विभज्य विभज्याङ्गसंमर्शने विनियोगः ॥

प्रतिक्षत्रे वैश्वदेवम् ॥

प्रतिक्षत्रऽइत्येतद्यजुर्विश्वेदेवता । यजमानस्यासन्दीतः क्षत्राजिनोऽवरोधने विनियुक्तं । अष्टापञ्चाशदक्षराणि । द्वौ व्यूहौ । तेनातिशक्वरीछन्दः ॥

त्रया देवा दैवी पङ्क्तिस्त्रयस्त्रिंशा ॥

त्रया देवा इतीयमृक् दैवी देवत्या पङ्क्तिः त्रयस्त्रिंशयुक्ता च । देवस्य सवितुः व्यूहः । अष्टकाः पञ्चपदाः । तेन चत्वारिंशदक्षरा पङ्क्तिः । त्रयस्त्रिंशस्य मगस्तस्य वसाग्रहस्य होमे विनियोगः ॥

प्रथमा द्वितीये वैश्वदेवमाग्नीर्लिङ्गम्, ॥

प्रथमाद्वितीयेरित्येतद्यजुर्विश्वेदेवदेवतमाग्नीर्लिङ्गं आग्नेयं लिङ्गानि यस्मिन् तदाग्नीर्लिङ्गं पूर्वार्धस्य पञ्चम्यहोमे विनियुक्तं । अत्र त्र्यशीतिरक्षराणि एको व्यूहः । तेन प्रकृतिश्छन्दः, त्रया देवाइत्यादीनां सप्तदशानां पादानां शस्त्रमध्ये निविद्रूपे शंसने विनियोगः ॥

लोमान्यनुष्टुब्लिङ्गोक्ता देवता ॥

लोमानि प्रयतिरित्येषा लिङ्गोक्ता देवता अनुष्टुप् । अत्र तृतीयः सप्तकस्तुर्थो नवकः । लोमत्वङ्मांसमस्थिमज्जानोऽत्रलिङ्गोक्ता देवता यजमानस्य पञ्चमेऽहनि विनियोगः ॥ ३६ ॥

यद्देवास्तिस्रोऽग्निवायुसूर्यदेवत्या अनुष्टुभः कृष्णाग्रीवाः ॥

यद्देवा, यदि दिवा, यदि नक्तमित्येतास्तिस्रऋचः क्रमेणाग्निवायुसूर्यदेवत्या अनुष्टुभः । कृष्णग्रीवसञ्ज्ञकाश्च । मासरक्षणप्रावणे वि-

नियुक्ताः, विश्वामित्रश्छन्दः पंक्तिरिति व्यूह्यः ॥

यद्ग्रामे लिङ्गोक्तदेवतम् ॥

यद्ग्रामेऽरण्येति यजुषामवभृथमसीत्यन्तं लिङ्गोक्तदेवतं । मासरकुम्भप्रावणएव विनियुक्तं । एकाधिका आर्षी त्रिष्टुप् । यद्ग्रामोऽभवत्या इतीयं वाक्षी याज्यानवसाना प्रथमे व्यूह्यः । मासरकुम्भप्रावणएव विनियोगः ॥

अवभृथेति यन्नदेवतम् ॥

द्वौ व्यूह्यौ । आर्ष्यनुष्टुप मासकुम्भनाजने विनियोगः ॥

समुद्रे ते हृदया विराडापो ॥

समुद्रे ते इतीयं विराट्हृदया आपः अप्यदेवता । मासरकुम्भाभ्यञ्जन एव विनियुक्ता । दशाक्षरौ द्वौ व्यूह्यौ । "दशाक्षरा हि विराडिति श्रुतेः" अनएव विनियुक्ता ॥

ध्रुवादिवानुष्टुबापो ॥

ध्रुवादिवेतीयमग्नयनुष्टुप्छन्दस्काप्यदेवत्या । आर्षी भवतः, तेनदृष्ट्यधिका । मासोपासने विनियोगः ॥

उद्यंतं० सोर्सनुष्टुप्प्रस्कण्वस्य ॥

उद्यंतमित्येषा सूर्यदेवत्याऽनुष्टुप्प्रस्कण्वस्यार्षे प्रस्कण्वोऽध्याक्ष शिरित्यर्षः जलादुत्तारणे विनियोगः, द्वितीयर्योर्व्यूह्यः ॥

अपोऽअद्याग्नेयी पङ्क्तिः ॥(१)

अपोऽअद्यान्वचारिषमितीयमग्निदेवत्या पङ्क्तिश्छन्दस्का पञ्चपदा चत्वारिंशदक्षरापङ्क्तिः । आहवनीयोपस्थाने विनियोगः ॥

एधोऽसि समिद्देवत्ये यजुषो ॥

एधोऽसि, समिदसीत्येते यजुषो समिद्देवत्ये । एधोऽसीत्यस्य देवो-

(१) अद्यापी पङ्क्तिरिति काण्वसर्वानुक्रमणिकापाठः ॥

जमती समिदाहाने विनियोगः । समिदसीत्यस्य समिदाधाने विनियोगः । व्यूहेन सामोष्णिक् ॥

समावर्वर्त्ति निरुक्ता गायत्री ॥

समावर्वर्त्तीत्येषा निरुक्ता गायत्रीछन्दस्का । आज्याहुतिहोमे विनियुक्ता । अग्निर्देवत्येति कण्वसंहिताभाष्ये ॥

वैश्वानरज्योतिर्यजुः ॥

वैश्वानरज्योतिरितीदं यजुः, तत्त्वक् अस्य वैश्वानरो देवतेति कण्वभाष्ये ऋग्गायत्री । पूर्वसूक्तोक्तहोमएव विनियोगः ॥

अभ्यादधाम्याग्नेयमानुष्टुभं तृचमाम्बुतरास्थिः ॥

अभ्यादधामि समिधमित्येतत्तृचमनुष्टुप्छन्दस्कमग्निर्देवत्यमाम्बुतरास्थिर्ऋषिरपश्यत् । क्रमेण समित्त्रयाधाने विनियोगः । यत्र द्रव्यमिति व्यूहः ॥

अर्ठ॰शुनासीर्यनुष्टुप् ॥

अर्ठ॰शुनासीरित्येषा सौरी सूर्यदेवत्याऽनुष्टुप् । सुरासंसर्जने विनियुक्ता । आद्याः षट्काः । तत्र दृष्ट्वा ॥

सिञ्चन्ति परि सौर्यैन्द्री वाऽनुष्टुप ॥

सिञ्चन्ति परिषिञ्चन्तीत्येषा सौरी । ऐन्द्री वा । सूर्यऽइन्द्रो वा अत्र देवतेत्यर्थे । अनुष्टुप्छन्दः । पूतायाः सुरायाः आदाने विनियोगः । अचांत्यर्थोर्व्यूहः ॥

धानावन्तमैन्द्रो गायत्री विश्वामित्रस्य ॥

धानावन्तमित्येषा इन्द्रदेवत्या गायत्रीछन्दस्का, विश्वामित्रस्यार्षी अस्या विश्वामित्रऋषिः । अवघातकर्मणि धानाहोमे विनियोगः ॥

बृहदिन्द्राय बृहतोनृमेधपुरुषमेधयोरध्वर्यौ गायत्री ॥

ऐन्द्रीत्यनुवर्त्तते । बृहदिन्द्रायेत्येषा बृहती नृमेधपुरुषमेधयोरार्षं । नृमेधपुरुषमेधनामानौ अस्या ऋषीइत्यर्थः । अस्या हि मोघाम रायां सामगानं विहितं । अथ सामगायतीति प्रत्यक्षमैन्द्र्यां बृहत्यां गायतीति । अध्वर्यो गायत्रो,अध्वर्योऽद्रिरितिगायत्रो । ब्रह्मणः प योऽनुमन्त्रणे विनियुक्ता ॥ ३२ ॥

योभूतानामात्मप्रवादा पङ्क्तिर्नारायणीया कौण्डिन्यस्य ॥

योभूतानामित्येषा पङ्क्तिरात्मप्रवादा नारायणीयकौण्डिन्यस्यार्षं नारायणीयस्य शिष्या नारायणीयः स चासौ कौण्डिन्यनारायणीयकौण्डिन्यः सोऽस्या ऋषिरित्यर्थः । आत्मनः प्रवादो यस्यां सा आत्मप्रवादा । अस्या हि यः परमात्मा सर्वभूतानां अधिपतिः इत्याद्यात्मप्रवादोऽस्ति । गृह्यमाणो ग्रहोदेवता । चयस्त्रिंशस्य वसोर्ग्रहस्य ग्रहणे विनियोगः । उपयामेति सामनिष्टुप् । एष ते योनिः प्राजापत्या बृहती । उभयोर्ग्रहोदेवता ॥

प्राणपा मे द्वे अनुष्टुबुपरिष्टाद्बृहत्यौ लिङ्गोक्तदेवते ॥

प्राणपा मे, अश्विनक्रतव्यतीमेहे ऋचौ यथाक्रममनुष्टुबुपरिष्टाद्बृहत्यौ लिङ्गोक्तदेवते च प्राणपामहित्यनुष्टुप् । अश्विनक्रतव्येत्युपरिष्टाद्बृहती । अत्र व्यूहेन छन्दः पूर्वं, पादाक्षरनियमो नास्ति अत्रमाणो ग्रहशेषो देवतालिङ्गोक्ता । स एवात्र स्तूयते यतः ॥

समिद्ध इन्द्र एकादशाप्रीस्त्रिष्टुभऽआङ्गिरसः ॥

समिद्ध इन्द्रउपसामनीकइत्याद्या एकादशऋक्त्रिष्टुपछन्दस्का आप्रीसञ्ज्ञका आंगिरसऋषिरपश्यत्तामां देवता आह ॥

इध्मस्तनूनपान्नराशꣳस इडो बर्हिर्द्वार उषासा नक्ता दैव्या होतारा तिस्रो, देवीस्त्वष्टावनस्पतिः, स्वाहाग्नि-

तयद्वत्येताआप्रीदेवताः ॥

इध्मादय एकादशसङ्ख्या यथाक्रममेतासां समिदऽइन्द्रत्यादीनां श्लोकानामिन्दुमित्यन्तानामाप्रीणा देवताः । अत्र उदग्रथाः प्रथमानं । व्यूहः, सुवीरा वीरं द्वादशकः । पच्छिन्नं द्वादशकः ॥

आया तु मप्तविष्टुभेऐन्द्र्यः ॥

आयात्विन्द्रत्याद्याः सप्तर्चश्चिष्टुभ ऐन्द्र्देवत्याः, आद्याः पञ्चैन्द्र्यपशुवपापुरोडाशपशूनां याज्यापुरोनुवाक्यालिङ्गेन विनियुक्ताः । अत्र । आयात्विन्द्रः । व्यूहः । आमः दशकः । आनऽइन्द्रो हरिभिः, आद्यर्यो व्यूहः । स्वस्तिनो मघवा हो व्यूहौ । इन्द्रः सुत्रामा व्यूहः । सुवीर्यस्य । हो-व्यूहौ, अपि भद्रे सप्तत्रामा । इत्यैर्चूढ ॥

आमन्द्रे र्बृहती ॥

चतुर्थं बृहती तृतीयो द्वादशकइत्येव त्रिधा ॥

आयातु वामदेवः ॥

आयात्विन्द्रत्यृचा वामदेवऋषिः ॥

त्रातारङ्गं. ॥

त्रातारमिन्द्रमित्यृचा गर्गऋषिः ॥

आमन्द्रैर्विश्वामित्रः ॥

आमन्द्रैरित्यृचा विश्वामित्रऋषिः ॥

एवेदसिष्ठ. ॥

एवेदित्यृचा वसिष्ठऋषिः इन्दोदेवता । वसिष्ठासः हो व्यूहौ, यूयं पात । व्यूहः ॥ ७८ ॥

अथ हौत्रं विपशोः ॥

अथानंनरं विपशोर्होत्रं होतुः कर्मोच्यतइति शेषः ॥

समिद्धोऽअग्निरापीर्होदग्न विद्भिरग्निमयजन्तेन्द्र

देवत्या अनुष्टुभः ॥

समिद्धोऽग्निरश्विनेत्याद्या द्वादशर्चः । आप्रीसञ्ज्ञा अनुष्टुभोऽश्विसरस्वतीन्द्रदेवत्याः विदभिऋषिरपश्यत् । इध्माद्य एवासौ देवता इतिहरिस्वामी । "अनुष्टुभ आप्रियो भवन्तीति श्रुतेरनुष्टुभआप्रीरित्युक्तः" । विपशोः प्रयाजयाज्यात्वेनासौ विनियोगः । मध्वा रजांसि, अश्विना भारतीडा, स्वाहेन्द्रे सुतं मधु । एष व्यूढः ॥

अश्विना हविस्तिस्रोऽनुष्टुभएकैकाऽश्विसरस्वतीन्द्रदेवत्याः ॥

अश्विना हविरित्याद्यास्तिस्रोऽनुष्टुभः । एकैकाऽश्विसरस्वतीन्द्रदेवत्याः, तत्रेन्द्रमपि प्रत्येकंत्रिस्रस्त्रिस्रो देवताइत्यर्थः, न तु यथासंख्येन, नमुचेर्हिया नवकः, विपशुवपानां याज्यापुरोनुवाक्यात्वेनासां विनियोगः ॥

यऽइन्द्रऽइन्द्रमविष्टवकर्णदेवत्यास्तिस्रोऽनुष्टुभः ॥

यऽइन्द्रऽइन्द्रियं दधुरित्याद्यास्तिस्रऋचः प्रत्येकं इन्द्रमविष्टवकर्णदेवत्याः, अनुष्टुपछन्दस्काश्च । अत्रापिप्रत्येकैकाइत्यनुवर्तते, विपशोः पशुपुरोडाशानां याज्यापुरोनुवाक्यात्वेन विनियुक्ताः ॥

अश्विना गोभिस्तिस्रोऽनुष्टुभः ॥(१)

अश्विनागोभिरिन्द्रियमित्याद्यास्तिस्रऋचोऽनुष्टुभः । अत्र एकैकाऽश्विसरस्वतीन्द्रदेवत्या इत्यनुवर्तते । इविषा याज्यात्वेन विनियुक्ताः । अग्नेभिर्वीर्यमितिसप्तकः ॥

युवं पयसमिवानुष्टुब्विष्टुभौ ॥

युवं सुरामं, पयसमिवेतीमे ऋचौ अनुष्टुब्विष्टुपछन्दस्के । अश्विसरस्वतीन्द्रदेवत्ये तदाप्यपेक्ष्यते । ग्रहाणां याज्यापुरोनुवाक्यात्वेन

(१) गोभिरश्विसरस्वतीन्द्रदेवत्याः इतिकाण्वसर्वानुक्रमेऽधिकः पाठः ॥

विनियुक्ते । अनयोरार्षादिकं प्रागुक्तमेव । युवमनुष्टुप्पुरुषमिव, त्रिष्टुब्भिरस्वन्तीन्द्रदेवत्ये इति । तेन पुनरुक्तमिदं तत्रूचं इति केचित्पठन्त्येव । तत्साधकं इन्द्रकर्म । इन्द्रावथुः । यत्सरामं । एषु व्यूहः ॥

यस्मिन्नश्वासऽआग्नेय्यौ जगती त्रिष्टुभौ ॥

यस्मिन्नश्वासोऽहाव्यग्नइतीमे द्वे ऋचो अग्निदेवते । यथा क्रमं जगतीत्रिष्टुप्छन्दस्के । पशुत्रिष्टकृतोर्याज्यापुरोनुवाक्यात्वेन विनियुक्ते । यस्मिन्नश्वासऽइतिप्रयाज्या । अहाव्यग्ने त्रिष्टुप्पुरोनुवाक्या, अहाव्यग्ने इत्यस्याश्च दृष्टो व्यूहः ॥

अग्निना तेजसैकादशर्चं० शस्त्रम् ॥

अग्निना तेजसेत्यतआरभ्येकादशर्चं शस्त्रम् ॥

गोमदूषुणेत्यतत्तृचमाग्निवं गायत्रम् ॥

गोमदूषुणेत्यतत्तृचमाग्निवदेवत्यं गायत्रछन्दस्कं । गोमदिति त्रयः मसकाः, तेन पादनिचृदित्युक्तेः । "क्वचित्त्रिपादृषिभिः सा पादनिचृदिति पिङ्गलोक्तेश्च" । व्यूहेन वा त्रयाणां पूरणं कार्यं, धिष्ण्यावरिवो व्यूहः ॥

पावकानो मधुछन्दाः सारस्वतम् ॥

तृचं गायत्रमिति चानुवर्तते । पावका नः सरस्वतीत्येतत्तृचं सरस्वतीदेवतं गायत्रछन्दस्कं मधुछन्दा ऋषिरपश्यत् । चेतन्तीति मसकः । तेनैकोना ॥

इन्द्रायाहीन्द्रं मधुछन्दा एव ॥

तृचं गायत्रमिति चानुवर्तते । इन्द्रायाहि चित्रभानो इत्यादिकं तृचं इन्द्रदेवतं गायत्रछन्दस्कं मधुच्छन्दाएवापश्यत् । ता इमे व्यूहः ॥

अनुक्तमानुष्टुभमश्विसरस्वतीन्द्रदैवत्यम् ॥

यदाचानुक्तमनुक्तदेवतमनुक्तछन्दस्कं च मन्त्रजातं तदानुष्टुभमनुष्टु-

बृहच्छन्दस्कमश्विसरस्वतीद्रदेवत्यं च । तच्चाग्न्यविना तेजसाग्न्यविना पिबतामित्यृग्द्वयमेव । अश्वानयोः शस्त्रशास्त्रयोः शंसने क्रमेण च विनियोगः । ग्रहयागयाज्यापुरोनुवाक्यात्वेन च । तत्राश्विना तेजसेत्यन्तप्रथमोऽष्टकः, द्वितीयो नवकः, तृतीयो व्यूहेन सप्तकः । चतुर्थोऽष्टकः । सुषन्ताऽएसोम्यं । व्यूहः ॥ ३८ ॥

इमं मे गायत्रीत्रिष्टुभौ वारुण्यौ शुनःशेपः ॥ २१-

इमं मे वरुण, तत्त्वायामीतीमे द्वे ऋचौ यथाक्रमं गायत्रीत्रिष्टुप्छन्दस्के वरुणदेवते शुनःशेपऋषिरपश्यत् । एकवपायास्य याज्यापुरोनुवाक्यात्वेन विनियुक्ते । त्वामवस्युः । व्यूहः । तत्त्वेत्यस्य ऋचा द्विप्रागुक्तमेव । तत्त्वा वारुणी त्रिष्टुगष्ठं० शुनः शेपइति । किमिति पुनरुच्यते । सौचामण्यन्ते, प्राजापत्यश्विसरस्वत्यादिभिः शुनःशेपस्य बाधो मामूदित्येवमर्थं पुनरुपदेशः, अतएव वचनाभावे प्रागुक्तस्य ऋषेर्बाधएव भवतीति गम्यते ॥

त्वं नस्त्रिष्टुभावाग्निवारुण्यौ वामदेवः ॥ २१-४

त्वं नो अग्ने, स त्वं नो अग्नेऽतीमे ऋचौ अग्निवरुणदेवते त्रिष्टुप्छन्दस्के वामदेवऋषिरपश्यत् । अग्निवरुणयागे याज्यापुरोनुवाक्यात्वेन विनियोगोऽनयोः । त्वं नः, विश्वा इषांसीत्यनयोर्व्यूहः । स त्वमित्याद्यपादयोर्व्यूहः ॥

२१-५

मही मूषु त्रिष्टवादित्या ॥

मही मूषुमातरमित्येषा त्रिष्टुप्छन्दस्का अदितिदेवत्या । आदित्यचरुयागे याज्यात्वेन विनियुक्ता ॥

२१-६

सुत्रामाणं गयः प्लातः ॥

त्रिष्टुवादित्या इत्यनुवर्तते । सुत्रामाणमितीमां त्रिष्टुभं अदितिदेवत्यां । गयः प्लातऋषिरपश्यत् । आदित्यचरुयागे पुरोनुवाक्येषा अन्त्ययोर्याज्यका: ॥

सुनावं नौः स्वर्ग्या मायवी ॥

सुनावमित्यस्याः स्वर्ग्या स्वर्गसम्बन्धिनी नौर्देवता । गायत्रीछन्दः । षाड्जस्वरोर्ध्वः । नावा आरोहणे विनियोगः ॥

आनो मैत्रावरुणो गायत्रीं विश्वामित्रः ॥

आनो मित्रावरुणेतीमां मित्रावरुणदेवत्यां गायत्रीछन्दस्कां विश्वामित्रऋषिरपश्यत् । पयस्या याग्ये पुरोनुवाक्या । आद्यः सप्तकस्तेनैकोना निचृत् ॥

प्रवाहवावसिष्ठस्त्रिष्टुप् ॥

मैत्रावरुणीमित्यनुवर्त्तते प्रवाहवेत्येतां त्रिष्टुभं मित्रावरुणदेवत्यां वसिष्ठोऽपश्यत् पयस्या याग्ये याज्ये यं नो भवत्युवाजिनइतिवाजियागे याज्यानुवाक्ये । तयोक्तौ प्यादिप्रागुक्तम् ॥

समिद्धोऽअग्निरेकादशाग्रमानुष्टुभऽएस्वस्त्यात्रेयस्यार्षं वयोधाइन्द्रोदेवता ॥ (१)

समिद्धोऽग्निः समिधेत्येतदेकादशर्चमाग्रं आग्नीमरुत्यं आनुष्टुपकुन्दस्कं स्वस्त्यात्रेयस्यार्षं । स्वस्त्यात्रेयसञ्ज्ञोऽत्रऋषिरित्यर्थः । इन्द्रो वयोधा अस्य देवता । वयोधसे पशो प्रयाजानां याज्या एताः यथैवमुक्तं । तथाप्यत्र इध्मस्तनूनपादित्यादयएवाग्नीषं देवताः । ऐन्द्रपशौ तथैवोक्तत्वात् । वयोधाइन्द्रोदेवतेत्ययं तुप्रमादपाठइव दृश्यते । अन्यदेवत्यनिर्देशैरसदृश्यत्वात् । अत्र सुसमिद्धः । त्र्यविर्गौः । इडाभिः । सोमो । स्तीर्णं बर्हिः । विश्वे देवाः । स्वाहा यज्ञं । एतेषु व्यूहः । अतिछन्दास्सप्तकः । बृहद्वयो दशकः । एकाधिकत्वादभुरिक् ॥

---

(१) अत्र सूत्रे स्वस्त्यात्रेयपदादग्रे स्वस्त्यार्षंयस्यार्षं वयोधा इन्द्रोदेवता एतत्पर्यन्तं कण्वसर्वानुक्रमे नास्ति लिङ्गोक्तदेवतमित्याधिकं पदमस्तीति वेदव्यम् ॥

वसन्तेनऽऋतुना षड्चमानुष्टुभं लिङ्गोक्तदेवतम् ॥

वसन्तेन ऋतुनेत्यादि षड्च अनुष्टुप्छन्दस्कं लिङ्गोक्तदेवतं । इन्द्रावयोधा अस्यदेवता इत्यर्थः । वयोधसे पशौ वपापुरोडाशपशूनां क्रमेण याज्यानुवाक्या एता वसन्तेन । ग्रीष्मेण । एकविंठ० ग्रं, हेमन्तेन । शैशिरेण । एते नवकाः ॥

होता यक्षद्दृषद्वाप्री प्रैषा अश्विसरस्वतीन्द्रदेवत्याः ॥

होता यक्षत्समिधानमित्याद्या दृषद्वाप्री प्रैषाः आप्रीणां, प्रयाजयाज्यानां प्रैषाः आप्रीप्रैषाः अश्विसरस्वतीन्द्रदेवत्याः । अत्रापि स्विदादयएव देवता नाख्यादयइति हरिस्वामिनः । होता यक्षत्समिधा अग्निमिति व्यूहः । चतुः षष्यक्षरा अष्टिः । तनूनपात्एकाधिका अत्यष्टिः । नराशंठ० संज्ञं । षडनवत्यक्षराऽतिधृतिः । इडोदेवीः । द्वे व्यूहौ । अतिधृतिः, बर्हिरूर्णं व्यूहः । अष्टिछन्दः । उरा दिशः । व्यूहः । अतिधृतिः । सुप्रेशसौषे । एकाधिका अष्टिः । दैव्या होतारा । व्यूहः । अष्टिः । तिस्रोदेवीः । धृतिः । सुरेतसमृषभं एकाधिका कृतिः । वनस्पतिठ० अग्निमतारं । व्यूहः । अत्यष्टिः, होता यक्षदग्निः, अत्र चत्वारिंशदक्षराणि सन्ति तेन छन्दोनास्ति एतावदक्षरस्य छन्दसोऽभावात् ॥

अश्विनौ च्छागस्य सप्तलिङ्गोक्तदेवताः प्रैषाः ॥ २२-४

होता यक्षदश्विनौ छागस्येत्याद्याः सप्त प्रैषालिङ्गोक्तदेवताः । अत्याख्यो वपानां क्रमेण प्रैषाः । होतायक्षदश्विनौ सरस्वतीमिति मध्यमानां प्रैषः । ततस्त्रयः प्रैषास्त्रिपशुहविषां यागेषु, तत्र होता यक्षदश्विनौ छागस्य वपयाबृहत्यादीनां त्रयाणां प्राजापत्यापङ्क्तिश्छन्दः । प्रथमतृतीययोरेकाधिका । द्वितीयस्य द्व्यधिका । अश्विनौ सरस्वती । अत्रदशाधिकं शतमक्षराणि । तेन छन्दोनास्ति ।

अग्निनो ऽग्नयश्च ऋषिः । अत्र चतुर्दशाधिकं शतमक्षराणि । सरस्वतीं मेधयेत्यस्य, अत्र सप्तदशाधिकं शतमक्षराणि । इन्द्रश्चेत्यस्य । अत्र चतुर्दशाधिकं शतमक्षराणि ॥

४६ वनस्पतिमभियूपः ॥

होता यक्षद्वनस्पतिमभीत्यस्य यूपो देवता वनस्पतियागे प्रैषोऽयं । वनस्पतिमभि । अत्र द्वाभ्यामधिकं शतद्वयमक्षराणि ॥

४७ अग्निꣳ स्विष्टकृतꣳ स्विष्टकदग्निः ॥

होता यक्षदग्निꣳस्विष्टकृतमित्यस्य स्विष्टकदग्निर्देवता । अत्र सप्तसप्तत्यधिकं शतमक्षराणि । स्विष्टकृद्यागेप्रैषोऽयं । एतेषामग्निनो ऽग्नयेत्यादीनां स्विष्टकृत्प्रैषान्तानां छन्दोनास्ति, एकानत्रिंशत्परिमाणस्य छन्दसोऽभावात् । तदुक्तं यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यतइति ॥

देवं बर्हिरेकादशानुयाजप्रैषा अश्विसरस्वतीन्द्रदेवत्याः ॥

देवंबर्हिः सरस्वतीत्याद्या एकादशानुयाजप्रैषा अश्विसरस्वतीन्द्रदेवत्याः । अथापिनाकृत्य एव, बर्हिर्द्वारादयोदेवता नाग्नयादयइति हरिस्वामिनः । देवं बर्हिः । आर्षीत्रिष्टुप् । देवोर्द्वारः । द्वौ व्यूहौ । आर्षीत्रिष्टुप् । देवी उषासा आर्षीत्रिष्टुप् । दैवीऊर्जाहुती । अतिजगती । देवा देवानां । एकाधिका अतिजगती । देवीस्तिस्रः । आर्षीत्रिष्टुप् । देवऽइन्द्रः । द्वौ व्यूहौ अतिशक्करी । देवो देवै । व्यूहः । अत्यष्टिः । देवं बर्हिः । अतिशक्करी । देवोऽग्निः अष्टैकादशाधिकं शतमक्षराणि सन्ति तेन छन्दोनास्ति ॥

अग्निमद्य होतारमित्यस्य प्रैषो लिङ्गोक्तदेवतो लिङ्गोक्तदेवतः ॥

अग्निमग्नीधादित्यं सूक्तवाकस्य प्रैषो लिङ्गोक्ताग्निसरस्वत्यादिदेवताः, अग्निमग्नीधः । सूक्तवाकः । धृतिः । त्वामग्न । एकाधिकाकृतिः । अनियताक्षरो वाऽयं समस्तः प्रैषः । तेन छन्दसोऽभावः । अनियताक्षरत्वात् । द्विरभ्यासोऽध्यायसमाप्तिज्ञापनार्थः ॥ ४० ॥

इति चिरन्तिचिरंस्नाट्स्यर्षतिचिंशत्कृतुकृत्यमहायाज्ञिकश्रीमज्जापतिसूनुना याज्ञिकश्रीदेवकृते सर्वानुक्रमणिकाव्याख्याने द्वितीयोऽध्यायः समाप्तः ॥ २२

अथाश्वमेधः

अथानन्तरमश्वमेधः अभिधीयतइति शेषः ॥

चतुरोऽध्यायान्प्रजापतिरपश्यत् ॥

तेजोऽसि शुक्रमित्यस्य सौवर्णं निष्कं । तेजोऽसि शुक्रमित्यस्य सौवर्णं निष्कदेवता । दाने विनियोगः । प्राजापत्यानुष्टुप । देवस्य त्वेत्यस्य सामजगतीछन्दः । स्तुत्य । स्तोत्रादाने विनियोगः ॥

इमामगृभ्णंत्सुव्वत्सरो यज्ञपुरुषस्त्विष्टभम् ॥ २२

इमामगृभ्णन्नितीमामृच त्विष्टुभं सँव्वत्सरो यज्ञपुरुषश्चरिरपश्यत् दक्षनारैवत्येयमितिकण्डभाष्ये । अत्र तृतीयो दशकः । अभिधाऽसीत्यस्यार्षीत्रिष्टुप्छन्द अभिधा लिङ्गोक्तानि । अश्वबन्धने विनियोगः । अस्याश्वो देवता । ब्रह्मन्ब्रह्मन्वंभन्स्यामीत्यस्य प्राजापत्यानुष्टुप । ब्रह्मादेवता । ब्रह्मामन्त्रणे विनियोगः । तत्रबन्धाम । व्यूहेन ऋग्गायत्री अध्वर्युर्देवता । अश्वबन्धने विनियोगः । प्राजापत्ये । यजुस्त्रिष्टुप् । प्रजापतिर्देवता । इन्द्राग्निभ्यां । यजुः पङ्क्तिः । इन्द्राग्नीदेवता । वायवे त्वा । यजुर्बृहती । वायुर्देवता । विश्वेभ्यस्त्वा । सर्वेभ्यस्त्वा यजुर्जगत्यौ । विश्वेदेवा देवता सर्वे देवादेवताः । मेधे । प्राजापत्ये खेत्याहीनां प्रोक्षणे विनियोगः । अथवा एषां

पञ्चानां यजुषामग्नीदेवता ॥

योऽअर्वंतंगायत्र्यर्द्धनाग्नेस्तुतिः परो र्द्धौ लिङ्गोक्तः ॥

योऽअर्वन्तमिति गायत्री । अग्नेः पूर्वार्द्धेनाग्नेः स्तुतिः । तस्याग्नीदेवतेत्यर्थः । परो द्वितीयउत्तरोऽर्द्धो लिङ्गोक्तदेवतः । अथवा परइति परोमर्त्तइत्यस्यर्क्षौ लिङ्गोक्तदेवतः । अथ व्यूहः । योऽअर्वन्तमित्यर्द्धस्य वाचने विनियोगः । परोमर्तइत्यर्द्धस्य श्रुतोऽग्नेऽग्नेऽग्नेवं भावने ॥

अग्नये लिङ्गोक्तान्येव ॥

अग्नये स्वाहेत्यन्तानि यजूंषि लिङ्गोक्तान्येव अग्न्यादिदेवतानीत्यर्थः । होमे विनियोगः ॥

हिंकारायेत्यस्यैकान्नपञ्चाशच्चेष्टितानि ॥

हिंकारायेत्यादीनामेकान्नपञ्चाशत्संख्यानां यजुषां हिंकारहिंकृतादीन्येकान्नपञ्चाशत्संख्यान्यग्न्यचेष्टितानि क्रियाः अग्नेर्व्यापारा देवताः । दक्षिणाग्नौ प्रक्रमहोमे विनियोगः । अथास्यैतद्धिंकारादीनां छन्दांसि कथ्यन्ते । त्र्यक्षराणां देव्यनुष्टुप् चतुरक्षराणां देवीबृहती । पञ्चाक्षराणां देवीपङ्क्तिः । षडक्षराणां देवीत्रिष्टुप्, यजुर्गायत्री वा, सप्ताक्षराणां देवीजगती यजुरुष्णिग्वा । अष्टाक्षराणां यजुरनुष्टुप् । प्राजापत्या गायत्री वा । नवाक्षराणां यजुर्बृहती आसुरीजगती । दशाक्षराणां यजुः पङ्क्तिः । एकादशाक्षराणां यजुस्त्रिष्टुप् । द्वादशाक्षराणां यजुर्जगती । इति स्वाहान्तानां सर्वयजुषां छन्दः कथनप्रकारः । तत्सवितुरित्यस्य प्रागुक्तम् ॥

हिरण्यपाणिं पञ्चर्चं० सावित्रं गायत्रम् ॥

हिरण्यपाणिमूतयइत्यादिपञ्चर्चं सवितृदेवतं गायत्रीछन्दस्कं । सावित्रीमिष्टानान्तत्सवितुर्वरेण्यमित्यादिकाः याज्यानुवाक्याइति संहिताभाष्ये । दार्ति० सप्तिं सप्तकः । आसवं । व्यूहः ॥

आद्यां मेध तिथिः ॥

अग्निमग्नेर्वैश्वानरस्य मेधातिथिर्ऋषिरित्येतां मेधातिथिर्ऋषिरपश्यत् ॥

अग्निस्तोमेनाग्नेयं तृचं गायत्रं० सुतंभरो विश्वा- २२
मित्रो विरूपो यथासङ्ख्यम् ॥

अग्निꣳ स्तोमेनेत्यादिकं तृचमग्निदेवतं गायत्रीछन्दस्कं । अस्य तृचस्य यथासंख्यं सुतम्भरो विश्वामित्रो विरूप इत्येते त्रय ऋषयः । तत्राग्निस्तोमेनेतीमां सुतभरऋषिरपश्यत् । अग्निं दूतमितीमां विरूपोऽपश्यदितियथासङ्ख्यशब्दार्थः ॥

अजीजनो हि पवमानीं कृतिं पिपीलिकमध्या- २३
मनुष्टुभं ऋषयोऽपश्यन् ॥

अजीजनो हि पवमानेतीमामृचं पावमानीमजनन्नं पिपीलिकमध्याकृत्यनुष्टुपछन्दस्कां ऋषयो अपश्यतो यथाः प्रथमतृतीयौ पादौ द्वादशकौ द्वितीयोऽष्टकः सा पिपीलिकमध्याकृतिरनुष्टुप् । "मध्ये जागतावष्टकश्च कृतिर्मध्ये चेदष्टकः । पिपीलिकमध्येति वचनात्" । अत्र पूर्वमूनाकृतिपदानुवृत्तेरस्यामनुष्टुभः पिपीलिकमध्याकृतिरित्येषा सञ्ज्ञा । पावयति पवित्रंकरोतीति पावमानीनां तथा ॥

विभूरग्निर्देवतम् ॥ २३

विभूर्मात्रा इत्येतदग्निदेवतं । अग्नये दक्षिणे कर्णे जपे विनियोगः । अतिजगतीछन्दः ॥

देवा दैवम् ॥

देवा आगापालाइत्येतद्दैवं । देवदेवतं दक्षिणामादेशे विनियुक्तं । ऋगुष्णिक् ॥

इहरन्ति राग्नेयानि चत्वारि ॥

इहरन्तीत्यादीनि चत्वारि वर्जूंष्यग्निदेवत्यानि । धृतिहोमे विनियुक्तानि । प्रथमे इरन्तिः स्वाहा । यजुर्गायत्री । इहरमणा स्वाहा यजुरृषिक् । इह धृतिः स्वाहा । यजुर्गायत्री, इह स्वधृतिः स्वाहा । यजुरृषिक् ॥

० **कायौद्गभणानि लिङ्गोक्तानि ॥**

कायस्वाहेत्यादीन्यौद्गभणमन्त्राणि लिङ्गोक्तदेवतानि औद्गभणहोमे विनियुक्तानि । छन्दांसि तु प्रागुक्तानि ॥

२ **आब्रह्मँल्लिङ्गोक्तान्येवाध्यायात् ॥**

आब्रह्मन्निलित्यादीन्यध्यायपर्यंतानि लिङ्गोक्तदेवतान्येव । आब्रह्मन्नित्यस्य जपे विनियोगः । अयमष्टाधिक शतमन्त्राणि तेन दृष्ट्यधिका उक्तसंख्या । प्राणाय स्वाहेत्यादीनांसर्वेषांहोमे एषां छन्दांसि प्रागुक्तप्रकारेण कल्पनीयानि ॥ १ ॥

प्रजापतये प्राजापत्यम् ॥

प्रजापतये त्वा जुष्टमित्येतत्प्राजापतिदेवतं । एकाधिकाऽनुष्टुप्गायत्री । हिरण्यगर्भइत्यस्य ऋष्यादिकं प्रागुक्तम् । महिम्नो ग्रहणे तस्य विनियोगोऽस्य च । एषतइत्यस्य । यजुस्त्रिष्टुप् । सादने विनियोगः ॥

यस्ते दैवम् ॥

यस्ते हरसँवत्सरइत्येतद्दैवं । देवदैवतं । होमे विनियुक्तं दृष्ट्यधिका शक्वरी । द्वाभ्यां अतिशक्वरी वा ॥

3 **यः प्राणतस्त्रिष्टुक्कायो हिरण्यगर्भः ॥**

यः प्राणतो निमिषतइतीयं त्रिष्टुप्छन्दस्का कायी । कादेवता यस्याः सा कायी । हिरण्यगर्भस्य ऋषेः आर्षं । हिरण्यगर्भोऽस्यामग्नाविति-त्यर्थः । तृतीया द्वादशकः । उत्तरस्य महिम्नो ग्रहणेऽस्या विनियो-

गः । अपापि प्रजापतये प्राजापत्यं । औपवसथ्या एकाधिका षड्गायत्रीछन्दः । एव तरति यजुर्जगती, यज्ञे यज्ञो वृत्यधिकावतिजगती वा । व्यूढाभ्यामष्टिर्वा ॥

युञ्जन्ति ब्रध्नमित्यादित्यदैवत्यां गायत्रीम् ॥ २३-१

युञ्जन्ति ब्रध्नमित्यादित्यदैवत्यां गायत्रीं प्रथमच्छन्दाऽभिरत्नम् । अश्वमेधजने विनियोगोऽस्याः ॥

युञ्जन्त्यस्त्रा स्तुतिः ॥ २३

युञ्जन्त्यस्त्रा काम्येतीयमस्तुतिः । इयमपि गायत्री आद्यः पादः षट्कः । तथा व्यूढा । पूर्वसूक्तादृगायत्रीमनुवर्त्तते । इतराश्वमेधजने विनियोगोऽस्याः ॥

बृहती बृहती ॥ २३-

अस्तुतिरिति वर्त्तते । बृहती अपरास्या बृहतीछन्दः । व्यूढेन छन्दः पूरयं, वाचने चास्या विनियोगः ॥

वसवस्त्वा खिष्टकृतानि ॥ २३-

वसवस्त्वाऽजन्नित्यादीनि खिष्टकृद्देवतानि । अश्वमेधजने विनियुक्तानि । वसवस्त्वा आसुर्यनुष्टुप्, रुद्रास्त्वा यजुःखिष्टुप् । आदित्यास्त्वा । आसुर्यनुष्टुप्, । अग्नेस्य केसरपुष्केषु गिरीशीषापुच्छरोमसु क्लमेषु पक्षीनां शीर्षपक्षिप्रवर्त्तये विनियोगः ॥

लाजीऽनग्नेदेवत्याम् ॥

लाजीऽक्षाचीऽग्निसंदृग्देवतं, त्रैष्टुभं, जगत्यनुष्टुभौ वा अश्वमेधराजिसूयसमर्पणे विनियोगः ॥

वाः खिष्टकृत्स्त्रीऽनुष्टुभः प्रश्नप्रतिप्रश्नभूता ब्रह्मोद्यो हौतुर्ब्रह्मणश्च ॥

ब्रह्मोद्यसंज्ञे द्वे कर्मणि हौतुर्ब्रह्मणश्च प्रश्नप्रतिप्रश्नभूताः ।

कैलावपर्म, चोरासौदित्यमयोव्यूहः ॥

वायुष्ट्वा लिङ्गोक्तानि ॥

वायुष्ट्वेत्यादीनि लिङ्गोक्तानि । अग्नवदेवतामौत्यर्कः । वायुरादेवतानि वा । वायुष्ट्वा व्यूहेन संवृतो । एष ते रुद्र भागः सौरुद्रीप्रयमे । ब्रह्मा ऋषिः प्राजापत्यानायजी । नमोऽग्नये देवीबृहती अग्नवप्रोक्षणे एषां विनियोगः ॥

सर्ठ०श्रितस्त्रिस्त्रोऽग्नवदेवत्या अनुष्टुविराड्त्रिष्टुभः ॥

सर्ठ०श्रितो रश्मिनेत्याद्यास्तिस्त्रोऽनुष्टुभोऽग्नवदेवत्याः, एषामनुष्टुविराड्त्रिष्टुभो भवन्ति । अग्नवप्रोक्षणेषु एव विनियुक्ताः । अग्नु अग्नवप्रोक्षणादिति व्यूहः । संश्रितो रश्मिनेति अनुष्टुप् । स्वयं वाजिनिति विराट् । दृश्यकास्त्वयाविराडित्येतल्लक्षणयुक्तत्वात् । ज्ञ वादृति त्रिष्टुप् । अ वाजपतीयौ द्वादशको तेन दृश्यधिका ॥

अग्निः पशुरात्मानि चोणि ॥

अग्निः पशुरित्यादीनि चोणि यजूंषि अग्नीषोमवदेवत्यानि अग्नीषोमप्रक्षणे विनियुक्तानि । आर्षीपङ्क्तिः, प्राचावेत्यादीनानुष्टुभं । अच सञ्ज्ञमे परेषमक्षयोर्हीमानक्रमाज्याकृतिषयकोमे विनियोगः ॥

अम्बेऽनुष्टुबम्बस्तुतिः ॥

अम्बेऽम्बिके इतीयमनुष्टुपछन्दस्का अम्बस्तुतिः । अम्बैवाम्बा । अम्बेदेवता । अम्ब व्यूहः । पत्नीनां वाक्ने विनियोगः ॥

गणानां त्वा चत्वारि लिङ्गोक्तानि ॥

गणानां त्वा गणपतिमित्यादीनि चत्वारि यजूंषि लिङ्गोक्तदेवतानि अनुष्टुबादिच्छन्दस्कानि । अया वामपि वसो ममेति अया वामपि श्रेयो ज्ञेयं । पत्नीनामग्नवपरिणयनेषु विनियोगः क्रमेण । चाहुमन्त्राणि हुवा षड्भिः । मह्यमाग्नवसमीपे प्रयत्ने विनियोगः । स्वर्गं लोके

प्राजापत्यानुष्टुभौ । अध्वर्योर्देवयजनमसीत्यस्य विश्वामित्र ऋषिः । वृषा वाजीत्यस्य यज्ञो गायत्री छन्दः । अग्निर्देवता । मध्विनामग्नयेऽग्निचयनेऽग्नौ विनियोगः ॥ २ ॥

उरुप्रथा गायत्र्यग्नी ॥(१) 23-

उरुप्रथा भवेतीयमग्नेर्देवता गायत्रीछन्दस्का शेषाद्यो नवकः यजमानस्याग्नावग्नेयेऽग्नौ विनियुक्ता ॥

एकादशर्चमानुष्टुभम् ॥

द्वितीया तूपरिष्टाद्वृहत्यध्वर्यवादीनां कुमार्यादिभिरश्लीलभाषणान्वा एव देवताः ॥

यकारसको प्रकृन्तिकेत्यादि दशर्चमनुष्टुपछन्दस्कं तच्च दशर्चं द्वितीया सा, यकारसको प्रकृन्तवश्चेयं तूपरिष्टाद्बृहती षट्यंगदक्षरत्वात्, अन्त्या नवानुष्टुभः । कीदृशं दशर्चं । अध्वर्वादीनां कुमार्यादिभिः सहाश्लीलभाषणं । अश्लीलं नाम्यं । स्त्रीपुरुषसंयोगकालीनयोनिशिश्नादिभाषणं यत्तदादि भाष्यते निर्लज्जप्रकटीक्रियते येन दशर्चेन । तत्तथा । अनेन हि दशर्चेनाध्वर्युब्रह्मोद्गातृहोतृप्रस्तोतारः, यजमानकुमारीपत्नीभिः सह एवं विधमश्लीलं संभाषं कुर्वंति ता एव देवताः, अस्य दशर्चस्य ता अध्वर्युकुमार्यादय एव ता देवताः । यकारसको अस्य लक्षीव. संज्ञकः । तेनैकाना । यदेवा व्यूढ । यूद्रा यत् । समक. ॥

दधिक्राव्णो दधिक्रावा कामदेव्यः सुरभिमतीमनुष्टुभमाग्नेयीम् ॥

दधिक्रावण्णोऽकारषमित्यस्यामृचि सुरभिमतीं सुरभिशब्दयुक्तामनुष्टुभं यज्ञदेवत्यां वामदेवपुत्रो दधिक्रावा ऋषिरवधत्त । अध्वर्वादी-

(१)आग्नेयीत्येतत् 'क' पुस्तकपाठः ॥

नामुचारवे विनियोगः । अन्ना: सुरभिमतीत्येवमृचा ॥

३ गायत्री षड्वृचमाश्वम् ॥(१)

गायत्रीत्रिष्टुबित्येतत्षड्वृचाश्वं यज्ञदेवतं । त्रिष्टुभौ यज्ञायज्ञीयमृक्सहस्रीये कूचीभिर्याज्यानुवाक्ये विनियुक्ते । अस्मिन्नश्वमेधे आद्या गायत्री त्रिष्टुबित्येषा तृचोऽनुष्टुभो-ऽन्त्यात्रिष्टुप् । अस्मिन्नश्वमेधे आद्या गायत्रीत्रिष्टुबित्येषा तृचोऽनुष्टुभ । तत्परावतस्रोऽनुष्टुभः, द्विपदायाः महानाम्न्यः । नार्यस्ते, दक्षता हरि-णीत्येताः, अन्त्या कुविदङ्गेत्येषा त्रिष्टुप् । अक्रूचीभिः । महानाम्न्यः । सेधीः । नार्यस्ते, देवानां । एतेषु व्यूहः । यज्ञादाक्षीति व्यूहेन दशकः ॥

४ कस्त्वाषड्वृचमाश्वम् ॥

कस्त्वाच्छ्यङ्गीत्येतत्षड्वृचमश्वदेवतं । अश्वकिशासने विनियुक्तम् ॥

आद्या गायत्री ॥

यच्चतस्रोऽनुष्टुभः अस्मिन्षड्वृचे आद्या कस्त्वेत्येषा गायत्री, चतस्रस्ते, अ-र्धमासाः, देव्याऽध्वर्यवः, ओक्ये । अक्रे, इत्येताः पञ्चऋचोऽनुष्टुभः । कस्त्वेति नवकः तेनैकाधिका । चतस्रस्ते आद्य प्रथमो नवकः । अ-न्त्यः सप्तकः । देवस्य प्रथमे व्यूहः । तृतीये सप्त । अक्रे । द्वितीये द्वौ व्यूहौ । तृतीये चतुर्थे चैकः ॥

४२ कः स्विदेकाकी यज्ञोयत्रं० होचाकीनां प्रश्नप्रति-प्रश्नभूतं, आद्याश्चतस्रोऽनुष्टुभः कःस्विदाद्याश्चतस्रश्चान्त्या दश त्रिष्टुभः ॥

अस्मिन्दशर्चे आद्याश्चतस्रोऽनुष्टुभः । कः स्विदेकाकी, सूर्य एकाकी । किंस्विदासीत्पूर्वसमं । ब्रह्मभूमसमभित्यनाः । तथा । काःस्विदा-

(१) उष्णिगाद्या चतस्रोऽनुष्टुभोऽन्त्या त्रिष्टुप् । इत्यधिकः काण्वसर्वानुक्रमे पाठः ॥

क्षीत् । क्षीरक्षीत् । क्षारे, क्षारे दक्षिणाक्षतक्षीरक्षुभः । अ-
क्षाक्षाक्षतगङ्गकव्यतिरिक्ता दश ऋचोऽनुष्टुभः । तासु, पृच्छामि त्वा
चितये । अपि तेषु । केवलः, पञ्चमस्य । अक्षरम् । ओषधयः ।
वेद्याम् । मृच्छामि त्वा, इयं वेदिरित्येतत् । अथ किम्नामधनं,
येषु विष्णुः । ऋषि तै षु । केवलः । व्याप्तः । एतेषु व्यूढः । किं खि-
त् । दो व्यूहे । व्याप्तः । कमाक्षया । अजारे । कस्मै । को दा-
धार, कः सूर्यस्य छदयत् । को वेद दृश्यः । पृच्छामि वाचः । अयं
यज्ञः । ब्रह्माऽयं । एतेषु व्यूढ ॥

सुभूरनुष्टुब्लिङ्गोक्तदेवता ॥ २३—६३

सुभूः स्वयम्भूरितीयमनुष्टुब्लिङ्गोक्तदेवता । पूर्वस्य महिम्न पुरो-
नुवाक्या । उत्तरमहिम्नो याज्या च । द्वितीये व्यूहे, लिङ्गोक्तश्च
प्रजापतिर्देवता ॥

होता यक्षत्प्राजापत्यः प्रैषः ॥ २३—६४

होता यक्षत्प्रजापतिमित्यस्य प्रजापतिर्देवता, महिम्न प्रैषः । दृश्यधि-
का आर्षीगायत्री । व्यूहेन ऋग्बृहती वा ॥

प्रजापते हिरण्यगर्भः प्राजापत्यं त्रिष्टुभम् ॥ २३—

प्रजापते न त्वदिदेतासुचं प्राजापतिदेवतां त्रिष्टुभं हिरण्यगर्भ
ऋषिरपश्यत् । इयं पूर्वस्य महिम्नो याज्या । उत्तरस्य पुरोऽनुवाक्या
च । अचार्यान्त्ययोर्व्यूहः ॥ ३ ॥

अक्षस्तूपरहित्याद्यः पञ्चदशो ध्यायेनोक्ता देवता वा
पर्यङ्ग्याः ॥

अक्षस्तूपरहितेनाध्यायेनाक्षस्तूपरादयः पञ्चदशपर्यायाः पर्यङ्ग्याः
प्रजाः पशवः उक्ता देवता वा । का चार्थः, तेषामक्षस्तूपरादीनां पर्यङ्ग्या
यां देवतायामजापत्यस्यादय उक्ताः । अक्षस्तूपरादयः पञ्चदशपशवः प-

यैस्मादेवमस्मात् । "एवः मन्त्रः वा एते यद्वदन्ति सर्वेभ्यः पयसो मन्त्रीतिः" श्रवणात् ॥

तथा सेहितहृद्यो गुग्गुलुताः ॥

यथावत्सुता इति चानुवर्तते । तथा गुग्गुलुताः, सेहितो धूम्रसेहितहृद्यादीनां रक्तत्वादिगुणवन्तः मन्त्रवर्णे देवतात्वोक्ताः ॥

आरण्याश्च कपिञ्जलादय आऽध्यायात् ॥

चकारेण पशवो देवतात्वोक्तत्वमुच्यते । वसन्ताय कपिञ्जलानित्येवमादिना, आरण्या अरण्ये भवाः कपिञ्जलादिपशवस्तद्देवतात्वोक्ताः, आमध्यायादध्यायसमाप्तिं यावत् ॥

आदन्दृभिरित्यादित्वगित्येतदन्तं द्रव्यदेवतमुक्तम् ॥

आदंदृभिरित्यतआरभ्य त्वगित्येतदन्तं पृथिवी त्वचेत्येतत्पर्यन्तं द्रव्यदेवतमुक्तं । द्रव्याणि च देवताश्च द्रव्यदेवतम् ॥

अश्वत्तूपरो ब्राह्मणोऽध्यायः ॥

अश्वत्तूपरइत्यमध्यायो ब्राह्मणरूपः । द्रव्यदेवतसंयोगविधायकत्वात् न तु मन्त्ररूपत्वात् ॥

आदन्दृभिस्त्वचान्तम् ॥

पृथिवीं त्वचेत्येतत्पर्यन्तः आदन्दृभिरित्ययमध्यायो विधायकं ब्राह्मणमेव । न मन्त्रः ॥

जुषकाय याकणीं द्विपदां मुष्टिभक्तौदन्यः

जुषकाय स्वाहेतीमां याकणदेवत्यां द्विपदां औदन्यदन्नपूर्णोमुष्टिभक्तविरण्मयत् । हे पदे यस्याः सा द्विपदा, अन्नं, तस्य पिङ्गलखलतिविक्षिप्तशुक्लस्य मूर्ध्नि होमोऽस्या विनियोगः । यजुर्गीयत्वी । अस्या एव विनियोगान्तरमाह ॥

एषा चाघनाशिन्यन्तर्जले ॥

जुवकाय स्वाहेत्येषा हिरण्यगर्भे उदेयमधे अन्ना सती अघ-
मशनो पापनाशनी । तथा च श्रुतिः । जुम्बको नाम गायत्री वै-
दे वाजसनेयके, अन्तर्जलेसजप्ता वृद्धहत्या अपोहतीति । हिरण्य-
गर्भः, यः प्राचेतसत्वजमयोरार्षादि प्रागुक्ता अतः प्रजापतिप्राजापत्यपशू
नामग्न्वादीनामेता याज्यानुवाक्या इतिसंहिताभाष्ये ॥

**यस्येमे काण्यौ त्रिष्टुभौ हिरण्यगर्भः प्राजापत्यऋषि-
रपश्यत् ॥**

यस्येमे । यस्येमाः, यस्य छाया, एतेषु व्यूहः ॥

आनो दशर्चं जागतं वैश्वदेवं गोतमः ॥

आनो भद्राइत्यादि दशर्चं जगतीछन्दस्कं विश्वदेवदेवतं गोत-
मऋषिरपश्यत । जागतमित्यस्यापवादमाह ॥

स्वस्ति नो विराट्स्थाना ॥

स्वस्ति नइन्द्रइतीयमृक् विराट्स्थाना । न जगतीनवको वैराज
स्त्रैष्टुभस्त्रैतत्रयाणामुत्तमा । पुनरपि जागतमित्यस्यापवादमाह ॥

भद्रं कर्णेभिरित्यृचं त्रैष्टुभम् ।

भद्रं कर्णेभिरित्येतदृचं त्रिष्टुप्छन्दस्कं । न जागतं । अस्य भद्र-
व्यासएकादशकः । तस्मात । व्यूहेनैकादशकः । तदृग्विना व्यूहः ।
रक्षिता पायुः । व्यूहः । स्वस्तिनो बृहस्पतिः । व्यूहेन त्रैष्टुभः । भद्रं
पश्येम । व्यूहः । आनो भद्राइत्याद्या वैश्वदेवपशव्यायुषेडाश्वपशू-
नां याज्यानुवाक्या इति संहिताभाष्ये ॥

**मानोऽग्नस्तोमीयं दीर्घतमास्त्रैष्टुभं (१)द्वाविंठ•त्यृ-
चमग्नस्तुतिः ॥**

---

(१) द्वाविंशतेरग्ने षोडशीचमिति काण्वसर्वानुक्रमणीपाठः ॥

अग्नये त्वा वसुमते रुद्रवते त्वा त्रिष्टुबनुष्टुभौ पञ्चदशस्तोमौ त्रयस्त्रिंशौ वैराजौ दीक्षितमाहवनीयेऽभिषुण्वन्ति । प्रवर्ग्यः । अग्नौ क्रयमाणे । सोमाय त्वा वनस्पतये देवता । आज्याहुतिर्होमे विनियोगः । अन्यत्सर्वमग्नये वसुमते रुद्रवते त्वेत्यादौ संव्यवहारार्थम् ॥

तृतीयाषष्ठ्यौ जमत्यौ ॥

अग्निमन्दाग्निमत्यृचेऽग्नस्तोमीये एष छागो, यूपवत्स्कन्दत्येवं । तृतीयाषष्ठ्यौ जमत्यौ, अथ । प्रवक्ष्यामः । सुपाङ्क्तः । व्यूहः । पूष्णो भागो व्यूहेन द्वादशकः । ये चार्वते व्यूहेन द्वादशकः । यद्वाजिनो द्वादशकः । सर्वा तासे व्यूहः । अभिशूलं द्वादशकः, ये चार्वतरति ह्रीं द्वादशकौ । तं देवासः व्यूहः, निक्रमणं द्वादशकः । यच्चाष्टकः । सर्वातासे व्यूहः । अधीवासं व्यूहः । सन्धानं नवकः । प्रियां व्यूहेन दशकः । पाप्मन्यां वा । व्यूहः । एकस्त्वष्टुः, ताता पिण्डानां, । छिद्रा, । व्यूहः, नवा उ द्वादशकः । सुगव्यं नः, पुत्रां ३ ॥ इति, व्यूहः ॥

इमा नु कं भुवनेति द्विपदं द्विपदाछन्दस्कं विश्वदेवदैवतं ऋचं भावनपुत्रो भुवनो वा, अथ वा भुवनपुत्र साधनो वा अपश्यत् । भौवनश्चाप्त्यो वेति कश्चित्पाठः, तत्र भुवनस्य पुत्रश्चाप्त्यश्चेति चार्थः । द्विपदा उत्तमा जुहोतीत्यत्र होमे विनियोगः । अग्ने त्वं नइत्यादीनां तु पूर्वमेव सर्वमुक्तं । आसामन्यत्रैव पूर्वसूक्तहोमे विनियोगः, समाप्तो ज्योतिष्टोमः ॥ ५ ॥

अग्निश्च सप्त लिङ्गोक्तानि ॥

अग्निश्च पृथिवी चेत्यादीनि सप्तयजूंषि लिङ्गोक्तदेवतानि । अथ

ऋषिर्विश्वानीव भव्यस्यानुज्ञात्वात् । विश्वान्तु । आदित्यः "आदित्वा-नीमानि शुक्राणि यजूंषीति" श्रवणात् । याज्ञवल्क्यो वा । याज्ञवल्क्यो गार्ग्यायन्तइति श्रुतेः । खिलमन्त्रा एते । ऋषिर्विनियोगानुक्तेः । अ-ग्निरेति चतस्रो ऋग्गायत्र्यः । सप्त सप्तं सदः । आसुर्यनुष्टुप् । स कामान् । प्राजापत्यानुष्टुप् । अष्टमम् । व्यूहेन ब्राह्मीगायत्री ॥

प्रियो देवानां लौगाक्षिरनुष्टुभमनवसानाम् ॥

प्रियो देवानां दक्षिणाया,इतीमामृचं अवसानवर्जितं । अनुष्टुभं लौगाक्षिर्ऋषिरपश्यत् । व्यूहेन छन्दः पूरणम् ॥

बृहस्पते गृत्समदो ब्राह्मीं त्रिष्टुभम् ॥

बृहस्पते अतियदर्यइतीमामृचं ब्रह्मदेवत्यां त्रिष्टुभं गृत्समदऋ-षिरपश्यत् । बृहस्पते सवे बार्हस्पते सवे बार्हस्पत्यग्रहेऽस्याः सोप-यामाया विनियोगः । उपयाम । आसुरी अनुष्टुप् । एष ते योनिः। यजुस्त्रिष्टुप् । सादने विनि० ॥

इन्द्रगोमन्नैन्द्र्यौ गायत्र्यौ रम्याक्षिः ॥ (१)

इन्द्रगोमन्निन्द्रायाहीत्येते ऋचौ इन्द्रदेवत्ये गायत्र्यौ रम्याक्षिर्ऋ-षिरपश्यत् । इन्द्रायाहि । व्यूहः । गोसवे यज्ञे ग्रहणेऽनयोः सोप-यामयोर्विनियोगइतिसंहिताभाष्ये । उपयामश्चासुर्युष्णिक् । एष ते । यजुर्जगती ॥

ऋतावानं प्रादुराक्षिर्वैश्वानरीयाम् ॥ (२)

गायत्रीमित्यनुवर्त्तते । ऋतावानं वैश्वानरमितीमामृचं गायत्रीं वैश्वानरदेवतां प्रादुराक्षिर्ऋषिरपश्यत् । उपयाम । सामोष्णिक् । ए-

(१) ऐन्द्रा गायत्रीति काण्वसर्वानुक्रमपाठः ॥

(२) वैश्वानरीये गायत्र्यौ, इति च काण्वसर्वानुक्रमपाठो बोध्यः ॥

(३) एतस्यामे वैश्वानरो नो गायत्री वसिष्ठभरद्वाजः इति काण्वसर्वानुक्रमेऽधिकः पाठो ज्ञेयः ॥

ष ते । यजुस्त्रिष्टुप् ॥

वैश्वानरस्य त्रिष्टुभं कुत्सः ॥ (१)

वैश्वानरस्य सुमतावित्येतामृचं वैश्वानरदेवतां त्रिष्टुभं कुत्सऋषिरपश्यत् । अन्त्यांत्ययोर्व्यूहः । यजुषोः पूर्वमूचवत् ॥

अग्निर्ऋषिराग्नेयीं गायत्रीं वसिष्ठभरद्वाजौ ॥

अग्निर्ऋषिरितीमामृचं अग्निदेवतां गायत्रीं वसिष्ठभरद्वाजावृषी अपश्यताम् । यजुषोः प्रागुक्तम् ॥

महाँऽइन्द्रो माहेन्द्रीं वसिष्ठः ॥

गायत्रीमित्यनुवर्त्तते । महाँऽइन्द्रो वज्रहस्ताऽतीमामृचं महेन्द्रदेवतां । गायत्रीछन्दस्कां वसिष्ठऋषिरपश्यत । यजुषोः प्रागुक्तम् ॥

तं वऽऐन्द्रीं पथ्याबृहतीं नोधागोतमः ॥

तं वो दस्ममितीमामृचं इन्द्रदेवत्यां पथ्याबृहतीं । नोधागोतमोऽपश्यत् । जपस्वाध्यायादिषु विनियोगः ॥

यद्वाहिष्ठं वसूयव आग्नेयीमनुष्टुभम् ॥

यद्वाहिष्ठमितीमामृचमग्निदेवत्यामनुष्टुभं वसूयवऋषयोऽपश्यन् । अन्त्ययोर्व्यूहः ॥

एष्टि भरद्वाजो गायत्रीम् ॥

आग्नेयीमित्यनुवर्त्तते । एष्टूषु ब्रवाणि ते इतीमामृचं गायत्रीछन्दस्कं भरद्वाजऋषिरपश्यत् । एष्टूषु व्यूहः ॥

ऋतवस्ते बृहती ॥

आग्नेयीत्यनुवर्त्तते । ऋतवस्ते यज्ञमितीयमृगग्निदेवत्या बृह-

---

(१) महत्त्वान्महत्त्वेन्द्रो त्रिष्टुबिति काण्वसर्वानुक्रमेऽधिकः पाठः । एतत्सूत्रात्रे महाँ इन्द्रस्ततोऽग्निर्ऋषिरिति पूर्वापरीभावेन सूत्रे वेदितव्ये काण्वसर्वानुक्रमे । एतदग्रे सूत्रषट्कं काण्वसर्वानुक्रमे नास्तीतिबोध्यम् ॥

तीछन्दस्का नवकाष्टकैकादशाष्टिनो विषमपदेत्येषा इयं बृहती, अत्र तु प्रथमः पादो दशकः । तेनैकाधिका ॥

उपह्वरे वत्सः ॥

उपह्वरे गिरीणामितीमामृचं वत्सऋषिरपश्यत् । अस्याः सोमोदेवतेति संहिताभाष्ये । गायत्रीछन्दः । अनुक्रान्तां गायत्रमितिवचनभाष्यमूचात् । अत्रार्थौ समकौ ॥ ६ ॥

उद्वा ते गायत्रं तृचꣳ सौम्यमामहीयवः ॥

उद्वा ते जातं । स न इन्द्राय । एना विश्वानीत्येतत्तृचं सोममदेवतं गायत्रीछन्दस्कं आमहीयवऋषिरपश्यत् । दिवि सत् । वसुभया एनां । द्युम्नानि । एषु ब्रूहः । द्युम्नानीत्यत्र नाशब्दस्याभ्यासेन पूरणं । इति छन्दोग्रन्थे ॥

अनुवीरेमुद्गलो यज्ञपुरुषस्त्रिष्टुभम् ॥ (१)

अनुवीरेरित्येतामृचं त्रिष्टुप्छन्दस्कां मुद्गलो यज्ञपुरुषऋषिरपश्यत् । आग्नीध्रियं देवादेवताः । द्वितीयो दशकः । तृतीयो द्वादशकः ॥

अग्ने पत्नीर्मेधातिथिराग्नेयीं गायत्रीम् ॥

अग्ने पत्नीरितीमामृचं अग्निदेवतां गायत्रीं मेधातिथिरपश्यत् । अग्ने पत्नीरित्याद्याः पञ्चाग्निष्टोमे नेष्टुर्याज्याः । प्रथमा प्रातःसवने नेष्टृचमसयागे याज्या ॥

अभियज्ञं दृष्यृचमनुदैवतं मेधातिथिः ॥

अभियज्ञं । दृषिषदा इत्येतत् दृष्यृचमनुदैवतं मेधातिथिऋषिरपश्यत् । अतएतदपि गायत्रीछन्दस्कं । अनुक्रान्तां गायत्रमितिमू-

(१) मौद्गलो इति काण्वसर्वानुक्रमपाठः । एतत्सूत्राग्रे गायत्रीष्टुभ वसिष्ठऐन्द्रीमाशिषम् । इतिपाठः । एतदग्रे सूत्रषट्कं नास्ति काण्वसर्वानुक्रमे ॥

यात् । अनावृदिति सवक्रः । स्वर्ण ह्रोति सस्क्रः । नैनाश्वरयूर्तिः, अ-
स्य दृष्यवस्य ऋतुयागे नेष्टुर्याज्यात्वेन विनियोगः ॥

तवायमैन्द्रो विष्टुभं विश्वामित्रः ॥

तवायमितीमामिन्द्रदेवतां विष्टुभं विश्वामित्रोऽपश्यत् । माध्यं-
दिने सवने नेष्टृचमसयागे याज्या । तवायं । ह्रो व्यूहो । अस्मिन्य-
ज्ञे व्यूहः ॥

अमेव नो जगती गृत्समदः ॥

अमेव नदतीमामृचं जगती गृत्समदोऽपश्यत् । लिङ्गादियं त्वष्टृदे-
वत्या । तृतीयसवने नेष्टृचमसयागे याज्या ॥

स्वादिष्ठया मधुकृन्दाः सौम्यौ ॥

स्वादिष्ठया, रक्षोहा विश्वचर्षणिरितीमे ऋचौ सोमदेवत्ये मधुछ-
न्दाऋषिरपश्यत् । अनयोर्गायत्रीछन्दः ॥

अनुक्तानां गायत्रम् ॥

स्वादिष्ठया, रक्षोहा । उपह्वरे । अभियज्ञं । द्रविणोदा इत्यादी-
नामनुक्तानामनुक्तछन्दस्कानां गायत्रंछन्दो ज्ञेयं । अनेनैवमर्वाक् सि-
द्धेविन्द्रागीमवेन्द्रयो गायत्र्यो,अग्निर्ऋषिराग्नेयी गायत्रीमित्यादौ गा-
यत्रीग्रहणं पुनरुक्तमेव ॥ ७ ॥

समास्त्वाऽऽग्निकोऽध्यायः प्रजापतेरार्षम् ॥

समास्त्वाग्नऽऋतवऽइत्ययमाग्निकोऽध्यायः अग्निरिष्टकाचित. प-
श्चितिकः स्थलः । अग्नेः सम्बन्धी आग्निकः । प्रजापतिरार्षं । प्र-
जापतिरस्याध्यायस्य ऋषिरित्यर्थः । एतच्चपुनरुक्तं । आग्निक-
त्वेनैवाध्यायस्य सिद्धेः । अथाग्निं प्रजापतिरपश्यदिति व्यवहितत्वेन
तस्यैव स्मरणार्थमिति न दोषः ॥

सामिधेन्यो नवाग्नेय्यस्त्रिष्टुभोऽग्निना दृष्टाः ॥

अग्निरध्याये समाख्याग्नदृत्याद्या नव ऋचोऽग्निदेवत्याश्चिष्टुभोऽग्निना ऋषिणा दृष्टाः। अग्निं प्रजात्य सएना अपश्यत्, समाख्याऽग्नऽऋतवो वर्द्धयंत्विति। तथा ता आग्नेय्यः प्राजापत्या "यदग्निरपश्यत्तेनाग्नेय्योयत्प्रजापतीर्ठ० समैधते न प्राजापत्याइति च श्रुतेः"। दृष्टकापशौ समिध्यमानसमिदित्योरन्तराले आसां विनियोगः॥

अग्निर्ऋषिः कर्मीङ्गभूतमग्निं स्तौति॥

अवाध्याये प्राक्पीवोऽग्नारविहधदृत्येतस्मात्। ऋषिरग्निः कर्माङ्गभूतमग्निं स्तौति॥

जदूर्ध्वा हादग्यर्चमाप्रियमौष्णिहं विषमपदं प्राजापत्यमाग्नेयमग्निरपश्यत्॥

जदूर्ध्वाऽभ्यत्येतदृहादग्यर्चं आप्रीसञ्ज्ञं उष्णिक्छन्दस्कं विषमपदं प्राजापतिदेवतमग्निदेवतं चाग्निर्ऋषिरपश्यत्। विषमाऽनियताक्षराः पादा यस्य तद्विषमपदं। हादग्याप्रिय इति स एता अपश्यदृदृर्ष्टाऽस्य समिधोभवन्ति। तथा ता आग्नेय्यः प्राजापत्या यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतिमाप्रीणात्तेन प्राजापत्यास्ता विषमा विषमपदा विषमाक्षरा, "विषमाणि हि छन्दाठ०सीति श्रुतेः"दृष्टकापशौ प्रयाजयाज्याएताः। नत्वाग्नेयं चैत्यकं प्राजापत्यमित्यतआह॥

अग्निर्हि प्रजापतित्वेन संस्तूयते तेन प्राजापत्यम्॥

हि यतः कारणादग्निरत्र प्रजापतित्वेन प्रजापतिरूपेण संस्तूयते। तेनैतदृहादग्यर्चं प्राजापत्यं। "प्रजापतिरग्निरित्यादिश्रुतेः"। अथ खेगये हौ व्यूहौ, मा त्वा, निग्रभणग्नुपसत्ता हादग्यकौ। तथापीयं त्रिष्टुबेव न जगती। कुतः। हौ तु जागतौ यस्याः सा जागती, "हौ जागते जगती चेष्टुभौ त्रिष्टुबिति श्रुतेः"। अचेष्टाग्ने, सजातानां, हाद

शक्वरः । अतिनिहोऽष्टकः । अत्यचितिं । व्यूह, विश्वाङ्गग्ने व्यूहः । अनाधृष्यः, अत्र द्वितीयएकादशकः, अन्ये द्वादशकाः, बृहस्पते द्वादशकः । जादृर्ध्वाऽत्यत्र तु विषमाक्षरत्वं विषमपदत्वं चाक्रमेव ॥

पीवोऽअन्ना हे वायव्यत्रिष्टुभौ वसिष्ठः ॥ (१)

पीवोऽअन्नारयिवृधः, रायेनु, इत्येते हे वायुदेवते त्रिष्टुभौ वसिष्ठऋषिरपश्यत् । अथैतं वायवे नियुत्वते शुक्लं तूपरमालभते इत्यस्य यशो, पीवोऽअन्नारयिवृधइत्याद्याः षड्याज्याऽनुवाक्या वपापुरोडाशयशूनां क्रमेण भवन्तीति संहितामाथे, विश्वेश्वरः, व्यूहः ॥

आपो ह हे प्राजापत्ये हिरण्यगर्भः प्राजापत्यः ॥ (२)

त्रिष्टुभावित्यनुवर्त्तते । आपो ह,यच्चिदापइतीमे हे ऋचौ प्राजापतिदेवते त्रिष्टुभौ, प्रजापतेरपत्यं हिरण्यगर्भऋषिरपश्यत् । ततो देवानां । त्रयोदशकः तेन दृश्यधिका ॥

प्रयाभिर्हे वायव्ये वसिष्ठः ॥ (३)

त्रिष्टुभावित्यनुवर्त्तते प्रयाभिर्यासि । आनो नियुद्भिरितीमे हे ऋचौ वायव्ये वायुदेवत्ये त्रिष्टुभौ गृत्समदऋषिरपश्यत् । प्रयाभिः, नियुतः । व्यूहः । आनो द्वादशकः । यूयं पात । व्यूहः ॥

नियुत्वान्वायव्याः षट् ॥

नियुत्वान्वायवागह्नीत्याद्याः षड्ऋचो वायुदेवताः ॥

वायो शुक्रोऽनुष्टुप् ॥

(१) काण्वसर्वानुक्रमे वायव्यपदमत्रसूत्रे नास्ति । एतदर्थे वायुरर्थेण गायत्री इति काण्वसर्वानुक्रमे पाठो बोध्यः ॥

(२) प्रयाभिर्यासिप्रास्त्रिष्टुभमितिकाण्वसर्वानुक्रमपाठः । एतदर्थे वायो ये गायत्रीतीदं सूत्रं, एतदर्थे सूत्रचतुष्टयं नास्ति तदर्थे एकया चेदं सूत्रमस्तीति बोध्यम ॥

(३) वायो शुक्रोऽनुष्टुभं पुरुमाढाजमीढावपाक्त्रिष्टुभमाजमीढमितिपाठः काण्वसर्वानुक्रमीयो बोध्यः ॥

आमां षण्णां मध्ये वायो शुक्रइत्यनुष्टुप् ॥

एकया च त्रिष्टुप् ॥

एकया च दशभिश्चेत्येषा त्रिष्टुप् । द्वाभ्यामिष्टये द्वे । व्यूहो दृश्यूनता वा । अन्या गायत्र्यः । अन्त्याश्चतस्रो नियुत्वायो, वायुरग्रेगा । वायो येते । तव वायो ॥

नियुत्त्वान्वायो गायत्रीं गृत्समदः ॥

नियुत्त्वान्वायो । वायोशुक्रइतीमे ऋचौ गृत्समदऋषिरपश्यत् ॥

वायो शुक्रः पुरुमीढाजमीढौ ॥ (१)

वायो शुक्रइतीमामृचं पुरुमीढाजमीढावृषी अपश्यताम् ॥

तव वायो व्यश्व आङ्गिरसः ॥ (१)

तव वायो इतीमामृचं अङ्गिरसोपत्यं व्यश्वऋषिरपश्यत् । अस्य षड्ऋचस्य वायव्येऽष्टकापशुपर्वणि वपादीनां याज्यानुवाक्यात्वेन विनियोगः ॥

अभित्वा वसिष्ठऐन्द्रं प्रगाथम् ॥ (२)

अभित्वा शूर नोनुमइतीमं प्रगाथं इन्द्रदेवतं वसिष्ठऋषिरपश्यत् ॥

प्रथमा बृहती द्वितीया सतोबृहती ॥

तत्र प्रगाथः प्रथमा, अभित्वेत्येषा बृहती । द्वितीया, न त्वावानित्येषा सतोबृहती । एतयोर्लक्षणमेताभ्यां बृहतीत्रयसम्पादनप्रकारः प्रागुक्तः, तत्र पूर्वा बृहती सतोबृहत्युत्तरा ताभ्यां तिस्रो बृहत्यः सम्पा-

---

(१) गायत्रीष्टौ सर्वा वायव्या, हिरण्यगर्भोऽनुवाकः प्रतीकान्तो, नेनद्यौः पञ्चावष्टुभऽ, आपो द्वे हिरण्यगर्भ, आपो हि तिस्रः प्राजापत्याः, कदेवत्याः प्रजापते न प्राजापत्या त्रिष्टुप् । इत्यधिकः पाठः काण्वसर्वानुक्रमे बोध्यः ॥

(२) अभित्वा दृश्यूच वासिष्ठः काण्वपाठः ॥

दिता इत्यच । ईशानमच । व्यूहः । नत्वावाम् व्यूहः ॥

त्वामिद्देवर्ठ० शंयुर्बार्हस्पत्यः ॥

त्वामिद्धि हवामहेतीममृग्वयाणकं प्रागाथमिन्द्रो देवतं बृहस्पतेरपत्यं शंयुर्ऋषिरपश्यत् । तच ऋग्द्वये प्रथमा त्वामिद्, द्वितीयं बृहती द्वितीया, स त्वं नश्चित्रेत्येषा सतोबृहती । बृहतीसतोबृहतीभ्यां बृहतीत्रयसंपादनं च पूर्वं विस्तरेणोक्तमिति नेह पुनरुच्यते । अत्र त्वामिद्धि, त्वांवृत्रेषु व्यूहः । त्वां काष्ठासु हो व्यूहो, गामश्वं हो व्यूहो, "अग्नौ अग्नेर्ठ० सामभिः परिगायतीत्यध्वर्योः सामगानं विहितं नाद्ध्वर्योर्गायेदिति च" । तेनाच तेषां साम्नां योनिभूताऋचो यजुर्वेदे पठ्यन्ते । अभित्वा हे रथन्तरस्य योनी । "रथन्तरं दक्षिणे पक्षे इति श्रुतेः" । त्वामिद्धीति हे बृहतः । "बृहदुत्तरेपक्षे इति श्रुतेः" । कया नइति तिस्रो वामदेव्यस्य योनयः "वामदेव्यमात्मन्निति श्रुतेः" । यज्ञायज्ञा वः, ऊर्जो नपातं, इति हे यज्ञायज्ञियस्य । यज्ञायज्ञियं पुच्छइति हि श्रूयते । एते यानि मँव्वत्सरदीक्षे मँव्वत्सरसुत्येव । अन्यस्मिन्पक्षे "ऋतुष्टा यज्ञायज्ञायं गेयमिति लाट्यायनः" । "अथ प्रजापतेर्हृदयं गायतीत्येनं तु अनृचं गीयते प्रजापतेर्हृदयमनृचं गायतीतिश्राख्यान्तरात् ॥

कया नश्चेन्द्र त्वचं गायत्रं वामदेवोऽन्त्या तु पादनिचृत् ॥

कया नश्चित्रआभुवदित्येतत्तृचं इन्द्रदेवतं गायत्रीछन्दस्कं वामदेवऋषिरपश्यत् । तु पुनः । अस्मिन्तृचे अन्त्या अभीषुणइत्येषापादनिचृद्गायत्री अन्त्यां हि त्रयः पादाः सप्ताक्षराः । पादनिचृदुच्यते । त्रयः सप्तकाः पादा निचृदित्युक्तेः, कया व्यूहः ॥

यज्ञायज्ञा वऽऊर्ज्जो नपातर्ठ० शंयुः ॥

यज्ञायज्ञाव, ऊर्ज्जोनपातमित्येतद्गायत्रं शंयुर्ऋषिरपश्यत् ॥

प्राग्निं नो गर्भः प्रगाथः ॥

पाहिनोऽग्नइत्येषा, गर्भे मध्ये यस्य प्रगाथस्य स पाहि नो गर्भः ॥

एतत्तृचं प्रगाथमाग्नेयो ।

एतत्पूर्वोक्तं तृचं ऋक्त्र्यात्मकं प्रगाथमाग्नेयमग्निदेवतम् ॥

द्वे बृहत्यौ ॥

अत्र तृचे यन्नायन्ना वः, पाहि नो अग्नइतीमे द्वे बृहत्यौ । पाङ्क्त व्यूढः । पाहि गीर्भिरेकादशर्क्कः ॥

तृतीया सतोबृहती ॥

अत्र तृतीया जर्जीनपातमित्येषा सतोबृहती । भुवद्वाजेषु व्यूढः । उत त्वाता सप्तर्क: ॥

सँव्वत्सरोऽस्याग्नेयम् ॥ (१)

सँव्वत्सरोऽसी त्येतद्यजुरग्निदेवतं । अत्र नवनवत्यक्षराणि एको व्यूढः । तेन शताक्षराभिकृतिरियं, अग्नेरभिमर्शने विनियोगः ॥ ६ ॥

इन्द्रमिडः सौत्रामणिकोऽध्यायः ॥

होता यक्षत्समिधेन्द्रमिडस्पदइत्ययमध्यायः सौत्रामणिकः सौत्रामण्या अयं सौत्रामणिकः । सौत्रामण्यङ्गभूतयोरैन्द्रवायोधसयोराग्नपश्वोः प्रयाजानुयाजयोरूपदृत्यर्थः । ततश्चाप्यस्य सौत्रामणीप्रजापतेरार्षमश्विनोः सरस्वत्याश्चेत्येतदध्यायस्यर्षयः ॥

एकादशप्रयाजप्रैषाऐन्द्राग्नाग्नी देवता (२) आद्येऽनुवाके ॥

अस्याध्यायस्यादौ प्रथमेऽनुवाके एकादशऐन्द्रा ऐन्द्रपशोः सम्बन्धि-

---

(१) अत्रसूत्रचतुष्टयाग्रे पूर्ववदाग्नेयर्क० सँव्वत्सरोऽस्याग्नेयर्क० शताक्षराभिकृतीत्यार्षकः काण्वसर्वानुक्रमे पाठो बोध्यः ॥

(२) देवत्याशंत काण्वसर्वानुक्रमपाठः ॥

नः आग्नीदेवताः, समित्तनूनपादित्यादिदेवताकाः, प्रयाजानां प्रैषाः, होता यजत्समिधेन्द्रमिडस्पदित्यतआरभ्य होतायजद्विन्द्रमित्यन्ताः, तत्र समिधेन्द्रं । व्यूहः । आर्षीत्रिष्टुप् । तनूनपातं व्यूहः । अतिजगती । इडाभिरिन्द्रं । ब्राह्मीउष्णिक् । बर्हिषीन्द्रं । आर्षीत्रिष्टुप् । ओजो न । व्यूहः । अतीजगती । उषेऽइन्द्रस्य । आर्षीत्रिष्टुप् । दैव्या होतारा, अतिजगती । तिस्रोदेवीः, व्यूहः । ब्राह्मी अनुष्टुप् । त्वष्टारमिन्द्रं । व्यूहो,अतिजगती । वनस्पतिम् । द्वौ व्यूहौ । शक्वरी । होता यजद्विन्द्रं । व्यूहः, शक्वरी ॥

देवं बर्हिरनुयाजप्रैषा ऐन्द्राएकादशैव ॥

देवं बर्हिरित्यादयएकादशैन्द्राः,ऐन्द्रपशोः सम्बन्धिनएवानुयाजप्रैषाः । एवकारो भिन्नक्रमः । ऐन्द्र.एवेति । देवतास्तु बर्हिरादयएव । तत्र देवं बर्हिः । व्यूहः । अतिजगती । देवीर्द्वारः, एकाधिकाशक्वरी, अथवा त्रयो व्यूहाः, अतिशक्वरीति । देवी उषासा । ब्राह्मीउष्णिक् । देवी जोष्ट्री । एकाधिकाऽतिजगती । ऊर्जाहुती त्रयो व्यूहाः । विश्रुतिः, देवा देव्या । त्रयो व्यूहाः । अतिजगती । एकाधिकाजगती वा । देवीस्तिस्रः । अतिजगती । देवऽइन्द्रः । क्षतिः, देवो देवैः, व्यूहः । अतिशक्वरी । देवं बर्हिः । आर्षीत्रिष्टुप् । देवोऽग्निः व्यूहः । आर्षीत्रिष्टुप् ॥

अग्निमद्येन्द्रः सूक्तवाकप्रैषः ॥

अग्निमद्येत्यथमेन्द्रऐन्द्रपशुसम्बन्धसूक्तवाकप्रैषः ॥

त्वामद्य प्रतीकउभयत्रापि ॥

त्वामद्य ऽष्टपदत्र्यं मन्त्रः । उभयत्रापि ऐन्द्रानुवाके वायोधसानुवाके च प्रतीकः प्रतीकोक्तः, आदिमात्रेणोपात्तः सकलो ज्ञेयः । अथवा सूक्तवाकप्रैषइत्यस्य विशेषणम्, कीदृशः सूक्तवाकप्रैषः ।

त्वामद्य प्रतीकः । त्वामद्येति प्रतीकं यस्मिंस्तत्तथा । न केवलमत्र । किंतु उभयत्र । उभयोरैन्द्रवायोधसानुवाकयोरयं, त्वामद्य प्रतीकएव । अग्निमद्य एकाधिका प्राजापत्याजगती, सूपस्थाः । ब्राह्मीउष्णिक् । त्वामद्यएकाधिका विकृतिः । अथवाऽग्निमद्येत्यतआरभ्य सूक्ता ब्रूहीत्यन्तः प्रैषं एकं यजुः, तदाऽनियताक्षरत्वाच्छन्दोनास्ति ॥

समिधानं महद्वायोधसऽआप्रियएकादशप्रयाजप्रैषाः ॥

होता यक्षत्समिधानं महदित्याद्यैकादशसंख्या वायोधसपशोः प्रयाजानां प्रैषाः, आप्रियइत्याप्रीदेवता समित्तनूनपात्यादिदेवतादृत्यर्थः ॥

तथैव देवं बर्हिरनुयाजप्रैषाः ॥

तथैव वायोधसपशावेव देवं बर्हिर्वयोधसमित्याद्या एकादशानुयाजानां प्रैषाः, बर्हिरादिदेवताः ॥

अग्निमद्य वायोधसः सूक्तवाकप्रैषः ॥

वयोधसः अयं वायोधसः । अग्निमद्येत्ययं वायोधसस्य पशोः सूक्तवाकप्रैषइत्यर्थः । वयोधसा देवतया तत्सम्बन्धिकर्म लक्ष्यते, वायोधसइति षष्ठ्येकवचनं पूर्वसूत्रे तु सप्तम्येकवचनं । अथानयोरनुवाक्ययोश्छन्दांस्युच्यन्ते । होता यक्षत्समिधानं । हे। व्यूहे । अतिजगती । तनूनपातं । एकाधिकातिजगती, दृंहेत्यम् । व्यूहः । शक्करी । सुबर्हिषां हो व्यूहो । शक्करी, व्यचस्वतीः । हे। व्यूहो अतिशक्करी । सुपेशसा व्यूहः । अतिशक्करी । प्रचेतसा । एकाधिका शक्करी । पेशस्वती । एकाधिकाशक्करी । सुरेतसं त्वष्टारं । एकाधिकाशक्करी । वनस्पतिं, व्यूहः । अग्निष्टः, स्वाहाकृतीः । अतिशक्करीः । देवं बर्हिः, देवीर्द्वारः । एकाधिके आद्यौ त्रिष्टुभौ । उषासानक्ता । जोष्ट्री । व्यू

ष्टुः । ब्राह्म्यौ बृहत्यौ । जमदग्निर्ऋषिः, व्यूहः । अक्षरी । देवा देव्या । अतिजगती । देवीस्त्रिस्रः । एकाधिकाब्राह्मी अनुष्टुप् । देवो नराशंसः । व्यूह, अतिजगती । देवो वनस्पतिः, व्यूहः अतीजगती । देवं बर्हिः, ब्राह्मी बृहती । देवोऽग्निः, ब्राह्मी बृहती । अग्निमथ । एकाधिकाब्राह्मीगायत्यौ । सूपस्थाः द्वौ व्यूहौ । ब्राह्मीअनुष्टुप् त्वामदग्य । एकाधिकाविकृतिः ॥ १० ॥

समिद्धोऽअजन्नाश्वमेधिकोऽध्यायः ॥

समिद्धोऽअंजन्नक्षरमित्यस्याध्यायस्याश्वमेधिकः अश्वमेधसंबन्धी ऋषिः । ततश्च प्रजापतिरेवास्यर्षिः, ननु तत्त्रिचतुरोऽध्यायान्प्रजापतिरपश्यदिति, चतुर्णामेवाध्यायानां, प्रजापतिर्ऋषिरुक्तः । तत्कथमस्य प्रजापतिर्ऋषिः । उच्यते । "प्रजापतिरकामयत सर्वाञ्कामानाप्नुया सर्वान्यज्ञीय्यूंयीयेति स एतमश्वमेधं चिरात्ंयज्ञं क्रतुमपश्यदिति श्रुतेः' । प्रतिपादितः साधारणः प्रजापतिर्ऋषिरत्रापि भवत्येवेति ॥

आद्या आप्रीसंज्ञिष्टुभएकादशाश्वस्तुतोवृहदुक्थो वामदेव्यो दद्यङ्ङाश्वो वा सामुद्रिः ॥

आद्याः प्रथमा एकादशर्क्चस्त्रिष्टुभ्यआप्रीमज्ञा अश्वस्तुतिरूपा वामदेवपुत्रो बृहदुक्थो दद्यङ्ङ । अथवा सामुद्रिः समुद्रपुत्रोऽश्वऋषिः एताएकादशर्चो दद्यङ्ङ, तान्कथमाप्रीसंज्ञकान्कथिताः "समिद्धोऽअंजन्नक्षरमृतीनामितिवाहदुक्थो भरापृणीयाद्बृहदुक्थो ह वै वामदेव्योऽश्वो वा सामुद्रिरश्वस्यापी दद्यङ्ङेतिश्रुतेः" । समिद्धनूनपादिडादयः आसां देवताः प्रजानन्वाजी द्वौ व्यूहौ । दृंहस्व, आशुश्च । द्वौ व्यूहौ । अक्षो घृतेन । व्यूहः ॥

यदक्रन्दस्त्रयोदशाश्वस्तुतिस्त्रिष्टुभो भार्गवो जमद-

मिर्दर्श दीर्घतमाश्च ॥(१)

यदक्रन्दः प्रथममित्याद्ययास्त्रयोदशर्चः । अक्षस्तुतिरुपास्त्रिष्टुभो भृगोरपत्यं जमदग्निर्ऋषिर्दीर्घतमाश्च दृदर्श दृष्टवान् । यमेन दत्तं । द्वादशर्चः । असि यम. । असि मितः । व्यूहः । त्रीण्यष्टौ व्यूहौ । उतेवमे । अनुगावः । अनुदेवाः । हिरण्यशृंगो । यदाक्षिषुः । तव शरीरं । उपप्रागाच्छसनं । देवद्रीचा,अथाग्नास्ते । एतेषु व्यूहः । होतुरश्वाभिषवे एतासां विनियोगः ॥

समिद्धोऽअद्य द्वादशाप्रीस्त्रिष्टुभो जमदग्निः ॥

समिद्धोऽअद्यमनुषदित्याद्या द्वादशर्चाप्रीमन्त्रास्त्रिष्टुभो जमदग्निर्ऋषिरपश्यत् । ददर्श "जमिदग्निभिरेव प्रीषीयादिति श्रुतेः" । समित्तनूनपात्तारयोदेवता । त्वन्दूतः ऋषिः । देवाश्च, आजुह्वानः । आयाह्यग्ने । त्वं देवानां । सऽएतान् । एतेषु व्यूह । देवेभ्योऽदितये । द्वौ व्यूहौ । देवेभ्योभवत । तिस्रो देवीः,सरस्वती । उपावसृज । स्वयोजातः ॥ १२ ॥

केतुं कृण्वन्नग्नेयीमनिरुक्तांग यत्रीं मधुच्छन्दाः ।

केतुं कृण्वन्निति मासूक्तमग्निदेवतां गायत्रीं, मधुच्छन्दा ऋषिरपश्यत् ॥

जीमूतस्येव पायुर्भारद्वाजः संग्रामान्यक्रोऽस्तौषीत् ॥(२)

भारद्वाजो भरद्वाजस्य पुत्रः पायुर्ऋषिः, जीमूतस्येव भवतीत्यादिभिः ऋक्त्रयः एकैकया ऋचा वक्ष्यमाणानि संग्रामादीनि संग्रामानि अस्तौषीत्स्तुतवान् । एकैया ऋचा यथाक्रमं एकैकं क

(१) अत्रारभ्य सूत्रद्वयं काण्वसर्वानुक्रमे नास्तीति बोध्यः ॥

(२) अत्र काण्वसर्वानुक्रमे जीमूतस्येवेत्याद्याभिः क्रमात्तिसृभिरधिकः पाठो बोध्यः ॥

सङ्ग्रामाङ्गं स्तुतवानित्यर्थः । ऋक्गः सङ्ख्यैकवचनाच्च, वीप्साव्याप्तिगम् । अतश्चामां मंनाहादीनि संग्रामाङ्गान्येव देवताः "स्तुतिभाजां देवताभवन्तीति वेदवचनात्" । तान्येव संग्रामाङ्गानि क्रमेणाह ॥

सन्नाहम् ॥

जीमूतस्येत्यनया त्रिष्टुभा सन्नाहमस्तौषीत् । अनाविद्धया व्यूह्य ॥

कार्मुकम् ॥(१)

धन्वनेत्यनया कार्मुकं । धनुरस्तौषीत् ॥

गुणम् ॥

वक्ष्यन्तीत्यनया धनुषोगुणं ज्यां प्रत्यञ्चामस्तौषीत् । ज्याऽद्यं व्यूह्य ॥

आर्त्नी ॥(२)

तेऽधिचरन्तीत्यनया आर्त्नी धनुः कोटी अस्तौषीत् ॥

तूणम् ॥ ३)

बह्वीनामित्यनया तूणं इषुधिं अस्तौषीत् ॥

जगत्यर्द्धेन सारथिमर्द्धेन रथम् ॥(४)

रथेतिष्ठन्नित्यस्या जगत्या जगतीछन्दस्काया अर्द्धेन सारथिं अ

---

(१) अत्र धनुः पदं काण्वसर्वानुक्रमेऽस्तीति ॥

(२) ह्रस्वध्नंएतत्सूत्राग्रे कण्वपाठः ॥

(३) एतत्सूत्राग्रे इषुरथामिति काण्वपाठः ॥

(४) तत्रोजगत्यर्द्धेन सारथिमृतवर्द्धेन रश्मीन्नतोऽनुष्टुभा कशामन्त्यया दुन्दुभिं यथामन्त्रलिङ्गमनुकल्पन्दस्काः सर्वास्त्रिष्टुभो, यदुक्तं दक्षयज्ञेदशारत्नुर्नास्त्रिष्टुभो भार्गवजमदाग्न्यदेदर्श दीक्षितमात्र,समिद्धोऽअग्नेद्वादशार्षास्त्रिष्टुभो जमदग्निरग्ने गायत्र्यायेवेदशहोतर्वषोवेष्टे द्रविणदेवता,आग्नेयः कृष्णग्रीवइत्यनाऽऽएकादशान्योदैवो पशुदेवताग्राह्मणेनाधीयन्ते । अध्यायद्वयमस्राजरासऽइत्यध्यायस्यामे वक्ष्यति काण्वसर्वानुक्रमकारः ॥

स्तौषीत् । द्वितीयेनार्द्धेन अभीशूनामित्यनेन रश्मीनस्तौषीत् ॥

हरीन् ॥

तीव्रान्घोषानित्यया हरीनश्वानस्तौषीत् ॥

रथम् ॥

रथवाहणमित्यनया रथमस्तौषीत् ॥

रथगोपायितॄन् ॥

ब्राह्मणासः० सदृत्यनया रथगोपायितॄनस्तौषीत् ॥

जगत्या लिङ्गोक्तदेवताः ॥

ब्राह्मणासः पितरदृत्यया जगतीछन्दस्कया लिङ्गोक्ता ब्राह्मणादयो देवताः, ब्राह्मणासः पितरदृति व्यूहेनैकादशकः । तेनैकोना ॥

द्वाभ्यां त्रिष्टुबनुष्टुभ्यामिषुम् ॥

सुपर्णं वस्ते, कृजीत परीत्याभ्यां द्वाभ्यां यथाक्रमं त्रिष्टुबनुष्टुभ्यामिषुमस्तौषीत् ॥

अनुष्टुभा कशाम् ॥

आजङ्घन्तीत्यनयानुष्टुपछन्दस्कया कशाममाजनीमस्तौषीत् । अश्वानां भयप्रकाशनार्थां कशामुच्यते । आजङ्घन्तो व्यूहः ॥

ततो हस्तघ्नम् ॥

ततोऽनन्तरं अहिरिवेत्यनया हस्तघ्नमस्तौषीत् । याज्याहेतिः । व्यूहः । पुमान्पुमांसं द्वादशकः ॥

ततस्तृचौ रथदुन्दुभिदेवत्यौ ॥

ततोऽनन्तरं यथाक्रमं रथदुन्दुभिदेवत्यौ तृचौ, वनस्पते वीड्वङ्गः । दिवः पृथिव्याः, इन्द्रस्य वज्रोऽसीत्ययं तृचो रथदेवत्यः । उपश्वासय, आक्रन्दय, आमूरजेत्ययं तृचो दुन्दुभिदेवत्यः ॥

ऐन्द्रोऽर्द्धर्चोऽन्त्यः ॥

अग्ने भवोऽत्यः, समञ्जन्पर्यावरतीत्यग्निर्वै रुद्रः रुद्रदेवतः । वनस्पते वीड्वङ्गः । आख्याता व्यूढ्वः । अपामोषधानां । हो जागृवी । वेमा नः । व्यूढ्वः । पुरुषा ते,हादयकः । अपशोष हादयक., आमूरज, वेतुमत् । व्यूढ्वः ॥

सर्वास्त्रिष्टुभोऽनुक्राः ॥

जीमूतभ्येवेत्यादीनां या अनुशाकुन्दस्का ऋचस्ताः सर्वास्त्रिष्टुभो ज्ञेयाः । रथे तिष्ठन्, ब्राह्मणासः, तुपर्णं वस्ते, ऋजीते परि.आजघन्तीत्येताभ्योऽन्याः सर्वा अनुशाकुन्दस्का वर्तन्ते ताः सर्वास्त्रिष्टुभ इत्यर्थः ॥

आग्नेयः कृष्णग्रीव इत्याद्या एकादशिन्योर्हयोः पशुदेवताः ॥(१)

अश्वमेधे स्तूयते । "हे त्वेवैते एकादशिन्या वालमेतेति" तयोर्हयोरेकादशिन्योः, आग्नेयः कृष्णग्रीवः सारस्वतीमेषीत्यादयः पशुदेवताः पशवोदेवता ज्ञेत्यर्थः । उभयेषामप्यग्नेवोक्तत्वात् । तेनेमानि ब्राह्मणवाक्यानि द्रव्यदेवताविधायकानि न तु मन्त्राः ॥

अग्नये गायत्र्यायेति दश हविषो वेष्टेर्देवता ॥

अग्नौ स्तूयते । "अथाग्नीषोमीयस्य पशुपुरोडाशमनूद्याग्नेवैष्णीर्निर्वपतीत्युपक्रम्य तदाहुर्दशहविषमेवैतामिष्टिं निर्वपेत्सा सर्वस्तोमा सर्वपृष्टा सर्वाणि छन्दाठंसि सर्वा दिशः सर्वऋतवः सर्वंम्वेतदयमग्निरिति" । अस्या दशहविष्कायाअवेष्टेरग्नये गायत्र्यायेत्येता दशदेवता । हवींष्यथाचैवोक्तानि । तेन देवताग्रहण हविष्यमप्युपलक्षणा-

---

(१) एतत्सूत्राग्रे, ब्राह्मणमाम्नायन्ते । इतिकाण्वसर्वानुक्रमपाठः । एतदग्नेऽधयायत्रितयस्य काण्वसर्वानुक्रमे ऋषिदैवतसूत्राणि न सन्तिअध्यायत्रितयं विहायास्याजरासइत्यध्यायस्य सूत्रमुक्त्वायज्जाग्रतइत्यस्य चोक्त्वाऽनन्तरमध्यायत्रितयस्य सर्वानुक्रमसूत्रमुक्त काण्वसर्वानुक्रमे पूर्वापरामायेनेति बोध्यम् ॥

र्थं । अहिष्टैर्बीएणि देवताधार्थोक्ता इत्यर्थः । इमान्यग्निविधायकानि ब्राह्मणवाक्यानि न तु मन्त्राः ॥ १२ ॥

देवसवितर्द्वावध्यायौ पुरुषमेधो नारायणः पुरुषो दद्र्श ॥

अथ पुरुषमेधश्च्यते । देव सवितः, सहस्रशीर्षा एतौ द्वावध्यायौ नारायणपुरुषो दद्र्श दृष्टवान् । "पुरुषो ह नारायणोऽकामयतेत्युपक्रम्य, स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत्" । तत्र देव सवितः, तत्सवितुरित्यनयोः सर्वं प्रागुक्तं । अचाप्याहुतिरङ्गमे विनियोगः ॥

विश्वानि देव गायत्रीर्ठ० सावित्रीए ग्र्त्समदः ॥

विश्वानि देव सवितरित्यादीनां गायत्रीछन्दस्कां सवितृदेवत्यां ग्रत्समदऋषिरपश्यत् । देव सवितरित्यादीनां तिसृणामृचां अतिरात्रसंस्थे मध्यमेऽहनि पशूपाकरणात्पूर्वमाहुतिरङ्गमे विनियोगः ॥

विभक्तारम्मेधातिथिः सावित्रीम् ॥

गायत्रीमित्यनुवर्तते, । विभक्तारं हवामहइतीमामृचं मेधातिथिऋषिरपश्यत् ॥

ब्रह्मणे ब्राह्मणमिति हे कण्डिके तपसेऽनुवाकस्य ब्राह्मणम् ॥

ब्रह्मणे ब्राह्मणं नृत्तताय मूतमितीमे हे कण्डिके, तपसे कौलालमित्ययमध्यायसमाप्तिपर्यंतोऽनुवाकस्य द्रव्यदेवताविधायकं ब्राह्मणमेतत् । न तु मन्त्राः । द्रव्यदेवतासम्बन्धविधायकवाक्यान्येतानीत्यर्थः ॥ १३ ॥

सहस्रशीर्षा षोडशर्चमानुष्टुभं त्रिष्टुबन्त्यं पुरुषो जगद्बीजमग्न देवता ॥

सहस्रशीर्षा पुरुषइत्यादि षोडशर्चमानुष्टुभं अनुष्टुप्छन्दस्कं । चिष्टुबन्त्यं । चिष्टुबन्त्या षोडशी यस्य तच्चिष्टुबन्त्यं । अमहीनजगतः कारचभूतः पुरुषोऽत्र षोडशर्चदेवता ब्राह्मणे नियुक्तानां मन्त्राणामभिधने विनियोगोऽस्य । अत्र पुरुषएव, यद्भूतं । व्यूढः । त्रिपादूर्ध्व नवकः । ततोविष्वङ्व्यूढः । सम्भृतम् । आरण्याः । ये के च । साध्याः सन्ति । यत्पुरुषम् । कतिधा । एतेषु व्यूढः । मुखं नवकः, बाहू । वसन्तोऽस्य । तानि धर्माणि । यत्र पूर्वे । एतेषु व्यूढः ॥

अद्भ्यः षड्रचउत्तरनारायणो मन्त्रः ॥

अद्भ्यः सम्भृतइत्यादिः षड्रचः । ऋक्षडकात्मकउत्तरनारायणसञ्ज्ञो मन्त्र । अत्र षड्रचत्वादित्योपस्थाने विनियोगः, अतएवादित्यो देवता । सञ्ज्ञाकरणमुत्तरनारायणेनादित्यमुपस्थायेत्यादौ व्यवहारार्थम् ॥

आद्यास्तिस्रस्त्रिष्टुभः ॥

अस्मिन्षड्रचे आद्यास्तिस्रस्त्रिष्टुभ, अद्भ्यः सम्भृतः, वेदाहमेतं प्रजापतिश्चरति । एतास्तिस्रऋचस्त्रिष्टुप्छन्दस्काः । तन्मर्त्यश्च । द्वादशकः । नान्याः पञ्चाः । व्यूढः । अजायमानो द्वादशकः ॥

द्वे अनुष्टुभौ ॥

अस्मिन्षड्रचे चतुर्थीपञ्चम्यौ ये। देवेभ्यो, ऋचं ब्राह्मणितोमे अनुष्टुभौ ॥

अन्त्या त्रिष्टुप् ॥

अन्त्या त्रीण्यच तदित्येषात्रिष्टुप् । द्वौ तु जागतौ यस्यास्तृतीयं त्रिष्टुप् । व्यूढः ॥ १४ ॥

तदेव सर्वमेधोऽध्यायशात्मदैवतः सप्तमेऽहनि सर्वस्तोमे विनियुक्तः ॥

तदेवाग्निरित्यग्निमध्यायः सर्वमेधसम्बन्धी वाजदेवतः सप्तमेऽह-न्यहीनसञ्ज्ञके सर्वं जुहोतीत्यग्निं सर्वहोमे विनियुक्तः ॥

सर्वमेधं ब्रह्मस्वयमवेक्षत तदीयं मन्त्रगणं प्रवायु-यमच्छेत्येतस्मात् ॥

स्वयं तु ब्रह्मसर्वमेधं प्रवायुमच्छेत्येतस्मात्प्राक् तदीयं मन्त्रगणं च ऐक्षत ददर्श ॥

आद्ये द्वे अनुष्टुभौ ॥

तदेव, सर्वं निमेषाइत्येते द्वे आद्ये ऋचावनुष्टुभौ ॥

न तस्य द्विपदागायत्री ॥

न तस्य प्रतिमितीयं द्विपदागायत्री ॥

हिरण्यगर्भश्चतस्रो मा मा हिर्ठ० सीद्यस्मान्न ह एताः प्रतीकचोदिताः ॥

हिरण्यगर्भः समवर्तत, यः प्राणतः । यस्मेमे, यऽआजदा इत्येता यतस्रः । मा मा हिर्ठ० सीज्जनित्रेका । यस्मान्न जातः, इन्द्रस्य सख्युः डितीमे ह एताऋचोऽत्र प्रतीकचोदिताः पूर्वं पठितत्वादादि-मार्थिकोवाक्याः । यदि प्रतीकचोदितास्ततः किमतआह ॥

ब्रह्मयज्ञेऽध्येयाः ॥

ब्रह्मयज्ञे स्वाध्यायाध्ययने एताः सकला अध्येयाः पठनीयाः । न केवलमत्र किं तु ॥

सर्वत्रैवम् ॥

यत्र यत्र लोकं, ता, ऽइन्द्रं । स्वामयऽऋषे । आपो ह यद्बृहतीर्यश्चिदापः । तं प्रत्नथाऽयं वेनः । ऽमहँऽइन्द्रो यऽओजसा, कदा चन स्तरीरसि, कदा चन प्रयुच्छसि । तम्प्रत्नथाऽयं वेनश्चित्रं देवानां । तं प्रत्नथाऽयं वेनो, ये देवासऽ, आनऽइडाभि, र्विश्वेभिः सोम्यं मदध्वं, मा-

ऋषिर्धीयतः । ततो वारहयं तं प्रजापतिर्यं वेनः । इमाउ त्वा, यज्ञाय,मयठे० सहस्र,मूर्ध्वजभुषः, यऽइमा विश्वा, विश्वकर्मा, यो नः पिताऽअपतेऽन्नस्य नो देहीत्येवं, या याः प्रतीकचोदिता ऋचः तत्र सर्वत्र ता वृत्रयज्ञे सकला ध्येयाः । वृत्रयज्ञग्रहणं जपादेरप्युपलक्षणम् ॥

एषो ह यतस्त्रिष्टुभः ॥(१)

एषो ह देवः । यस्माज्जातं । येन द्यौ ,यदक्रन्दसीत्येतायतस्त्रिष्टुभः । प्रत्यङ्नना जागतः । त्रीणि ज्योती ष जागतः ॥

आपो ह यस्त्रिरप्रतीकचोदिते ॥

आपो ह यदबृहतीर्यस्त्रिदाप इत्येतं हे ऋचावत्र प्रतीकचोदिते । वृत्रयज्ञादावध्येये ॥ १५ ॥

वेनस्तत्पश्य त्रिष्टुभः ॥

वेनस्तत्पश्यत्रित्याद्याः पञ्चऋचस्त्रिष्टुभः, यत्र विश्वं, प्रतत् क्षत्री ये धामन् । एतेषु व्यूहः ॥

सदसस्पतिं त्रृचेन मेधाकामो मेधां याचते ॥

सदसस्पतिमद्भुतमित्यादिकेन त्रृचेन कश्चिन्मेधाकामो मेधां धारणावतीं बुद्धिं याचते प्रार्थयते ॥

प्रथमा गायत्री लिङ्गोक्तदेवता ॥

अत्र त्रृचे प्रथमा सदसस्पतिमित्येषा गायत्रीलिङ्गोक्तसदसस्पतिदेवता । प्रियमिन्द्रस्य । व्यूहः ॥

द्वितीयार्त्येष्यनुष्टुप् ॥

द्वितीया यां मेधामित्येषा आग्नेयी अग्निदेवत्या अनुष्टुप् । यां

---

(१) अत्र, यस्मात्, प्रतीकेषु परीत्य भूतानि, हे परमात्मन्यादिनौ त्रिष्टुभावेव, इति काण्वसर्वानुक्रमेऽधिकः पाठः ॥

मेधां समकः, द्वितीये व्यूढः ॥

तृतीया लिङ्गोक्तदेवताऽनुष्टुप् ॥

मेधां मे वरुण इत्येषा तृतीया ऋक्लिङ्गोक्तवरुणाग्न्यादिदेवता । अनुष्टुप्छन्दस्का । प्रथमो नवकः ॥

इदं मे ब्रह्म चेतीयं मात्रवर्णिक्यनुष्टुप् ॥

इदं मे ब्रह्म चेतीयं मात्रवर्णिकी मंत्रवर्णोक्तदेवता अनुष्टुप् । अथ प्रथमतृतीयौ नवद्वितीयः समकः, तृतीयोऽपि व्यूढेन समकः ॥

एतया देवेभ्यः श्रीकामो याचते श्रियम् ॥

इदं मा इत्येतया ऋचा कश्चित् श्रीकामः देवेभ्यः श्रियं याचते लक्ष्मीं प्रार्थयते ॥ १६ ॥

सर्वमेधे श्रूयते । तस्याग्निष्टुदग्निष्टोमः प्रथममहर्भवतीति प्रकृत्य तस्याग्नेया यज्ञा भवंत्याग्नेय्यः पुरोरुचः सवनाग्नेयमसदिति । तच्च कल्पसूत्रे अनङ्गत्वादाग्नेयीः पुरो रुचो दर्शयति ॥

अभ्याजरासः समदश्वाग्निष्टुत्याग्निष्टोमिके प्रथमेऽहनि पुरोरुचश्चाग्नेय्यः ॥

सर्वमेधे अग्निष्टुत्संज्ञे प्रथमेऽहनि अभ्याजरासो इमामित्याद्या महाऽग्नेरित्येतत्पर्यंताः समदृग्सङ्ख्या ऋचोऽग्निदेवत्या पुरोरुचो भवन्ति । अत्र पुरोरुक्शब्देन ऋग्यूपा यज्ञायज्ञीयमन्त्राभिधीयन्ते न यजुरूपाः । कुतः "सन्धि पुरोरुचिति श्रुतेः" । षडहमहावैश्वदेवपाञ्जीवतद्वारियोजनेषु यजुरूपे यज्ञायज्ञीये मन्त्रेऽपि "तं वा अपुरोरुक्कं यज्ञायज्ञीयमिति श्रुतेश्च" । तेन येषां यज्ञानां प्रकृतौ पुरोरुचः सन्ति तेषामेवेदं वैकृतं विधानं नोपांशुयजमर्यामाक्रमणमहावैश्वदेवानां । अतएवाग्नेयीभिः प्राकृत्य ऋचएव निवर्त्यन्ते नोपयामादीनि यजूंषि ॥

आद्ये हे ऐन्द्रवायवस्य ॥

आद्ये अस्याजरासो हरयो धूमकेतवइतीमे हे ऋचौ ऐन्द्रवायवग्रहस्य पुरोरुचो ग्रहणमन्त्रौ ॥

अस्याजरासो वत्सप्रीः ॥

अस्याजरासइतीमामृचं त्रिष्टुभं वत्सप्रीर्ऋषिरपश्यत् । प्रथमतृतीययोर्भूयिष्ठः । चतुर्थो दशकः तेनैकोना । आवायवित्यस्यापवादः ॥

हरयो धूमकेतवो विरूपः ॥

हरयो धूमकेतवइतीमामृचं गायत्रीं विरूपऋषिरपश्यत् । इन्द्रवायूइत्यस्या अपवादः ॥

यजानो मैत्रावरुणस्य गोतमः ॥(१)

यजानो मित्रावरुणेतीमामृचं मैत्रावरुणस्य पुरोरुचं गोतमऋषिरपश्यत् । अयं वामित्यस्या अपवादः । अग्ने यमिति व्यूहः । गायत्री । युक्त्वेत्यस्या आश्विनग्रहग्रहणे विनियोगः । कुतः मैत्रावरुणशुक्रपुरोरुचोर्मध्ये पाठात् । प्रकृतावप्यस्मिन्नेव क्रमे अयं वां, तं प्रत्नथेत्यनयोर्मैत्रावरुणशुक्रपुरोरुचोर्मध्ये, या वां कशेत्यश्विनपुरोरुचः पाठाच्च । अयँ अग्ने इति लिङ्गाच्च । वक्ष्यमाणेषु षट्स्वपि पुरोरुगणेष्वस्मिन्नेव क्रमे, आसुते सिञ्चत, दैव्यावध्वर्यू, अधि नश्चैषां, दस्रा युवाकवो, दैव्यावध्वर्यू, आयातमुपभूषतमित्येतासामर्चां व्यत्ययाश्विलिङ्गानामाश्विनपुरोरुचा पाठाच्च । या वां कशेत्यस्य बाधः ॥

हे विरूपे शुक्रस्य कुत्स ॥

हे विरूपे इतीमामृचं त्रिष्टुभं शुक्रग्रहस्य पुरोरुचं कुत्सऋषिरपश्यत् । त प्रत्नथेत्यस्यापवादः । हे विरूपे व्यूहेन दशकः । कुत्रापि व्यूहं

(१) एतत्सूत्रात्मे, युक्त्वाश्विनस्येतसूत्रमधिकं काण्वसर्वानुक्रमेऽस्तीति ॥

क्त्वा छन्दः पूर्त्तिः ॥

अयमिह मन्थिनः ॥

अयमिहेतिमन्थिग्रहस्य पुरोरुग्ग्रहणमन्त्रः । त्रिष्टुप् । द्वितीयो दशकः, तृतीयो दशकः, तृतीयो द्वादशकः, तेन पूर्तिः, अयंवेनइत्यस्याऽपवादः ॥

वैश्वदेवग्रहग्रहणे त्रीणि व्रता विश्वामित्रः ॥

त्रीणि व्रतेतीयं त्रिष्टुप्वैश्वदेवस्य विश्वेदेवदेवैः तस्याग्रयणग्रहस्य ग्रहणे पुरोरुग्ग्रहणमन्त्रो भवति । अस्या विश्वामित्रऋषिः । ये देवासइत्यस्याऽपवादः, अत्र वैश्वदेवशब्देन तद्देवताग्रयणउच्यते। कथमाग्रयणस्य तद्देवत्वं "आत्मा ह वा अस्याग्रयणइति प्रकृत्य विश्वेभ्यो देवेभ्यो गृह्णातीति श्रुतेः" । मूर्द्धानमित्यस्याः प्रकृतिवदेव ध्रुवग्रहणे पुरोरुक्त्वंसङ्गमिति नात्र पुनरुक्तं । त्रीणि व्रता आदित्यो-तारमित्यनयोर्व्यूहः । मूर्द्धानं व्यूहः ॥

ऐन्द्राग्नस्याग्निर्वृत्राणि भरद्वाजः ॥

अग्निर्वृत्राणीतीमामैन्द्राग्नग्रहस्य पुरोरुचं गायत्री भरद्वाजऋषिरपश्यत् । इन्द्राग्नी आगतमित्यस्याऽपवादः ॥

वैश्वदेवस्य विश्वेभिः सोम्यं मधातिथिः ॥

विश्वेभिः सोम्यमितीमामृचं गायत्रीं वैश्वदेवस्य पुरोरुचं मेधातिथिरपश्यत् । औमासवर्षणौधृतइत्यस्याऽपवादः, आद्ये व्यूहः ॥

आयन्मरुत्वतीययोर्द्वे ॥

आयदिषे, अग्ने शर्द्धतीमे द्वे ऋचौ इयोर्मरुत्वतीययोर्यथाक्रमं पुरोरुचौ गृह्णतमन्त्रौ त्रिष्टुभौ । स्वादुष्कं जनयत् । व्यूहेन दशकः । पुनः कुत्रापि व्यूहं कृत्वा छन्दः पूर्तिः । तव द्युम्नानि व्यूहः । इन्द्रमरुत्वइत्यस्यां आयदिषेऽपवादः । मरुत्वंतं वृषभमित्यस्यां अग्नेशर्द्ध-

ति ॥

आयत्यराशरः शाक्त्यः ॥

आयदितीमामृचं शक्तेरपत्यं पराशरऋषिरपश्यत् ॥

अग्ने ग्रहोविदुहिता विश्ववारा ॥

अग्ने ग्रहेतीमामृचमग्निदुहिता अग्नेः पुत्री विश्ववारा इतिना स्त्री अपश्यत् ॥

त्वार्ठ० हि (१) भरद्वाजः ॥

त्वाष्ट्र हि मन्द्रतममितीमां त्रिष्टुभं माहेन्द्रं पुरोरुचं भरद्वाजोऽपश्यत् । अस्या अनुक्तोऽपि माहेन्द्रग्रहणे विनियोग कल्प्यते । कुतः इन्द्रं नत्वेतिलिङ्गात्मरुत्वतीयपुरोरुचोऽनन्तरं पाठाच्च । प्रकृतावप्यस्मिन्नेव क्रमे माहेन्द्रपुरोरुक्पठ्यते, महाँइन्द्रो नृवदिति । इन्द्र स्तुतिरप्यनेनैव क्रमेण माहेन्द्रपुरोरुक्पठ्यते । महाँइन्द्रो यऽओजसेति । महाँइन्द्रो नृवदित्यस्यापवादः । ववृमहे । इन्द्रं नत्वा । व्यूह ॥

त्वेऽअग्ने हे बृहत्यावादित्यस्य ॥

त्वे अग्ने । शुधिश्रुत्कर्णेतीमे हे बृहत्यौ आदित्यग्रहग्रहणे पुरोरुचौ गृहणमनुक्तौ ॥

त्वेअग्ने वसिष्ठः ॥

त्वेअग्ने स्वाहुतेतीमां बृहतीमादित्यग्रहस्य प्रथमां पुरोरुचंवसिष्ठऋषिरपश्यत् । प्रथमे व्यूहाभ्यामष्टकः, तृतीयपक्षादशकः । चतुर्थः समकः, द्व्यूना । कदा चन स्तरीरसीत्यस्या अपवादः ॥

शुधिप्रस्कण्वः ॥

शुधिश्रुत्कर्णेतीमां बृहतीमादित्यग्रहस्य द्वितीयां । पुरोरुचं प्रस्क-

(१) अत्र हिवर्णतोऽग्ने माहेन्द्रस्तोत्रपदमाधिक्य काण्वसर्वानुक्रमेऽस्तीति ॥

यत्रऋषिरपश्यत्। कदा चन प्रयुच्छसीत्यस्या अपवादः॥

आदित्यग्रहग्रहणे विश्वेषामदितिर्वामदेवो गोतम: ॥(१)

विश्वेषा मदितिरितीमामादित्यग्रहस्य दध्ना अपणे विनियुक्तां चिष्टुभं वामदेवो गोतमऋषिरपश्यत्। यन्नो देवानामित्यस्या अपवादः। अचाद्यर्ध्यूहः। आदित्यग्रहयग्रहणइति केचित्पठन्ति, "अ-तो वाऽथ दधिगृह्णाति सगृह्णाति यन्नो देवानामिति पठ्यते"। तेन अुत्यनुकरणमेतत्॥

महो अग्ने: सावित्रस्य लुशोधानाक:॥

महोअग्नेरितीमां चिष्टुभं सावित्रग्रहस्य पुरोरुचं लुशोधानाक-ऋषिरपश्यत्। वाममद्येत्यस्या अपवादः, अचाद्यांत्यो जागतौ॥

अनुक्तं गायत्रं चैष्टुभम्॥

अनुक्तं अनुक्तछन्दस्कं मन्त्रजातं गायत्रछन्दस्कं चिष्टु-पछन्दस्कं च। तथैव प्रागुक्तं। इन्द्रस्तदादिष्वपि समदृशानां पुरो रुचामनेनैव क्रमेणैतेष्वेव ग्रहेषु विनियोगः कल्पत्र.। समाप्ता चिष्टु-त्॥ १०॥

सर्वमेधे श्रूयते इनद्रस्तुत्युक्थ्यो द्वितीयमहर्भवतीति प्रकृत्य तस्यै-न्द्रा ग्रहा भवन्त्यैन्द्र्य: पुरोरुच: सर्वमेनद्रमदिति। तत्रैन्द्री: पुरो-रुच: प्रदर्शयति॥

इन्द्रस्तुत्युक्थ्ये द्वितीयेऽन्यैन्द्र्य: पुरोरुचो द्वाद-शप्रतीकचोदिते च ह्वे तिस्रश्च॥

इन्द्रस्तुत्युक्थ्ये उक्थ्येऽक्थमंस्थे सर्वमेधस्य द्वितीयेऽहनि आय-वित्यिप्यरित्यादि इमान्तहत्यस्या द्वादशऋच:। तथा। तं प्रत्यृचा, अ-

(१) आस्मन्सूत्रे आदित्यग्रहश्राणे काण्वसर्वानुक्रमपाठो वेदयः।

यं वेनदमे दे प्रतीकचोदिते च, तथा महाँइन्द्रो यऽओजसा, कदा चन स्तरीरसि, कदा चन प्रयुच्छसीत्येतास्तिस्रः प्रतीकचोदिताश्चे-त्येवमन्ताः सप्तदशर्चऐन्द्र इन्द्रदेवत्या, पुरोरुचो भवन्ति, ऐन्द्र-वायवादिसाविचान्तानां गृहाणां अग्निष्टुदुक्तक्रमेण गृहषमन्त्रा भव-न्तीत्यर्थः । एवं सप्तदशैन्द्रव पुरोरुचः सम्पन्नाः ॥

आपश्चिद्वसिष्ठः ॥

आपश्चिदितीमां त्रिष्टुभं ऐन्द्रवायवस्य प्रथमां पुरोरुचं वसिष्ट ऋषिरपश्यत् । आवायवित्यस्या बार्हः, आपसित् । चतुर्थीदृयर्कः ॥

गावऽउप पुरुमीढाजमीढौ ॥

गावऽउपेतीमां गायत्रीं ऐन्द्रवायवस्य द्वितीयां पुरोरुचं पुरुमीढा-जमीढौ अपश्यतां । इन्द्रवायूत्यस्या अपवादः ॥

यद्द्य वसिष्ठः ॥

यद्द्य सूरुदितीमां गायत्रीं मैत्रावरुणपुरोरुचंवसिष्ठोऽपश्यत् । अ-यं वामित्यस्या अपवादः ॥

आसुतेऽसुनीतिः ॥

आसुतइतीमां गायत्रीं आश्विनपुरोरुचं असुनीतिर्ऋषिरपश्य-त् । आवामित्यस्या अपवादः । द्वितीये व्यूहः । तं प्रत्यथा, अयं वे-नदित्यनयोः प्रकृतिवच्छुक्रामन्थिग्रहणे विनियोगः ॥

आतिष्ठन्तं विश्वामित्रः ॥

आतिष्ठन्तमितीमामृचं त्रिष्टुभं आग्रयणग्रहपुरोरुचं विश्वामित्रो ऽपश्यत् । ये देवासइत्यस्या बार्हः ॥

प्रवः सुचीकः ॥ (१)

प्रवो महइतीमां त्रिष्टुभं ध्रुवग्रहणपुरोरुचं सुचीकऋषिरपश्यत् ।

---

(१) सुचीकइति काण्वपाठः ॥

अभान्तो जागतौ । मूर्धानमित्यस्या बार्हः ॥

बृहन्निति त्रिष्टुबोकः ॥

बृहन्निदितीमां गायत्रीमैन्द्राग्नपुरोरुचं त्रिष्टुबोकऋषिरपश्यत् । इन्द्राग्नीइत्यस्या बार्हः । आद्यः सप्तकः ॥

इन्द्रेहि मधुच्छन्दाः ॥

इन्द्रेहि मत्स्यन्धसइतीमां गायत्रीं वैश्वदेवपुरोरुचं मधुच्छन्दा अपश्यत् । ओमासइत्यस्या बार्हः ॥

इन्द्रो दृळ्हं विश्वामित्रः ॥

इन्द्रो दृळ्हमिति त्रिष्टुभं प्रथममरुत्वतीयपुरोरुचं विश्वामित्रोऽपश्यत् । इन्द्र मरुत्वइत्यस्या बार्हः ॥

कुतस्त्वमगस्त्यः ॥

कुतस्त्वमित्येतां त्रिष्टुभं सप्तमरुत्वतीयपुरोरुचमगस्त्यऋषिरपश्यत् । आद्यौ व्यूहेन दशकः । तेनैकोना मरुत्वन्तमित्यस्या अपवादः । प्रतीकचोदितासु तिसृषु महाँइन्द्रइत्यस्या माहेन्द्रगृहपे विनियोगो लिङ्गात् । नृवदित्यस्यापवादः । ऋदूदरे त्यनयोः प्रकृतिवदादित्यगृहपे ॥

आतङ्गौरीतिः शाक्त्यः ॥ (१)

आतत्त इतित्रिष्टुभं शाक्त्यौगौरीतिरपश्यत् । आदित्यगृहपस्य दध्ना अपूपे विनियोगः । अत्र द्वितीयतृतीययोर्भूरु । यज्ञो देवानामित्यस्या अपवादः ॥

इमां ते कुत्सो जगती ॥

इमां ते धियमिति जगतौ सावित्रपुरोरुचं कुत्सोऽपश्यत् । वामदेव्यापवादः ॥

---

(१) शाक्त्यइतिकाण्वपाठः ॥

अनुक्तं गायत्रं त्रैष्टुभम् ॥

अस्यां काण्डिकायामनुक्तछन्दस्कं मन्त्रगतं यथासम्भवं गायत्रं त्रैष्टुभं वा तत्रैवोदाहृतं । इतीश्वरानुज्ञामात्रः ॥ १८ ॥

अथमूर्यसुत् । सर्वमेधएव भूयते । सूर्यसुदुक्थस्तृतीयमहर्भवति इति प्रकृत्य तस्य सौर्या गृहा भवन्ति,सौर्यः पुरोरुचः सर्वं सौर्यमसदिति । तत्र सौरीः पुरोरुचोऽत्र दर्शयति ॥

सूर्यस्तुत्युक्थ्ये तृतीयेऽहनि सौर्यश्चतुर्दश पुरोरुचस्तिस्रश्च प्रतीकोक्ताः ॥

विभ्राड्बृहदित्यारभ्याकृष्णेनेत्येतत्पर्यन्ता चतुर्दश ऋचः,तं प्रकृत्याऽयं वेनश्चित्रं देवानामित्येतास्तिस्रः प्रतीकपोदिताश्चेत्येवं समुदाय ऋचः सूर्यसुत्सञ्ज्ञकसर्वमेधस्य तृतीयेऽहनि पुरोरुचो भवन्ति । ऐन्द्रवायवादिसाविचान्तानां गृहाणां पूर्वोक्तक्रमेण ग्रहणमस्ता भवन्तीत्यर्थः ॥

विभाड्बृहज्जगतीं विभाट्सौर्यः ॥

विभाड्बृहदित्येतां जगतीं ऐन्द्रवायवपुरोरुचं सूर्यपुत्रो विभाट्भिरपश्यत् । विभाड्बृहत् व्यूहः ॥

उदुत्यं तिस्रः प्रस्कण्वः ॥

उदुत्य, येनापावक,देव्यावध्वर्यू इत्येतास्तिस्रः प्रस्कण्वोऽपश्यत् । उदुत्यमित्यैन्द्रवायवस्य द्वितीया पुरोरुक् । येनापावकेतमैत्रावरुणस्य देव्यावध्वर्यू इत्याश्विनस्य । इन्द्रो विश्वाय व्यूहः । त्ववरुणेति च । दृष्टेनेति च प्रतीकपोदितासु तिसृषु तं प्रकृतिवच्छुक्रामन्थिग्रहणे विनियोगः । चित्रं देवानामित्यस्यागूयग्रहणे ॥

आनोऽगस्त्यः ॥

आनड्डाभिरितीमां त्रिष्टुभं भुवस्य पुरोरुचमभरद्वोऽपश्यत् ।

यदद्य कच्च वृतकच्चौ ॥

यदद्य कच्चेति गायत्रीं ऐन्द्राग्नपुरोरुचं वृतकच्चावृतंकच्चौ । द्यावृषी अपश्यतं । द्वितीयः सप्तकः ॥

तरणिः प्रस्कण्वः ॥

तरणिर्विश्वदृशतदृतिगायत्रीं वैश्वदेवपुरोरुचं प्रस्कण्वोऽपश्यत् । द्वितीयः सप्तकः ॥

तत्सूर्यस्य हे कुत्सः ॥

तत्सूर्यस्य, तन्मित्रस्येतीमे हे ऋचौ त्रिष्टुभौ क्रमेण मरुत्वतीययोः पुरोरुचौ कुत्सऋषिरपश्यत् ॥

वट्महा हे जमदग्निर्बृहतीसतोबृहत्यौ ॥

वट्महा,न्वट्मूर्येति हे बृहत्यौ जमदग्निर्ऋषिरपश्यत् । वट्महानित्यस्य माहेन्द्रगृहपतिर्विनियोगः । वट्मूर्येत्यस्यां आदित्यस्य प्रथमे गृहपतिः । वट्महान् । सप्तकः । वट्मूर्यस्य । दशकः ॥

आयन्नऽइव नृमेधो बृहती ॥

आयन्नऽइतिबृहतीआदित्यस्य पुनर्गृहपते पुरोरुक् अस्या नृमेधऋषिः, आद्यः सप्तकः ॥

अद्या देवाः कुत्सः ॥

अद्या देवा इतित्रिष्टुप् । कुत्सऋषिः । दध्रा आदित्यस्याग्नये विनियोगः । आद्ये व्यूहः ।

आकृष्णेन हिरण्यस्तूपआङ्गिरसः ॥

आकृष्णेनेति त्रिष्टुभं सावित्रपुरोरुचमङ्गिरसः पुत्रो हिरण्यस्तूपोऽपश्यत् । द्वितीये व्यूहः, ॥

अनाख्यातं सौर्यं गायत्रं त्रैष्टुभम् ॥

अथ कक्षिकाम्नातं कुन्दस्कं मन्थगर्गं यथायोगं गायत्रं वैष्टुभं च श्रेयम् । इतिमूर्ध्नस्तुत्समाप्तः । अथ वैश्वदेवस्तुत् । सर्वमेधएव भूयते । वैश्वदेवस्तुर्थमहर्भवतीति प्रकृत्य तत्र वैश्वदेवा गृहा भवन्ति वैश्वदेवः पुरोरुचइति । तत्र वैश्वदेवीः पुरोरुचोऽत्र दर्शयति ॥ १६ ॥

वैश्वदेवस्तुतिचतुर्थेऽहनि वैश्वदेव्यः पुरोरुचएकादशषट्प्रतीकोक्ताः ॥

प्रवावृजे सुप्रयेत्याद्या देवेभ्यो हीत्यन्ता एकादशर्चः, तं प्रकृत्य । अयं वेनः । ये देवासः, यानऽइडाभिः । विश्वेभिः सोम्य मधु । ओमामासश्चर्षणीधृतइत्येताः षट्प्रतीकर्चोदिताश्चेत्येवं सप्तदशऋचो विश्वदेवदेवत्याः वैश्वदेवस्तुत्सञ्ज्ञे सर्वमेधस्य चतुर्थेऽहनि ऐन्द्रवायवादित्या सावित्रान्तानां पुरोरुचो भवन्ति ब्रह्मणमन्त्रा भवन्तीत्यर्थः ॥

प्रवावृजे वसिष्ठस्त्रिष्टुभम् ॥

प्रवावृजइति त्रिष्टुभं ऐन्द्रवायवपुरोरुचं वसिष्ठोऽपश्यत् । चतुर्थं व्यूढः ॥

इन्द्रवायू बृहस्पतिं ह्वे मेधातिथिः ॥

इन्द्रवायू । बृहस्पतिप्रसितस्ते ह्वे गायत्री मेधातिथिरपश्यत् । इन्द्रवायूइत्यस्य ऐन्द्रवायुरस्य पुनर्ग्रहणे विनियोगः । बृहस्पतइत्यस्य मैत्रावरुणग्रहणे ॥

अधि नः कुमीदी काण्वः ॥

अधिनइत्येतां गायत्रीमाश्विनपुरोरुचं कण्वपुत्रः कुमीदी अपश्यत् । आद्यषड्कः । द्वितीयो व्यूहेन सप्तकः, तृतीयोऽष्टकः, तेनेयं वर्धमानागायत्री । अस्यास्तु षट्कसाष्टकः सा वर्धमानेत्युक्तेः । प्रतीक-

चोदितास्तु । तं प्रजापतिरुक्त्वा गृहपतये पुरोरुक् । अयं वेन इतिमन्त्रिनः, ये देवासइत्यागूयस्य । आनऽइडाभिरितिध्रुवस्य । विश्वेभिः सोम्यमित्यैन्द्राग्नस्य । यौमासइति वैश्वदेवस्य ॥

अग्नऽइन्द्र प्रतिपत्तयः ॥

अग्नइन्द्रइति त्रिष्टुभं प्रथममरुत्वतीयपुरोरुचं प्रतिपत्तयऋषिरपश्यत् । तृतीये व्यूहः ॥

इन्द्राग्नी मित्रावरुणा जगतीं काश्यपो वत्सारः ॥

इन्द्राग्नी इति जगतीमग्नेमरुत्वतीयपुरोरुचं काश्यपपुत्रो वत्सारऋषिरपश्यत् । आद्ये व्यूहः । चतुर्थएकादशकः ॥

अग्ने रुद्राः प्रगाथः ॥

अग्ने रुद्रा मेहनेतीमां त्रिष्टुभं माहेन्द्रपुरोरुचं प्रगाथऋषिरपश्यत् ॥

अर्वाञ्चोऽअद्य कूर्मो गार्त्समदः ॥

अर्वाञ्चो अद्येति त्रिष्टुभं आदित्यस्य प्रथमपुरोरुचं गृत्समदपुत्रः कूर्मऋषिरपश्यत् ॥

विश्वेऽअद्य लुशोधानाकः ॥

विश्वेऽअद्येतीमां त्रिष्टुभं आदित्यस्य पुनर्ग्रहणे पुरोरुचं धानाकपुत्रो लुशऋषिरपश्यत् । द्वितीये व्यूहः ॥

विश्वेदेवाः सुहोत्रः ॥

विश्वेदेवाः शृणुतेतीमां त्रिष्टुभं सुहोत्रऋषिरपश्यत् । आदित्यगृहस्य दध्ना अपधेयस्य विनियोगः ॥

देवेभ्यो हि वामदेवो जगतीम् ॥

देवेभ्यो हि प्रथममिति जगतीं सावित्रपुरोरुचं वामदेवोऽपश्यत् ।

प्रथमहतीयचतुर्थेषु ऋषिः ॥

अनुक्तं गायत्रं त्रैष्टुभम् ॥

अग्निप्रवावृजदित्येकादशर्चं अनुक्तं छन्दस्कं मन्त्रगणं गायत्रं त्रैष्टुभं च ज्ञेयं । तथैव प्रागुदाहृत इतिवैश्वदेवस्तु दुक्तः ॥ २० ॥

अथानारभ्याधीतं मन्त्रगणमर्वाक्पित्तमेधादादित्ययाज्ञवल्क्यौ दृष्टवन्तः ॥

अथानन्तरमर्वाक्पित्तमेधात् । अपेतोयंत्वित्ययमध्यायः पित्तमेधः तेनायमर्थः । प्रवायुमित्यत आरभ्यापेतो यन्त्वित्यतआग्नेयर्तमानं मन्त्रगणंमन्त्रसमूहं आदित्ययाज्ञवल्क्यावृषी दृष्टवन्तः । कीदृशं मन्त्रगणं अनारभ्याधीतं । कञ्चन कर्मविशेषमारभ्योपक्रम्याधीतमारभ्याधीतं, न आरभ्याधीतमनारभ्याधीतं । श्रौतकर्मविशेषे कुत्राप्यविनियुक्तमित्यर्थः ॥

प्रवायुं पञ्चदशर्चः पुरोरुगणो हे च प्रतीकोक्ते ॥

प्रवायुमच्छेत्यतआरभ्य पञ्चदश संख्या ऋचस्तत्प्रत्यया, अयं वैनइतीमे हे प्रतीकोक्ते चेत्येवं सप्तदशर्गात्मकः पुरोरुगणः पुरोरुक्समूहः ॥

प्रवायुरृजिश्वा ॥

प्रवायु मतीमां त्रिष्टुभं ऋजिश्वऋषिरपश्यत्पश्यत् । लिङ्गाद्वायुर्देवता । इन्द्रवायूइत्यस्याः सर्वं प्रागुक्तम् ॥

मित्रठ०ऽहवे हे मधुच्छन्दाः ॥

मित्रठ० हुवे, दस्रायुवाकवइतीमे हे गायत्र्यौ मधुछन्दाऽपश्यत् ॥

मित्रं लिङ्गोक्ता ॥ (१)

(१) लिङ्गोक्तदेवत्याः । इतिकाण्वपाठः ॥

मित्रश्चं० द्वे इतीयमृक्त्रिष्टोभा मित्रावरुणदेवता ॥

दक्षा युवाक्षऽआश्विनी ॥

दक्षेत्येषा भग्निदेवत्या । तं प्रजापतेयं वेनदित्यनयोरुक्तम् ॥

विदद्यदैन्द्रीं कुत्सिकः ॥

विदद्येतीमां त्रिष्टुभं इन्द्रदेवत्यां कुत्सिकोऽपश्यत् । द्वितीयद्वतीयस्योर्ध्वः ॥

नहि स्वग्नं विश्वामित्रो वैश्वानरीम् ॥

नहि स्वग्नमितीमां त्रिष्टुभं वैश्वानरदेवतां विश्वामित्रोऽपश्यत् । द्वितीयो दशकः । तृतीयो द्वादशकः, तेन पूर्तिः ॥

उग्रा विघनिनैन्द्राग्नीं भरद्वाजः ॥

उग्रा विघनिनेतीमां गायत्रीमिन्द्राग्निदेवतां भरद्वाजोऽपश्यत् । द्वितीयसप्तकः ॥

उपास्मै गायतेतीमां गायत्रीं सोमदेवत्यां देवलो वा असितो वा ऋषिरपश्यत् । द्वितीये व्यूढः ॥

ये त्वा मित्रावरुणः ॥

ये त्वा हि इत्यृतीमां त्रिष्टुभं विश्वामित्रऋषिरपश्यत् । इन्द्रोदेवता । चतुर्थे व्यूढः ॥

जनिष्ठाऽउग्रो गौरीवितिः ॥

जनिष्ठाऽउग्रइतीमां इन्द्रदेवत्यां त्रिष्टुभं गौरीवितिरपश्यत् ॥

आ तू वामदेवः ॥

आ तूनऽइन्द्रेतीमामृषभमिन्द्रदेवत्यां गायत्रीं वामदेवोऽपश्यत् ॥

तृचऐन्द्राः ॥

ये त्वा हि इत्ये । जनिष्ठाउग्रः, आ तून इत्ययं तृच ऐन्द्रदेवतः ॥

त्वमिन्द्रयौ नृमेधः पथ्याबृहतीसतोबृहत्यौ ॥

त्वमिन्द्र, अनुत, इतीमे च द्वे ऐन्द्र्यौ इन्द्रदेवत्ये ऋचौ नृमेध पथ्या बृहतीसतोबृहत्यौ नृमेधऋषिरपश्यत् । त्वमिन्द्रेति पथ्याबृहती । प्र नूनइतिसतोबृहती । त्वमिन्द्र, त्व तूर्य, व्यूह ॥

यज्ञो देवानां कुत्सः ॥

यज्ञो देवानामितित्रिष्टुभमादित्यदेवत्यां कुत्सऋषिरपश्यत् । आदित्यायाज्ञवल्क्याभ्यां कुत्सस्य बाधो मा भूदितिपुनरुक्तं । अतएव विना वचनं पूर्वोक्तऋषिर्न भवतीति गम्यते ॥

अदब्धेभिः सावित्रीं जगतीं भरद्वाजः ॥

अदब्धेभिरितीमां सवितृदेवत्यां जगतीं भरद्वाजोऽपश्यत् ॥ २१ ॥

प्रवीरया पञ्चदशर्चः पुरोरुगग्नो द्वे च प्रतीकोत्ते ॥

प्रवीरयेत्याद्या, अदब्धेभिरित्यन्ताः पञ्चदशसङ्ख्याऋचः, तं प्रत्यग्नाऽयं वेनइति द्वे प्रतीकचोदिते चेत्येवमेव सप्तदशः पुरोरुमन्त्रः पुरोरुचां व्यूहः ॥

प्रवीरया वसिष्ठो वायव्याम् ॥

प्रवीरयेति त्रिष्टुभं वायुदेवतां वसिष्ठोऽपश्यत् । अन्त्ययोर्व्यूहः । गायत्रउपेत्यस्य प्रागुक्तम् ॥

काव्ययो राजानेषु दक्षः ॥

काव्ययोरितीमां गायत्रीं मित्रावरुणदेवतां दक्षोऽपश्यत् । देव्याऽदब्धैर्यूं, तं प्रत्यग्नाऽयं वेन इत्येतेषां प्रागुक्तम् ॥

तिरश्चीनः परमेष्ठीप्रजापतिर्भाववृत्तम् ॥ (१)

तिरश्चीनो विततः इत्येतामृचं भाववृत्तसंज्ञं परमेष्ठीप्रजापतिरपश्यत् । प्रजापतिर्वा परमेष्ठीऋषिः । भाववृत्तं भावानां पदार्थानां-

(१) तृचामित्याश्वकः काण्वसर्वानुक्रमणातो वेदितव्यः ॥

मां वृत्तिः सूक्ष्मादिवृत्तिर्यस्य देवता । तद्भाववृत्तं । यस्य भाववृत्तं देवता विश्वेदेवा देवता वा ॥

आरोदसी जगतीं विश्वामित्रः ॥

आरोदसी इतीमामृचं जगतीं वैश्वानरदेवतां विश्वामित्रोऽपश्यत् । आद्ये व्यूहः ॥

उक्थेभिर्इत्यृचमात्रसिष्ठः ॥

उक्थेभिरितीमां गायत्रीं वसिष्ठोऽपश्यत् । इन्द्राग्नी देवता ॥

उपनः सूनवइतीमाम् ॥

उपनः सूनवइतीमां गायत्रीं विश्वेदेवदेवतां सुहोत्रऋषिरपश्यत् । द्वितीये व्यूहः ॥

ब्रह्मणि मेऽगस्त्यः हे इन्द्रमरुत्सँव्वादे ॥

ब्रह्मणि मे । अनुत्तमातऽइतीमे हे ऋचौ त्रिष्टुभौ इन्द्रमरुत्सँव्वादे अगस्त्यस्सविरपश्यत् । इन्द्रोमरुत्वानमयं देवता । आद्याश्चते व्यूहः ॥

तद्दाधर्षीर्बृहद्दिवः ॥

तद्दाधर्षीतीमामृचं त्रिष्टुभमथर्वाचः पुत्रो बृहद्दिवऋषिरपश्यत् । अस्या महेन्द्रदेवता ॥

इमाऽउ त्वा हे बृहत्यौ मेधातिथिः ॥

इमाऽउ त्वा, यस्यायमितिहे ऋचौ बृहत्यौ मेधातिथिर्ऋषिरपश्यत् । अनयोरादित्यो देवता । यस्याऽयं । व्यूहः ॥

अयꣳ सहस्रं मेधातिथिः सतोबृहतीम् ॥

अयꣳ सहस्रमितीमामृचं सतोबृहतीं मेधातिथिरपश्यत् । अस्याप्यादित्यो देवता । चतुर्थी व्यूहः । अदब्धेत्यष्टोत्तम् ॥ २२ ॥

आनस्त्रयोदशर्चः पुरोरुगणश्चतुर्ऋचं प्रतीक्षो-

दितं च ॥

आनो यज्ञमित्यारभ्याध्यायसमाप्तिपर्यंतायाश्चतुर्दशसंख्याकाया ऋचो ऽत्र लाक्षणिकत्वात् चतुर्दशर्चं चैत्ये चित्यां समदग्नयः पुरोरुग्मयः । ऐन्द्रवायवादिसावित्रान्तानां ग्रहाणां ग्रहग्रहणमन्त्राणां समूहः ॥

आनो वायव्यां जमदग्निः ॥

आनो यज्ञमितीमामृचं बृहतीं वायुदेवतां जमदग्निर्ऋषिरपश्यत् । तृतीयएकादशकस्तेनैकोना ॥

इन्द्रवायू सुसंदृशेन्द्रवायव्यां तापसः ॥

इन्द्रवायू सुसंदृशेतीमां बृहतीमिन्द्रवायुदेवतां । तापसऋषिरपश्यत् ॥

ऋधगित्था मैत्रावरुणीं जमदग्निः ॥

ऋधगित्थेतीमां बृहतीं मित्रावरुणदेवतां जमदग्निऋषिरपश्यत् । आद्ये व्यूहः ॥

आयातमाश्विनीं वसिष्ठः ॥

आयातमितीमां बृहतीमश्विदेवतां वसिष्ठोऽपश्यत् । तृतीये व्यूहः ॥

प्रेतु वैश्वदेवीं कण्वः ॥

प्रेतु ब्रह्मणस्पतिरिति बृहतीं विश्वेदेवदेवतां कण्वऋषिरपश्यत् । आद्ययोर्व्यूहः । तृतीय एकादशः ॥

चन्द्रमा अप्स्वैन्द्रीमाकूतिपरिणामवादिनीं त्रित आप्त्यः ॥

चन्द्रमा अप्स्विति बृहतीमिन्द्रदेवतामाकूतिपरिणामवादिनीं त्रित आप्त्यऋषिरपश्यत् । आद्ये व्यूहः ॥

देवं देवं वो मनुर्वक्षतो वैश्वदेवीम् ॥

देवं देवं वक्षतीमां बृहतीं विश्वदेवदेवतं । विवक्षतोऽपरं ऋषिं विरपश्यत् । आद्यान्तयोर्व्यूढः ॥

दिवि पृष्टो मेधऐन्द्रः ॥

दिवि पृष्टबृहतीमं बृहतीम् । इन्द्रपुत्रो मेधा ऋषिरपश्यत् । वैश्वानरो देवता ॥

इन्द्राग्नोऽअपात्सुहोत्रः ॥

इन्द्राग्नोऽअपादितीमां बृहतीं सुहोत्रऋषिरपश्यत् । इन्द्राग्नीदेवता । पञ्चमहितीयचतुर्थयु व्यूढः ॥

देवासो हि मनुः ॥

देवा सो हीतीमां सतोबृहतीं मनुरपश्यत् । विश्वे देवादेवता ॥

अपाधमद्दुनमेधः ॥

अपाधमत् । प्रवदतीमे दे । नृमेधऋषिरपश्यत् । तत्रापाधमदिति सतोबृहती । प्रवदति बृहती इन्द्रो मरुत्वान्उभयोर्देवता ॥ अथेन्द्रो । व्यूढः । मरुतो ब्रह्मा । व्यूढः ॥

अश्वेन्मेधातिथिः ॥

अश्वे दिन्द्रवतीमां सतोबृहतीं मेधातिथिरपश्यत् । मरुद्देवता ॥ आद्ये व्यूढः । प्रतीकालानां सर्वं प्रागुक्तम् ॥

दशम्येकादश्यन्त्या च सतोबृहत्यः ॥

आजा यज्ञमितिचयोदशर्चे दशमी,देवासो हिषेत । एकादशी अपाधमदिति चान्त्या वाऽस्थेद्विन्द्रवति एताभिस्तिस्रः सतोबृहत्यः । "अयुजौ जागतौ सतोबृहतीति तत्रचत्वम्" ॥

मेधा बृहत्यः मेधा बृहत्यः ॥

दशम्येकादश्यन्त्याभ्योऽन्याः मेधा दश ऋचो बृहत्यः बृहतीछन्द-

स्काः । हिरण्यास्रोऽध्यायपरिसमाप्तिज्ञापनार्थः । इतिश्रीविरूपाक्षविलासाटव्यपतिविजयकृतकृष्णयाज्ञिकश्रीदेवकृते सर्वानुक्रमणिकाभाष्याख्याने तृतीयोऽध्यायः ॥

यज्ञायतः षड्चं मानसं त्रैष्टुभं० शिवसङ्कल्पः ॥

यज्ञायतः । येन कर्माणि । यत्प्रज्ञानं, येनेदं, यस्मिन्नृचः । सुवारथिरित्येतत्षड्चं मानसं मनोदेवतं त्रिष्टुप्छन्दस्कं शिवसङ्कल्पसंज्ञमध्यात्मविद्यम्यात । अथवा शिवसङ्कल्पसंज्ञमध्यात्मविद्यम्यात । ऋषी त्वादित्यथाग्नयवस्वा वेव । तदु सुप्तस्य हो व्यूहो । यस्मान्नऽऋतं भयोदृश्यकः । तेन दृश्यधिका, नेनीयते हादृश्यकः ॥

पितुंनु स्तोषमितीमामुष्णिहमगस्त्योऽन्नस्तुतिम् ॥

पितुंनु स्तोषमितीमामुष्णिहमगस्त्यऋषिरपश्यत् । इयमन्नस्य स्तुतिः । अन्नदेवतेत्यर्थः, अष्टाग्रः पञ्चकः । ततस्त्रयोऽष्टकाः । तृतीये व्यूहः । अतइयमनुष्टुब्गर्भोष्णिगुच्यते । आद्याः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भेतिवचनात् ॥

अन्वित्पतृचमानुष्टुभम् ॥(१)

अन्वित्पतृचमानुष्टुभं त्रिष्टुप्छन्दस्कम् ॥

द्वयोरनुमतिः ॥

अस्मिन्पतृचे चाद्ययोर्द्वयोर्ऋचोरन्वित्, अनुमतेत्येतयोरनुमतिर्देवता । अन्वित्व्यूहः । अनुमः व्यूहः ॥

द्वयोः सिनीवालि सरस्वत्यौ ॥

अस्मिंपतृचे चान्त्ययोर्द्वयोर्ऋचोः सिनीवालि पृथुष्टुकेत्येतयोः सिनीवालिसरस्वत्यौ यथाक्रमं देवते । सो देये व्यूहः ॥

सिनीवालि पृथुष्टुके इे वृत्समदः ॥

---

(१) अन्वित्पतृचमानुष्टुभमाद्यायाः । अनुक्रमणीसर्वानुक्रमपाठो भेद्यः ॥

सिनीवालि पृथुष्टुके पञ्चमद्वितीये हे ऋची गृत्समदऋषिरपश्यत् ॥

त्वमग्ने हे आग्नेय्यौ जगत्यौ धिरण्यस्तूपाङ्गिरसः ॥

त्वमग्ने प्रथमः, त्वंनो ऽग्ने तव देवेतीमे हे ऋचावग्निदेवत्ये । जगत्यौ धङ्गिरसः पुत्रो धिरण्यस्तूपोऽपश्यत् । त्वमग्ने । त्वंनो । व्यूढः । सर्वासां रचो ही व्यूढो ॥

उत्तानाया हे देवश्रवा देववातश्च भारतौ ॥

उत्तानायामव । इडायास्पदेतीमे हे ऋचावग्निदेवत्ये भरतपुत्रौ देवश्रवा देववातश्चेतीमौ हौ ऋषी अपश्यतां, आग्नेय्यावित्यनुवर्तते ॥

आद्या त्रिष्टुप् ॥

पूर्वोत्तयोर्हयोराद्या उत्तानायामित्येषा त्रिष्टुप् ॥

द्वितीयाऽनुष्टुप् ॥

इडायास्पदेति द्वितीयाऽनुष्टुप् । नाभा । व्यूढः ॥

प्रमन्महे नोधा वृष्यचमैन्द्रं त्रैष्टुभम् ॥

प्रमन्महे प्रवोमहे, इत्येतदृष्यचमिन्द्रदेवत्यं त्रिष्टुपछन्दस्कं नोधाऋषिरपश्यत् । सर्वासामर्के । भाङ्गूर्यं । व्यूढः ॥

इच्छन्ति त्वा वृष्यचमैन्द्रं त्रैष्टुभमेव देवश्रवा देववातश्च भारतौ ॥

इच्छन्ति त्वा, न ते दूरे, इत्येतदृष्यचं इन्द्रदेवत्यं त्रिष्टुपछन्दस्कमेव भारतौ भरतपुत्रौ देववातश्रवश्रौ अपश्यतां, इच्छन्ति व्यूढः ॥ १ ॥

अघाढँय्यु॒ष, गोतमऋतुर्ऋचं वैष्टुभꣳसौम्यम् ॥

अघाढं यु॒ष, सोमो धेनु॑, त्वमिमा,देवेन,नदृत्येतमृचतुर्ऋचं त्रिष्टु॒प् छन्दस्कं सोमदेवत्यं गोतमऋषिरपश्यत् । स्वर्णमघा, सोमो धे॒नुं । व्यूढ । सादस्यं । द्वौ व्यूहौ । त्वमिमा । व्यूढ । त्वमपः । द्वौ व्यूहौ, त्वमातनत्य । द्वौ व्यूहौ । त्वं ज्योतिषा । व्यूढा । रात्रौ भा॒गं । हादश्यक्षः । मा त्वा तनत् । व्यूढ ॥

अष्टौ व्यश्नुतुर्ऋचं वैष्टुभꣳ सावित्रमाङ्गिरसो हिरण्यस्तूपः ॥

अष्टौ व्यश्नत् हिरण्यस्तूपश्चेतमृचतुर्ऋचं सवितृदेवतं त्रिष्टुप्छन्दस्कं अङ्गिरसोऽपत्यं हिरण्यस्तूपऋषिरपश्यत् ॥

द्वितीया जगती ॥

अत्र चतुर्ऋचे हिरण्यपाणिः सवितेत्येषा द्वितीया जगती । अष्टौ वि, चीधत्य । दधत् । व्यूढः । आङ्गिरसेन हादश्यक्षः । सुहवीकः, द्वौ व्यूहौ । ये ते व्यूढः ॥

उभा पिबतमाश्विनं हृचम् ॥

उभापिबतं । अप्रम्वतीमश्विना, द्युभिरक्तोभिरित्येतसृचं आश्विनं । अश्विदेवत्यम् ॥

उभापिबतं प्रस्कण्वो गायत्रीम् ॥

उभा पिबतं इतीमामृचं गायत्रीं प्रस्कण्वोऽपश्यत् ॥

अप्रम्वतीमश्विना त्रिष्टुभौ कुत्सः ॥

अप्रम्वतीमश्विना, द्युभिरक्तुभिरितीमे ऋचौ त्रिष्टुभौ कुत्सऋषिरपश्यत् । अश्व्यूढे । द्वौ व्यूहौ । आङ्गिरसेनेत्यत्र प्रायुक्तम् ॥

आरात्रि पथ्यावृहतीर्ठं रात्रिदेवत्यां कश्यपो भरद्वाजदुहिता ॥

आरात्रे पार्थिवमितीमामृचं रात्रिदेवत्यां पथ्यावृहतीं भरद्वाजदुहिता कण्विपालाक्षी अपश्यत् ॥

उषस्तदुषस्यां परोष्णिहं गोतमः ॥

उषस्तदितीमामृचमुषस्यां उषादेवतां परोष्णिहं परोष्णिक्छन्दस्कां गोतमऋषिरपश्यत् ॥

प्रातरग्निं वसिष्ठः सप्तर्चम् । (१)

प्रातरग्निं, प्रातर्जितं, भगमुग्रं, उतेदानीं । भगएव । समध्वराय । अश्वावतीरित्येतत्सप्तर्चं वसिष्ठऋषिरपश्यत् ॥

आद्या जगती बृहद्देवत्या ॥

अस्मिन्सप्तर्चे आद्या प्रातरग्निमित्येषा जगतीछन्दस्का बृहद्देवत्या अग्नीन्द्रमित्रावरुणाग्निभगपूषब्रह्मणस्पतिसोमरुद्रदेवतेत्यर्थः । चतुर्थे एकादशक ॥

पञ्च भगदेवत्यास्त्रिष्टुभः ॥ (२)

प्रातर्जितमित्याद्याः पञ्च ऋचो भगदेवत्यास्त्रिष्टुभः । राजा चिद्यं । प्रगृभ्नृभे । उतेदानीं । उतो दता । वयं देवानां । तेन वयं । समध्वराय । एषु सूक्त ॥ रथंभव । द्वादशकः ॥

अन्त्योषस्या ॥ (३)

त्रिष्टुबित्यनुवर्तते । अश्वावतीरित्येषा त्रिष्टुप् सप्तर्चस्यान्त्याऽषस्या उषादेवतेत्यर्थः ॥ अन्त्ये व्यूढः ॥

पूषन्तव सुहोत्रः ॥

पूषन्तवेतीमामृचं सुहोत्रऋषिरपश्यत् ॥

---

(१) प्रातर्जितं भग वसिष्ठो भगदेवत्यां त्रिष्टुभम् ॥

(२) प्रातर्जितं भग वसिष्ठो भगदेवत्यां त्रिष्टुभमिति काण्वसर्वानुक्रमाष्टकः ॥

(३) इदं काण्वसर्वानुक्रमे नास्ति ॥

पथस्पथः परिपतिवृजिम्नः ॥

पथस्पथऽइतीमामृचमग्निदेवतां भरद्वाजऋषिरपश्यत् ॥

एते पौष्ण्यौ गायत्रीत्रिष्टुभौ ॥

एते ऋचौ पूषं तव पथस्पथ, इत्येते पौष्ण्यौ पूषदेवत्ये यथाक्रमं गायत्रीत्रिष्टुभौ । पूषमिति गायत्री । पथस्पथऽइति त्रिष्टुप् । क्रमेण । सनो दासत् ॥

त्रीणि पदा वैष्णव्यौ गायत्र्यौ मेधातिथिः ॥

त्रीणि पदा, तद्विष्णोरिति वैष्णव्यौ विष्णुदेवते गायत्रीछन्दस्के मेधातिथिर्ऋषिरपश्यत् । विष्णुर्गोपाः । व्यूढः ॥

घृतवती भुवनानां भरद्वाजो द्यावापृथिव्या जगतीम् ॥(१)

घृतवती भुवनानामितीमामृचं द्यावापृथिवीदेवतां जगतीछन्दस्कां भरद्वाजऋषिरपश्यत् ॥

ये नो लिङ्क्तोक्तदेवतां त्रिष्टुभं विश्व्यः ॥

ये नः सपत्ना इतीमामृचं लिङ्क्तोक्तदेवतां त्रिष्टुभं विश्व्यऋषिरपश्यत् । इन्द्राग्नी वसवो रुद्रा आदित्याश्चाप लिङ्क्तोक्ताः । वसवो रुद्राश्चतुर्ऋचकः ॥

आ नासत्या हिरण्यवर्तेव आश्विनीं जगतीम् ॥

आ नासत्या इतीमामृचमश्विदेवत्यां जगतीछन्दस्कां हिरण्यस्तूपऋषिरपश्यत् ॥

एष वो मारुतीं त्रिष्टुभमगस्त्यः ॥

एष व इतित्रिष्टुभं मरुद्देवत्यां अगस्त्योऽपश्यत् । मांदार्यश्चा हो

---

(१) अत्र सूत्रेऽनुस्वाराभावात् काण्वसर्वानुक्रमपाठो बोध्यः ॥

ब्यूढौ। एषा यासीष्ट। व्यूढे ऋतेऽपि दशकः॥

सप्तस्तोमाऋषिसृष्टिप्रतिपादिकानु त्रिष्टुभं मन्त्रः प्राजापत्यः॥

सप्तस्तोमा इतित्रिष्टुभमृषिसृष्टेः प्रतिपादयित्रीं प्रजापतेः सुतो यज्ञऋषिरपश्यत्। ऋषयो देवताः। सप्तस्तोमा द्वादशकः, अन्त्यो दशकः॥

आयुष्यं वर्चस्यं रयिं दत्त उष्णिक्प्रकृतीरुष्णिग्भो हिरण्यस्तुतिः॥

आयुष्यं। न तत्। यदाबद्धन्। रयिमेतत्तृचं दत्तऋषिरपश्यत्। अस्मिन्सूक्ते तिस्र ऋचो यथाक्रममुष्णिक्प्रकृतीरुष्णिगुष्णिक्छन्दस्काः। षट्पञ्चाशदक्षरा प्रकृतीः। तत्र आयुष्यमुष्णिक्। आद्यः षडृचः, द्वितीयः सप्तर्चः। द्वौ अष्टकौ। तेनाधिका पुरउष्णिगियं। न तत्। प्रकृतीरेकाधिका। यदाबध्नन्। त्रिष्टुप्। तृतीयो द्वादशकः, चतुर्थो दशकः। एतत्तृचं हिरण्यस्तुतिः। हिरण्यदेवतमित्यर्थः॥

उत नऽऋजिश्वो बहुदेवत्यान्न त्रिष्टुभम्॥

उत नऽइतित्रिष्टुभं बहुदेवत्यां ऋजिश्वोऽपश्यत्। उत नः द्वौ व्यूढौ। अहिर्बुध्न्यः, अजएकपात्। पृथिवी समुद्रः, विश्वेदेवाश्च देवताः॥

इमा गिरः कूर्मो गार्त्समदऽआदित्यदेवत्यां त्रिष्टुभम्॥

इमा गिरऽइतीमामृचमादित्यदेवत्यां त्रिष्टुभं गृत्समदपुत्रः कूर्मऋषिरपश्यत्॥

सप्त ऋषय इतीयमध्यात्मवादिनी जगती॥

सप्त ऋषय, इतीयमध्यात्मवादिनी जगती सप्त ऋषयो देवता। एकाधिका। पादाक्षरनियमो नास्ति॥

उत्तिष्ठ ऋचो ब्राह्मणस्पत्यः ॥

उत्तिष्ठ, प्रनूनं । ब्रह्मणस्पते इत्यस्य ऋचो ब्रह्मणस्पतिर्देवता ॥

आद्ये बृहत्यौ कण्वो घौरः ॥

अस्मिंस्तृचे उत्तिष्ठ, प्रनूनमितीमे आद्ये ऋचौ बृहत्यौ घौरो घोरपुत्रः कण्वऋषिरपश्यत् । देवयन्त व्यूढः । मन्त्र । इमे व्यूढे ॥

अन्त्या त्रिष्टुभं गृत्समदः ॥

अन्त्यां ब्रह्मणस्पतइतीमां त्रिष्टुभं गृत्समदोऽपश्यत् । बृहस्पतये । व्यूह. ॥

यऽइमां चतुर्ऋचं प्रतीकोक्तम् ॥

यऽइमां चतुर्ऋचं प्रतीकोक्तम् । यऽइमा विश्वा भुवनानि । विश्वकर्मा ह्यजनिष्ट, यो न. पिता जनिता । अवपतेऽवभ नो देहीत्येतच्चतुर्ऋचमनाध्याये प्रतीकोक्तम् । पूर्वमेव पठितत्वाच्चातुर्वाय्यादिमात्रेणोपात्तम् ॥

अपेतोऽध्यायः पित्र्यऽआदित्यस्य देवानां वा ॥ (१)

अपेतो यन्त, एषयऽइत्यमध्याय पित्र्यः पितृदेवत्यः । आदित्यस्यार्षम् । आदित्योऽस्या ऋषिरित्यर्थः । देवानां वा, देवा वा अस्याध्यायस्य ऋषय इत्यर्थः ॥

आद्या गायत्री परं यजुः ॥

अस्मिन्नध्याये आद्या अपेत, इति गायत्री । ततः परं । यु भिरक्षो-भिरित्येतद्यजुः सामपड्क्तिः । पलायशाखया व्यूढत्वेन विनियोगोऽस्याः ॥

सविता ते गायत्री ॥

---

(१) अपेतोऽनुवाकः पित्र्यऽआदित्यस्यार्षं देवानां वेति काण्वसर्वानुक्रमपाठः ॥

सविता ते शरीरेभ्य, इति गायत्री । अपे विनियुक्ता ॥

वायुः पुनात्विति चत्वारि लिङ्गोक्तानि ॥

वायुः पुनात्वित्यादीनि चत्वारि यजूंषि लिङ्गोक्तवाय्वादिदेवतानि । चतसृणां सीतानां कर्षणे विनियुक्तानि । वायुः । दैवी पङ्क्तिः । सविता । दैवी त्रिष्टुप् । अग्नेः । दैवी पङ्क्तिः । सूर्यस्य । दैवी त्रिष्टुप् । विमुञ्चन्तां । दैवी जगती । अनड्वाहीके विनियोगः । अनड्वाहो देवताः । अग्नेत्वेत्यस्य सर्वौषधवपने विनियोगः ॥

सविता ते गायत्री ॥

सविता ते शरीराणीति गायत्री । अक्षनिवापे विनियोगः । प्रजापतौ त्वा । आर्षी बार्हतगर्भा । प्राजापत्या त्रिष्टुब् वा । अक्षनिवाप एव विनियोगः ॥

परं मृत्यो सङ्कुसुकस्त्रिष्टुभं मृत्युदेवत्याम् ॥

परं मृत्यो इति त्रिष्टुभं मृत्युदेवत्यं सङ्कुसुकोऽपश्यत् । अपे विनियोगः ॥

शुँवातोऽनुष्टुब्बृहत्यौ वैश्वदेव्यौ ॥

शुँवातः, कल्पतां इतीमे द्वे ऋचौ यथाक्रममनुष्टुब्बृहत्यौ विश्वे देवा देवताः । अक्ष्नां यथाङ्गं कल्पने विनियोगोऽनयोः । आपः अग्रियतमाग्र्यचतुर्दशकः, तेन दृष्ट्यधिकः ॥

अग्नन्वती सुचीकस्त्रिष्टुभं वैश्वदेवीम् ॥

अग्नन्वतीरित्यत इतीमां त्रिष्टुभं विश्वदेवदेवतां सुचीकस्त्रिरपश्यत् । अध्वगमने विनियोगो ऽस्याः । अचाऽङ्गीमः । व्यूढः ॥

अपाद्यं लिङ्गोक्तदेवतामनुष्टुभर्धं० शुनःशेपो दुःस्वप्ननाशनीम् ॥

अपाद्यमितीमामृचं लिङ्गोक्तदेवतामनुष्टुप्छन्दस्कां दुःस्वप्ननाश-

नौ हुवः शीर्षक्षिरपश्यत् । अपामार्गैरपमार्जने विनियोगः । चतुर्थ्योर्ध्वूहः । सप्तमिष्वा न इत्यस्य प्रागुक्तम् । आने विनियोगः ॥

अनड्वाहमानडुह्यनुष्टुप् ॥ (१)

अनड्वाहमित्यारभ्याह, इतीयमृक् आनडुही अनड्वद्देवता अनुष्टुप् छन्दः अनड्वत्पुच्छाल्यारभ्ये विनियुक्ता । उदयमित्यस्य तु प्रागुक्तम् । आगमने विनियोगः ॥

इमं जीवेभ्यः सङ्कुसुको मृत्युदेवत्यां विष्टुभम् ॥

इमं जीवेभ्य, इति विष्टुभं मृत्युदेवत्यां सङ्कुसुकोऽपश्यत् । आगच्छ-प्रागाम्रे मर्यादालोष्टनिधाने विनियोगः ॥

आयुष्मानग्नऽआग्नेयीं विष्टुभं वैखानसः ॥ (२)

आयुष्मानग्न, इतीमामग्निदेवतां विष्टुभं वैखानसऋषिरपश्यत् । औपासने चाहुतिहोमे विनियोगोऽस्याः । आदितीयो दशकः । चतुर्थो द्वादशकः ॥

परीमेऽनुष्टुभमैन्द्रीं भारद्वाजः गिरिंबिठः ॥

परीमे गामित्यनुष्टुभमिन्द्रदेवतां भरद्वाजस्यापत्यं गिरिंबिठऋषिरपश्यत् । परिदापदने विनियोगोऽस्याः । द्वितीययोर्ध्वूहः ॥

क्रव्यादमग्निं विष्टुभमाग्नेयीं दमनः ॥

क्रव्यादमग्निमिति विष्टुभं अग्निदेवतं दमनऋषिरपश्यत् । अङ्गारौपासनस्य विरसने विनियोगोऽर्धस्य । द्वयेषामित्युत्तरार्धस्य लुपे विनियोगः ॥

वसवयाज्ञातवेदसी विष्टुप् ॥

---

(१) आनुष्टुभमिति काण्वसर्वानुक्रमपाठः ॥

(२) इदं सूक्तं पूर्वपरीमार्गेण काण्वसर्वानुक्रमे पाठो बोध्यः ॥

वह्व्यपामितोऽमुक् जातवेदसो जातवेदोदेवता त्रिष्टुप् । अन्त्य-
[illegible] विनियोगोक्तः ॥

स्योना पृथिवि नेशातिथिः पार्थिवीं गायत्रीम् ॥

स्योना पृथिवीतिगायत्रीं पार्थिवीं पृथिवीदेवतां वसुरक्तां मेधा-
तिथिऋषिरपश्यत् । अस्या अन्ते अयनः शोशुचदग्निमिति यजुः ।
प्राजापत्या गायत्री । अस्य सत्यधिमरक्षनिमित्ते स्वानि विनियोगः ॥

अस्मात्त्वमाग्नेयी गायत्र्यग्निरुक्ता ॥

अस्मात्त्वमधिजातोऽसीति गायत्री अग्निदेवता । अग्निरुक्ता मध्येऽ-
ग्निपदप्रयोगशून्या । साग्निकस्य पात्रप्रतिपत्त्यन्ते दाहात्पूर्वं पाठ्या-
हुतिरूपेमे विनियुक्तम् ॥ ४ ॥

ऋचं वाचम्यज्ञाध्यायी दध्यङ्ङाथर्वणो दध्यङ्नित्याग्ने-
येधिकवर्जम् ॥

ऋचं वाचं । देवस्य त्वा वै, स्वाहा प्राणेभ्यः, देवावायज्ञिरीमां प-
ञ्चाध्यायीं अग्निकाण्डमेधिकमन्त्रवर्जितामथर्वणः पुत्रो दध्यङ्ङृष-
िर्ददर्श । दृष्टवान् । "दध्यङ् ह वा आथर्वण एतर्हि० शुक्रमेतं यज्ञविदां
चकारेति श्रुते": । पञ्चानामध्यायानां समाहारः पञ्चाध्यायी । अथा-
पवाद आग्निकाण्डमेधिकवर्जमिति, उपरि भीमयेत्येतदाग्निकम् । अ-
ग्निर्ठ० हृदयेनेत्याद्यध्यायसमाप्तिं यावदाग्नेयमेधिकं तदर्थवित्वा ।
आग्निकस्याग्नेयमेधिकस्य च गायत्र्यृषिरित्यर्थः । वैश्वदेव इति बहुदेवत
इत्यर्थः । तथा च यास्कः । "यत्तु किंचिद्बहुदेवतं वैश्वदेवानां स्वाने शु-
श्रुते यदेव विश्वकृमिति शाकपूणिरिति" ॥

चात्वालोऽध्यायः प्रजापतिर्वैश्वदेवः ॥

अथ पञ्चाध्याय्यामाद्यः प्रथम ऋचं वाचमित्यस्यभाष्यो विश्वदेव-
देवतः प्राजापत्यः । प्रथमे [illegible] ऋषिरित्यर्थः ॥

आयानि यजूंष्यि ॥

आयानि ऋचं वाचमित्यादीनि यजूंषि । ऋचौ चतुर्थौ देवीजगतीच्छन्दः । वायोजः यजुर्जगती । त्रिवृत्तोमा ऋगादया देवताः ।

यन्मे वार्हस्त्या पङ्क्तिः ॥

यन्मे छिद्रमितीयं बृहस्पतिदेवत्या पङ्क्तिः । व्यूहेन चत्वारिंशदक्षरत्वात् । अच भूर्भुवः स्वस्तवितुः । कयानश्चित्र, इति ऋचस्य छन्दोदेवतादि सर्वं प्रागुक्तम् । ऋषिरत्र दध्यङ्ङाथर्वण एवेति विशेषः ॥

कया त्वमैन्द्र्यनिरुक्ता गायत्री ॥

कया त्वं न, इतीयं गायत्री अनिरुक्ता ऐन्द्री इन्द्रपदप्रयोगं विनापीन्द्रदेवत्या । आद्ये द्वे व्यूहौ ॥

इन्द्रो विश्वस्य विराड्द्विपदा ॥

इन्द्रो विश्वस्येतीयमृक् विराड्द्विपदा । इन्द्रो देवता । विंशत्यक्षरा द्विपदा विराडित्युच्यते । तथा चोक्तमृग्वेदानुक्रमण्याम् । विंशतिका द्विपदा विराज इति" । तथा तदर्धमेकपदा । एतदर्धं विंशत्यर्धं या एकपदा दशाक्षरेत्यर्धं । साऽपि विराडुच्यते ॥

प्रं नो हे अनुष्टुभौ ॥

प्रंनोमित्रः, प्रंनोवात इती मे हे ऋचौ अनुष्टुभौ । प्रंनो भवतु व्यूहः । प्रंनोवात, इत्यत्र द्वौ समर्धौ । तेन व्यूना । मित्रवरुणादयो त्रिवृत्तोमा देवताः ॥

अहानि द्विपदा गायत्री ॥

अहानि प्रमितीयं द्विपदा गायत्री । अहानि रात्रयश्च देवताः ॥

अग्निं न इन्द्राग्नी विष्टुगार्ष्यौ ॥ (१)

अग्निं न इन्द्राग्नी, अग्नीदेवीरितीमे द्वे ऋची यथाक्रमं विष्टुगार्ष्यौ। अग्निं न इन्द्राग्नी विष्टुप्। इन्द्राग्नो इन्द्रावरुणो इन्द्रापूषणो इन्द्रासोमौ देवताः। अग्नो देवीर्गार्ष्यौ। आपो देवताः॥

अस्त्या आशीः ॥

प्रागुक्तयोर्द्वयोरस्त्या अग्नो देवीरित्येषा आशीः। स्योना पृथिवी आपो द्विष्ठा इत्यस्य प्रागुक्तम्। अत्र दध्यङ्ङाथर्वणऋषिरिति विशेषः॥

दृतेः शान्तिर्यजूंषि ॥ (२)

दृतेः शान्तिरित्यादीनि ज्योक्ते सदृशि जीव्यासमित्यन्तानि यजूंषि लिङ्गोक्तदेवतानि। दृतेः शान्तिः, एकाधिका यजुष्टी। दृते दृंह० इमामभिरक्षमा, एकाधिका बार्हती अनुष्टुप्। दृते। ऋगुष्णिक्। नमस्ते हरस इत्यस्य प्रागुक्तम्। अत्र दध्यङ्ङाथर्वणऋषिरिति विशेषः॥

नमस्तेऽअस्त्वनुष्टुभौ ॥

नमस्ते अस्तु विद्युते, यतो यत, इतीमे ऋचावनुष्टुभौ। यतः स्व। अग्निं नः कृधि। अभयं नः। एषु व्यूहः। विद्युत्स्तनयित्नुरूपो भगवान्देवता द्वयोरपि। सुमित्रिया न इत्यस्य तु प्रागुक्तम्। अत्र तु दध्यङ्ङाथर्वणऋषिरिति विशेषः॥

तच्चक्षुः पुरउष्णिक् सौरो ॥ (३)

इतिजीर्णः पाठः। स तु नोपपद्यते। अस्यां हि समवष्टिरक्षराणि सन्ति। पुरउष्णिक् चाष्टाविंशत्यक्षरा "आद्यस्थे त्पुरउष्णिगिति"। अतस्तल्लक्षणाभावाच्चेयं पुरउष्णिक्। तेन तच्चक्षुर्बार्हती विष्टुप् सौरीति-

(१) गायत्र्यौ इति काण्वसर्वानुक्रमेऽधिकः पाठोऽस्ति ॥

(२) दृते दृंह० इमं मित्रदेवत्ये। आशा त्रयस्त्रिंशना जगती द्वितीया द्विपदा गायत्री इति काण्वसर्वानुक्रमेऽधिकः पाठो बोध्यः ॥

(३) तच्चक्षुः पङ्क्तिः सौरी इति काण्वसर्वानुक्रमपाठो बोध्यः ॥

पाठः । तच्चतुरित्येवा सौरी सूर्यदेवता एकाक्षिका ब्राह्मी त्रिष्टुप् । व्यूहेनात्वर्ध्वा । पुरुषश्चिक् त्र जलमपि न घटत एव ॥

आदद्दे नारिरस्यभिदेवतम् ॥

देवस्य त्वेति प्राग्वत् । आदद्दे नारिरसीत्येतच्चतुरभिदेवतम् । देवीजगती । अस्यादाने विनियोगोऽस्य । युंजते मन, इत्यस्य छन्दोदेवतं प्राग्वत् । ऋषिदैवज्ञाथर्वणः । जपे विनियोगोऽस्य ॥

द्यौर्वो द्यावापृथिव्यम् ॥

द्यौर्वो द्यावापृथिवी, इत्येतद् द्यावापृथिवीदेवतम् । अस्यादाने विनियुक्तम् । ब्राह्मी गायत्री ॥

देव्यो वस्त्र्यो वसतीवरीया ॥

देव्यो वस्त्र्य, इत्यस्य वसतीवरीयादाने विनियोगः । व्यूहेनार्षी षड्भिः ॥

इयत्त्र्ये वराहविकृतम् ॥

इयत्त्र्य, इत्यस्य वराहविकृतं देवता । वराहविकृतस्यादाने विनियोगः । द्वौ व्यूहौ । ब्राह्मी गायत्री ॥

इन्द्रस्यौजस्यादारा: ॥

इन्द्रस्यौजस्य इत्यस्यादारा देवताः । आदारादाने विनियोगः । ऋषी त्रिष्टुप् । मरुतां त्वेति चतुः षड्भिः । अग्नीषोम आदाने विनियोगो द्वितीयस्य । तृतीयस्य सम्भृतानामभिमर्शने ॥

प्रेतु (१)मखस्याञ्जस्यर्जवे यमाय देवस्त्वाङ्गिरसि घर्मदेवत्यानि ॥

प्रेतु ब्रह्मणस्पतिः । मखस्य शिरोऽसि । अग्नीषोम त्वा, ऋजवे त्वा । यमाय त्वा । अङ्गिरसि ग्रीवाभ्यस्तपोऽसीत्येतानि यजूंषि घर्मदेव-

(१) कण्वो वैश्वदेवी बृहतीमिति काण्वसर्वानुक्रमणिकायामुक्तोऽस्ति ॥

स्थानि । अथ धर्मशब्देन विशिष्योक्त इत्यत आह ॥

यो धर्मः स आदित्यो योऽएष तपतीति ॥

यो धर्मः सोऽसावादित्यः सूर्यः । स कः । य एष तपति । आकाशे इत्यते । यज्ञ वैश्वेति बृहती । अरिष्टुतं प्रति गमने विनियोगः । यज्ञा यज्ञे पीवि मखाय त्वेति सप्त । तत्र प्रथमस्य परिहृते सम्भारनिधाने विनियोगः । द्वितीयस्य सम्भारैः पिण्डस्य संसर्जने । तृतीयस्य महावीरकरणे । मखस्य शिर, इत्यस्य निष्टितस्याभिमर्शने । यजुर्भाषी । तदुत्तरस्य मखायत्वेत्यस्य द्वितीयमहावीरकरणे । मखस्य शिर इत्यस्य निष्टिताभिमर्शने । पुनर्मखायेत्यस्य तृतीयमहावीरकरणे । ततो मखस्य शिर इत्यस्य मखाय त्वेति सहितस्य निष्टिताभिमर्शने । ततस्त्रयाणां मखाय त्वा मन्थानां गवेधुकाभिस्त्रयाणां महावीराणां श्रपणे । ततस्त्रयाणामग्रस्य त्वाऽग्रस्थानां समवायस्थानां ऋचां बहुऋिन्मन्त्रः । महावीराणां श्रपणे विनियोगः । ततस्त्रयाणां मखाय त्वेति मंथानां प्रदहने । ऋजवे त्वेत्यादीनां देवी बृहती । उद्यपने विनियोगः । ततो मखाय त्वेति त्रयाणां अज्ञापयोऽवसेके । यमाय त्वा । मखायत्वा देव्यौ बृहत्यौ । सूर्यस्य त्वा देवीजगत्यौ । मोक्षणे त्रयाणां विनियोगः । देवस्त्वा । यजुः बहुऋिः । महावीराक्षपणे विनियोगः । पृथिव्या । ब्राजायत्वा गायत्री । रजतग्रहणमानस्य खरे उपगूहने विनियोगः । रजतं देवता । अर्चिरसि यजुस्त्रिष्टुप् । सुवर्णमवधानासुपरि महावीरकरणे ॥

अनाधृष्टा पुरस्तात्सम्राट् पार्थिवानि यजमानाग्नीः॥ (१)

अनाधृष्टा पुरस्तादित्यादीनि सप्त यजूंषि पार्थिवानि पृथिवीदेवत्या-

(१) स्वाहा महद्भिर्धर्मो, दिवः सप्तस्पृशः सुवर्णम् । इति काम्यसर्वानुक्रमपाठो बोध्यः ॥

नि । यजमानस्याभीः, अनाधृष्टाः । व्यूढः । पुरोवातौ । अङ्गाऽङ्गयो । ततस्त्रिवृ व्यूहेन शान्तवत्स्तोमः । प्राणानामपि अन्नमे विनियोगः । विश्वाभ्यो मा । यजुर्बृहती । दक्षिणत उद्गानस्याग्निधाने विनियोगः । मनोरश्वासि । देवी पङ्क्तिः । उत्तरतः प्रादेशमग्निधाने विनियोगः । आत्मा मरुद्भिः । यजुः पङ्क्तिः । घर्मो देवता । विर्कंकतशकलाभ्यां पवित्रयोर्विनियोगः । दिवस्परि दैवी जगती । सुवर्णगतमानेन मरुत्वतीयशस्त्रविधाने विनियोगः । सुवर्ण देवता ॥

मध्व, प्राणदेवत्यानि ॥

मध्वित्यौषि यजूंषि प्राणदेवत्यानि । धर्मविकेरुपवाजने विनियुक्तानि । दैव्युषिक् ॥

गर्भो देवानामवकाग्ना, मा मा हिर्ठ० सीरित्येतदन्ता घर्मदेवत्याः ॥ (१)

गर्भो देवानामित्यादयो नमस्ते अस्तुमामाहिर्ठ०सीरित्येतदन्ता अवकाग्नाः । अवकाग्नसञ्ज्ञका मन्त्राः । सञ्ज्ञाकरणमवकाग्नेरुपतिष्ठत इत्यस्य संग्रहाराय । मरुत्वतीयशस्त्रविधाने विनियोग एषाम् । गर्भो देवानां ऋचां पङ्क्तिः । समग्निः ब्राह्मी अनुष्टुप् ॥

धर्त्ता दिवऽउदृर्ध्वबृहती ॥

धर्त्ता दिव, इतीयमृक् उदृर्ध्वबृहती । त्रिजागतोदृर्ध्वबृहतीति तद्वचनम् । अथ तु प्राणोदयौदयकौ । इतीय एकादशकः । एकाधिका बृहती ॥

अपश्यं गोपां त्रिष्टुभं दीर्घतमा ॥ (२)

अपश्यं गोपामितीमामृचं त्रिष्टुभं दीर्घतमा अपश्यत् । चतुर्थं

---

(१) गर्भो देवानां पङ्क्तिः समग्निर्जगती । इति काण्वसर्वानुक्रमणीपाठो ज्ञेयः ॥

(२) एतस्सूक्तमग्ने विश्वासां भुवामदृष्टिः । इति काण्वसर्वानुक्रमणीपाठश्च ज्ञेयः ॥

व्यूढः । विष्वासां भुवां । व्यूढः । अत्यष्टिश्छन्दः ॥

वृत्रस्य त्वा परीणाहेन ॥

वृत्रस्य त्वेत्येषा परीणाहेन । आयुषोर्व्यूढः । परीणाहपदात्, इति लक्षणम् । पितामोसि, यज्ञमायुषी ॥

त्रातृव्यतः परस्वाभ्यः ॥

त्रातृव्यतः, इत्येतयजुः परस्वा आयोः । ऋषी त्रिष्टुप् । वसो देवता । परस्वा वपने विनियोगः ॥

यज्ञः क्रतुना यजुषो धर्म देवत्ये ॥

यज्ञः क्रतुना, राधिः क्रतुनेतीमे यजुषी धर्मदेवत्ये सामान्यृषी । दोहिपदहोमे विनियुक्ते ॥

आददेदित्यै रज्जुः ॥

आददेदित्यैराज्ञासोत्थ्या यजुषी रज्जुदेवत्ये । रज्जुछेदनादाने विनियोगः । प्राजापत्या गायत्री छन्दः ॥

इडऽएहि गौः ॥

इडएहीत्यादीनां गौर्देवता गीराज्ञामे विनियोगः । इडे । देवी इडहती । अदिते । सरस्व । देव्यौ पङ्क्ती । यत्सावेहि । देवीउहती । यत्सावित्यत्र गोर्गामाचरादिगणपठितत्वा छन्दो नियमो छन्दोमनोत्तेन विधानात् । अदित्ये । यजुस्त्रिष्टुप् । गौः वाजसनेयी विनियोगः । पूषासि । वत्सो देवता । देव्यनुष्टुप् । वत्सोपसर्जने विनियोगः । धर्माय । वत्सो देवता । देवी पंक्तिः । वत्सोपयमने विनियोगः । अश्विभ्यां । इन्द्राय । यजुर्गावत्सौ । सरस्वत्यै । यजुरनुष्टुप् । त्रिवृतो देवताः । दोहने विनियोगः । खाडिन्द्रवत् । देव्यो इडहताः । विष्णुवत्सभिक्षणे विनियोगः । भवता सवितस्त्व यजुर्ऋचौ । विष्णवो देवताः ॥

यस्ते विष्टुभं दोर्घतमा ॥

यस्ते स्तनइति विष्टुभन्दीर्घतमा अपश्यत्। तृतीये व्यूह्य। वाग्देवत्या। "वाग्वै सरस्वतीति श्रुतेः"। स्तनालम्भे विनियोगः। उर्वन्तरिक्षमित्यस्य योः समीपं गच्छां प्रति गमने विनियोगः। प्राजापत्या गायत्री। गायत्री छन्दोऽग्निः। यजुर्गायत्री। वैष्टुभम्। यजुर्गायत्री। परिग्रासादने विनियोगः। परीग्रासौ देवते द्यावापृथिवीभ्यां। यजुर्जगती। परीग्रासाभ्यां मन्थावीरयहणे विनियोगः। अन्तरिक्षमेवेति यजुर्वृहती। उपयमन्थोपयहणे विनियोगः। अग्नयोघर्मो देवता॥

इन्द्राग्निना वैश्वदेवम् ॥ (१)

इन्द्राग्निनेत्यस्य विश्वेदेवा देवताः। व्यूहः। ब्राह्मी गायत्री। मन्थावीरे योः वषसोऽवनयने विनियोगः॥

समुद्राय त्वा वातनामानि ॥

समुद्राय त्वा वाताय स्वाहेत्यादीनां समुद्रादीनि वातनामानि देवताः। समुद्राय। सरिराय। यजुः पङ्क्तिः। अनाधृष्याय। यजुस्त्रिष्टुप्। अप्रतिधृष्याय। यजुर्जगती। अक्षय्याय। यजुः प्रङ्क्तिः। अग्निमिद्धा। यजुस्त्रिष्टुप्। इन्द्राय त्वा। सामोऽधिकृत्। आदित्यवते द्वे। यजुः पङ्क्ती। सवित्रे। ऋग्गायत्री। यमाय त्वा। सामोऽधिकृत्॥

स्वाहा धर्माय धर्मदेवत्ये ॥

स्वाहा धर्माय, स्वाहा धर्मः पित्र्य, इत्येते यजुषी धर्मदेवत्ये। प्रथमस्य देवी पङ्क्तिः। उपयमनीस्थान्यस्य धर्मेधासेके विनियोगः। द्वितीयस्य यजुर्गायत्री। जपे विनियोगः॥

विश्वाऽआशाऽआश्विन्यनुष्टुप् ॥

विश्वाआशा, इत्यनुष्टुबाश्विनी। अश्विनौ भगा देवतेत्यर्थः। यव-

(१) इन्द्राग्निनी देवम इति काण्वसर्वानुक्रमपाठः॥

ट्टमने होमे विनियोगः ॥

द्विविधा धर्मदेवत्यम् ॥

द्विविधा, इत्येतद् धर्मदेवत्यं सामोष्णिक् । उत्क्रमणे विनियोगः ॥

अश्विना धर्मसुष्णिक् ॥

अश्विनाधर्मनित्यस्योष्णिक्छन्दः । अश्विनावादित्यो द्यावापृथिव्यौ च देवताः । दृश्यधिकलात्स्वराडुष्णिगियम् । बृहस्पतोऽनुमन्त्रणे विनियोगः ॥

अपातां ककुप् ॥

अपातामग्निनेत्यस्याः ककुबुष्णिक् छन्दः । "मध्यमयेत्ककुबिति वचनात् । मध्यमे व्यूहः । यजमानकर्तृकेऽनुमन्त्रणे विनियोगः । दूषे पिन्वस्व । ऋचां पङ्क्तिः । अध्वर्युकर्तृके पिन्वमानानुमन्त्रणे विनियुक्ताः । धर्मोसि । यजुर्गायत्री । उत्तरपूर्वार्धउत्क्रमणे विनियोगः ॥

अमेन्यस्मै खरः ॥

अमेन्यस्मै इत्यस्य खरी देवता । खरे महावीरनिधाने विनियोगः । द्वौ व्यूहौ । ऋग्बृहती । धर्मो देवता ॥

स्वाहा पूष्णे सप्त लिङ्गोक्तानि ॥

स्वाहा पूष्णे सरस, इत्यादीनि सप्त लिङ्गोक्तपूषादिदेवतानि । स्वाहा पूष्णे । देवीजगती । सावध्यः । देवीपङ्क्तिः । प्रतिरवेभ्यः । देवीजगती । पितृभ्यः । आसुरीगायत्री । सकलस्य दक्षिणतो बर्हिषोपगूहने विनियोगः । द्यावापृथिवीभ्यां । बसुरनुष्टुप् । विश्वेभ्यो । बसुरनुष्टुप् । बृहद्य । बसुः पङ्क्तिः । सकलस्य प्रतिप्रस्थाने समर्पणे विनियोगः । इतराणि मन्त्र बर्जंवि विनियुक्तसकलैर्धर्माज्यहोमे विनियुक्तानि ॥

स्वाहा सन्ज्योदेवत्यम् ॥

स्वाहा संज्योतिषेत्येतत्सप्तयोदेवत्यम् । बसुरनुष्टुप् । धर्माज्यस्रुवयोः सकलस्रुवेचे विनियुक्तम् ॥

मधुश्चुतं घर्मः ॥

मधुश्चुतघर्मस्य घर्मो देवता । भुरिगनुष्टुप्छन्दः । गान्धारः स्वरः । मधवे पैत्रियोगः । अह्नः केतुना, रात्रिः केतुनेत्यनयोः प्रागुक्तम् ॥

अभीमक्षायत्रीबृहत्यावसाने ॥

अभीमं महिमा । सप्त० सीदस्व, इतीमे द्वे ऋचौ गायत्रीबृहत्यौ । अभीममिति गायत्री । सप्त० सीदस्वेति बृहती । बृहत्यौ अवसाने । इयोर्ऋचोः संधावसानं नास्तीत्यर्थः । उत्तमवर्ण पृथिवीति० सप्त०सीदस्वमहानित्येवं संयुक्त एव पाठोऽस्तीत्यर्थः । महावीरस्य सवनानिधाने विनियोगः । अनयोरेवचोरन्तराधामेकत्व गणनेन छन्दोन्तरं वैकल्पिकमाह ॥

अतिशक्वरी वाग्नेयी समस्ता त्र्यवसाना ॥

अथवा नेमे गायत्रीबृहत्यौ ते ऋचौ । किंतु समस्तेयं षड्यचरा अतिशक्वरीछन्दस्का एकैव ऋक् अग्निदेवत्या त्र्यवसाना अवसानत्रययुक्ता । षड्यचरा अतिशक्वरी ॥

याते धर्मः ॥

याते धर्मादित्याग्निमारुताद्यानां धर्मो देवता । चतुर्गृहीतहोमे एषां विनियोगः । त्र्यवसानमग्निं ऋचां पङ्क्तिः । द्वितीये व्यूहः ॥

चत्वार बृहती ॥

चत्वार त्वा परमावेत्यस्या बृहती छन्दः । निष्केवल्ये विनियोगः । उपरिष्टाद्बृहतीयम् । अत्यपादत्व छादमाचरत्वात्र तथा चोक्तम् । अत्यवेदुपरिष्टाद्बृहतीति । धर्मो देवता । अत्र द्वितीये व्यूहः ॥

चतुः सप्तिर्मरुद्बृहती ॥

चतुः सप्तिरिति महाबृहती । चत्वारोष्टावाजानत्व मरुद्बृहती-

ति तत्त्वचयम् । उत्तरवेदौ महावीरनिधाने विनियोगः । धर्मो देवता ॥

धर्मैतदनुष्टुप् ॥

धर्मैतत्त इत्यस्या, अनुष्टुप् छन्दः । आसेचनकर्मणां यजुषा क्रमे विनियोगः । धर्मो देवता । अथ यजमानचतुर्थो सप्तको । द्वितीयो दशकः । तेनाक्षरसंख्यापूर्तिः ॥

अधिक्रदत्यरोधिक् ॥

अधिक्रददित्यस्याः परोधिक्छन्दः । द्वितीयपादस्य द्वादशाक्षरत्वात् । तथा च पिङ्गलः । परोधिक्परतदिति । परिषेके विनियोगः । सुमित्रिया न, इत्यस्य मार्जने विनियोगः । उद्यमित्यस्योत्तरपूर्वार्धेऽवक्रमणे । एधोऽसीत्यस्य समिदादाने । समिदसीत्यस्याहवनीयेऽभ्याधाने ॥

यावतो द्यावापृथिवी दधिघर्मः ॥

यावतोत्यस्य दधिघर्मो देवता । ब्राह्मी उष्णिक् । इन्द्रो देवता । दधिघर्मग्रहणे विनियोगः ॥

मयि त्वष्टर्यज्ञियं यजमानाग्नीः ॥

मयित्वष्टरिति पङ्क्तिर्यजमानस्याग्नीः । पञ्चपदा चत्वारिंशदक्षरा पङ्क्तिरियम् । दधिघर्मभेषभक्षणे विनियोगः । धर्मो देवता ॥

पयसो रेतो गायत्र्यवसाना ॥

पयसो रेत, इत्यवसानवर्जिता गायत्री । भक्षणे विनियोगः । अथ पूर्वसूत्रे च यजमानाग्नीर्देवतेति कण्वसंहिताभाष्ये ॥

त्विषः संवृग् दधिघर्मः ॥

त्विषः संवृगित्यस्य दधिघर्मो देवता । व्यूहः । अतिजगती । महाव्रतसञ्ज्ञेऽहनि दधिघर्मभेषभक्षणे विनियुक्ता ॥

यजुर्वा धर्मदेवतम् ॥

अथ धर्मप्रकरणे यदनुक्तमनुक्तदेवतं मन्त्रजातं तद् धर्मदेवतम् । एतस्मिन्सूत्रे सति पूर्वत्र स्वाहा धर्माय धर्मदेवत्ये, अग्नेः केतुना यजुषी धर्मदेवत्ये इत्येवमादौ धर्मदेवत्यत्वकथनं पुनरुक्तम् ॥

स्वाहा प्राणेभ्यो मांचवर्णिक्यो देवताः ॥

स्वाहा प्राणेभ्य, इत्यादीनां यजुषां मांचवर्णिक्यो देवताः । धर्मभेदे प्रायश्चित्तहोमे विनियोगः, स्वाहा प्राणेभ्यः । यजुस्त्रिष्टुप् । पृथिव्यै स्वाहेत्यादिषु चतुरक्षराणां देवीबृहती । षडक्षराणां देवीपङ्क्तिः । अष्टाक्षराणां देवीत्रिष्टुप् । सप्ताक्षराणां देवीजगती ॥

मनसः काममनुष्टुब्यजमानाग्नीः स्त्रीदेवता ॥

मनसः काममाकूतिमित्येषा अनुष्टुप् । अस्याः स्त्रीदेवतेति कथनमाधे । धर्मभेदे पूर्वाहुतिहोमे विनियोगः ॥

प्रजापतिः संम्रियमाणो यथाकालं प्रायश्चित्तदेवताः ॥

प्रजापतिः सम्म्रियमाण, इत्याद्या धर्मभेदे यथाकालं प्रायश्चित्तदेवताः । यो यो यस्याः कालो यथाकालम् । तथा । प्रजापतिः सम्म्रियमाणो महावीरस्थरचे क्रियमाणे महावीरभेदे प्रजापतिः प्रायश्चित्तहोमे देवता । तत्र प्रजापतये स्वाहेति प्रायश्चित्ताहुतिः । एवं सर्ववाक्येषु ज्ञेयम् ॥

सविता प्रथमेऽहन् प्रत्यहं क्रमेण ॥

सविता प्रथमेऽहन्नित्याद्याः धर्मभेद एव प्रत्यहं प्रतिदिनं क्रमेण प्रायश्चित्तदेवताः । सविता प्रथमेऽहन् । प्रथमेऽहनि धर्मभेदे सविता प्रायश्चित्ताहुतिदेवता । द्वितीयेऽहनि धर्मभेदे द्वितीया अग्निर्देव-

ता । एवं सर्वत्र यजुषामार्षी ज्ञेयः । प्रजापतिः सप्तत्रिंशदात्मः सविता प्रथमेऽहनीतीमे द्वे [illegible] । महावीरभेदे यजमेदेन देवतामेदविधायिके ॥

उग्रश्च मारुती गायत्री विमुखाख्यो मन्त्रोऽग्नौ विनियुक्तः ॥

उग्रश्च भीमश्चेति गायत्री मारुती । उग्रभीमाद्यो मरुतोऽस्या देवता इत्यर्थः । विमुखाख्यः विमुखसञ्ज्ञकोऽयं मन्त्रः । अग्नौ चयने सप्तममारुतपुरोडाशहोमे विनियोगः । अरण्याध्ययनसामान्यादिहास्य पाठः ॥

तस्मादाग्निक एवास्य ऋषिः(१) ॥

तस्मादस्य मन्त्रस्याग्निक एवाग्निसम्बन्ध्येव ऋषिः । प्रजापतिर्ऋषिः । साध्या वा ऋषय इत्यर्थः ॥

परमेष्ठी प्राजापत्यो वा ॥

अथवाग्नेयश्चेतिमन्त्रस्य प्रजापतेरपत्यं परमेष्ठी वा ऋषिः ॥

अग्निर्ठ० हृदयेनाश्वमेधिकानि तच्चत्व एव ऋषिः(२) ॥

अग्निर्ठ० हृदयेनेत्यादीनि अध्यायसमाप्तिपर्यंतानि मन्त्रजातानि आश्वमेधिकानि । अश्वमेधसम्बन्धानि । एषां च तच्चत्व एवाश्वमेधिकः प्रजापतिरेव ऋषिः ॥ अग्निर्ठ० हृदयेन, उग्रंलोहितेनेति द्वे [illegible] । देवताभावसम्बन्धविधानात् । अरण्येऽध्येतव्यादिह पाठः ॥

सोमश्चः स्वाहेतिप्रायश्चित्ताऽऽहुतयो द्विचत्वारिं-

(१) एवास्यर्षिरिति काण्वपाठः ॥

(२) तत्रोक्त एवार्षिरिति च काण्वपाठो बोध्यः ॥

ग्रं ॥ (१)

सोमस्य सा इत्याद्याः द्विचत्वारिंशदृच्याः प्रायश्चित्ताहुतयः । अरण्येऽनूच्यानं हुत्वा द्यावापृथिव्यामुक्तमामाहुतिं जुहोतीतरासिन्दो ने एवा सर्वेषां विनियोगः ॥ ८ ॥

ईशा वास्यमाद्यदेवत्य आनुष्टुभोऽध्यायः ॥

ईशा वास्यमिदमित्ययमध्याय आद्यदेवतः आनुष्टुभश्च । अनुष्टुप्छन्दस्का एव ऋचोऽस्मिन्सन्तीत्यर्थः । अथापवादमाह ॥

अनेजदेकं त्रिष्टुप् ॥

अनेजदेकमितीयं त्रिष्टुप् ॥

सपरिगतो ॥ (२)

सपर्यगादितीयं जगती । अन्ने नयेति त्रिष्टुप् प्रागुक्ता । अन्याः सर्वा अनुष्टुभः । अत्र । एवं त्वयि । नवकः । तेनैकाधिका । तद्वावतः । व्यूहः । तद्दूरे । न व्यूहः । तदुसर्वत्र नवकः । स परि पञ्चाशदक्षरा । तेन द्व्यधिका जगती । ततो भूयो नवकः । यत्र सप्तकः । ये विद्यां । ततो भूयः । नवकः । यत्र विद्यायां । सप्तकः । विद्यां च । व्यूहः ॥

वायुरनिलं यजुषी ॥

वायुरनिलमितीमे द्वे यजुषी । वायुरनिलममृतमित्येकम् । अथेदमिति द्वितीयम् । प्रथमस्य प्राजापत्या आद्यन्ती । द्वितीयस्य यजुर्बृहती । अथवैकमेवेदं यजुः । मन्त्रे इतिकारभाष्ये । तदा व्यूहेन महागायत्री ॥

ओ३मिति परमात्मरूपस्य योगिनामालम्बभूतस्य परस्य ब्रह्मणः (३) प्रणवाख्यस्थूलादिगुणयुक्तस्य ब्रह्मणो ऋ-

(१) अष्टत्रिंशोऽशत् इति काण्वसर्वानुक्रमपाठः ॥

(२) पूर्वस्मोऽनेत्यधिकः पाठः काण्वसर्वानुक्रमे बोध्यः ॥

(३) परमस्य ब्रह्मण इति काण्वसर्वानुक्रमपाठो बोध्यः ॥

पिङ्क्छन्दो गायत्रं परमात्मा देवता ॥

ओ३मित्यस्य परमाक्षरस्य ब्रह्मा ऋषिः। परमात्मा देवता गायत्रं छन्दः। दैवो गायत्री छन्द इत्यर्थः। कीदृशस्य ओमित्यस्य परस्य ब्रह्मणः प्रणवसञ्ज्ञस्य परब्रह्मणः। कीदृशस्य ब्रह्मणः अस्थूलमनण्वकृशमित्यादिगुणोपेतस्य। पुनः कीदृशस्य। योगिनामालम्बभूतस्य ॥

विनियोगः कल्पकारोक्त इत्युक्तम्। ओ३मित्यस्य च विनियोगः कल्पकारेण नोक्त इति स्वयमेवाह विनियोगमाह ॥

ब्रह्मारम्भे विरामे (१) च यागहोमादिषु शान्तिपुष्टिकर्मसु चान्येष्वपि काम्यनैमित्तिकादिषु(२) विनियोगोऽस्य ॥

अस्य ओङ्कारस्य ब्रह्मारम्भे ब्रह्मणो वेदस्यारम्भे विरामे च विरामे वेदसमाप्तौ च विनियोगः। तथा यागहोमादिषु। यागो दर्शपूर्णमासादयः। होमा जुहोतयः श्रौताः स्मार्ताश्च। देवतोद्देशेन द्रव्यत्यागो यागः। स एव प्रक्षेपाधिको होम इति तयोर्लक्षणम्। तयोरादिषु ओ३दमग्नये न ममेत्येवं ओङ्कारस्य विनियोगः। तथा शान्तिपुष्टिकर्मसु शान्तिकर्मसु रोगादिशान्त्यर्थं क्रियमाणेषु कर्मसु पुष्ट्यर्थं अभिलषितसम्पत्त्यर्थं क्रियमाणेषु कर्मसु चास्य विनियोगः। तथा अन्येष्वपि काम्यनैमित्तिकादिषु सर्वेषु कर्मस्वस्य विनियोगः। तथा च श्रुत्याख्यायनः। दानव्रततप स्वाध्यायजपध्यानमन्त्रोपासनप्राणायामहोमदैवपित्र्यमन्त्रोच्चारणब्रह्मारम्भादीनि प्रणवमुच्चार्य प्रवर्त्तयेदिति। दाल्भ्यपरिशिष्टे च। ब्रह्मयज्ञो जपो होमो देवर्षिपितृकर्म च। अनोङ्कृत्य कृतं सर्वं न भवेत्सिद्धिकारकमिति ॥ अतश्च मन्त्रमाचोच्चारणे आदौ ओङ्कारः प्रयोज्यः ॥

---

(१) प्रयोगहोमादिषु इति काण्वसर्वानुक्रमपाठो बोध्यः ॥

(२) सर्वेषु इत्यधिकः पाठः काण्वसर्वानुक्रमस्येति ॥

क्रतो स्मिर्यज्ञभिरिन्धे वयोधाम्योगी स्मारक्षति ॥

क्रतो स्मरेत्यादिभिर्यज्ञभिरिन्धे अन्तकाले प्राणप्रयाणक्षण ये योगी वयोधान् स्मारक्षति । देव्यो ह्यूचुः । हे क्रतो त्वं मां स्मर । योऽग्निर्ब्रह्मवर्यादारभ्य परिचरितः स मनसि वासनारूपेणावस्थितः सम्बोध्यते । हे क्रतो हे भगवन्नग्ने त्वं मां स्मरेति । अथ वा क्रतुर्यज्ञः सम्बोध्यते । हे क्रतो श्रीभगवन्विष्णो कृतं स्मर । इदानीं तव उपस्थितः प्रत्युपकारस्य काल इत्येवं क्रतुर्यज्ञः सम्बोध्यते । क्लिबे क्षयाय लोकाय स्मर, मया यत्कृतं तत् स्मर ॥

स्मरे नमाग्ने नमस्कारोक्तिः ॥

स्मरे मरेत्यनेनाग्ने अन्तकाले जीवितावसानेऽग्नेनमस्कारोक्तिः । नमस्कारवचनम् ॥

हिरण्मयेनादित्योपासनम् ॥ (१)

हिरण्मयेन पात्रेणेत्यस्य सूर्यस्योपासनं कार्यम् । उक्तिनियम् । अष्टाविंशत्यक्षरत्वात् ॥

ओ३मिति नामनिर्देशो ब्रह्मणः ॥

ओ३मित्ययं ब्रह्मणो नामनिर्देशः ॥

खं ब्रह्मेत्याकाशरूपमग्ने ब्रह्म ध्यायेत् ॥

खं आकाशरूपं ब्रह्म इत्यनेन प्रकारेणान्ते जीवनावसानकाले आकाशरूपं ब्रह्म ध्यायेत् ॥ ८ ॥

अथातश्छन्दोदेवताः ॥

अभिधीयन्त इति शेषः । अथानन्तरं छन्दसां गायत्र्यादीनां देव-

---

(१) इति सूत्रं काण्वसर्वानुक्रमेऽत्रैव ग्रन्थपरिसमाप्तिसूचकं वाक्यं कथितं कण्वमहर्षिणेति ॥

ता अग्निर्देवता ॥

गायत्र्या अग्निः ॥

गायत्र्या अग्निर्देवता ॥

उष्णिहः सविता ॥

देवता ॥

अनुष्टुभः सोमः ॥

देवता ॥

बृहत्या बृहस्पतिः ॥

देवता ॥

पङ्क्तेर्वरुणः ॥

देवता ॥

त्रिष्टुभ इन्द्रः ॥

देवता ॥

जगत्या विश्वेदेवाः ॥

देवताः ॥

विराजो मित्रः ॥

देवता ॥

शक्वरीणां वरुणः ॥

देवता ॥

अतिच्छन्दसः प्रजापतिः ॥

देवता ॥

विच्छन्दसो वायुः ॥

देवता ॥

द्विपदायाः पुरुषः ॥

देवता ॥

एकपदाया ब्रह्मा ॥

देवता ॥

सर्वा ऋच आग्नेयः ॥

सर्वा ऋच आग्नेय्योऽग्निदेवता ज्ञेयाः ॥

सर्वाणि यजूंष्यवायव्यानि ॥

सर्वाणि यजूंषि वायुदेवत्यानि ज्ञेयानि ॥

सर्वाणि सामानि सौराणि ॥

सूर्यदे तानि ॥

सर्वाणि ब्राह्मणानि च ॥

चकारात्सूर्यदेवतानि ॥

स्वाहाकारस्याग्निः ॥

देवता ॥

वषट्कारस्य विश्वेदेवाः ॥

देवताः ॥

कर्मारम्भे मन्त्राणां देवता वेदितव्याः ॥

कर्मारम्भे कर्मणः प्रारम्भे तत्कर्मोपयोगिनां मन्त्राणां देवता वेदितव्या ज्ञातव्याः ॥

सन्यस्य मनसि देवतां ततो हविर्हूयते ॥

होमात्पूर्वं मनसि देवतां सन्यस्य संचिन्त्य संस्मृत्य ततस्तदनन्तरं हविर्हूयते । तथा च यास्कः । यस्मै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट् करिष्यन्निति हविर्ध्यायत इति । देवतामनुस्मृत्वा हो-

मकारश्छ यत्रवति तदाह ॥

देवतामविज्ञाय यो जुहोति देवास्तस्य हविर्न जुषन्ते ॥

देवतामविज्ञाय अज्ञात्वा यो होमं करोति तस्य हविराज्यादिकं देवा न जुषन्ते न सेवन्ते न स्वीकुर्वन्तीत्यर्थः ॥

स्वाध्यायाध्ययनकाले ऽपि मन्त्राणां देवताज्ञाने फलमाह ॥

स्वाध्यायमपि योऽधीते मन्त्रदेवतज्ञः सोऽस्मिंल्लोके देवैरपीड्यते ॥

यः पुमान्मन्त्रदेवतज्ञः सन् मन्त्राणां देवता जानन् स्वाध्यायमपि वेदमपि अधीते पठति स स्वाध्यायपाठकोऽस्मिंल्लोके स्वर्गलोके देवैरपीन्द्रादिभिरपीड्यते स्तूयते। इन्द्रादयोऽपि तस्य स्तुतिं कुर्वन्ति किं पुनरन्य इति ॥

तस्माच्च देवता वेद्या मन्त्रे मन्त्रे प्रयत्नतः ॥

यतो देवतामज्ञात्वा होमं कुर्वन्तो देवा हविर्न जुषन्ते। यस्माच्च देवतां ज्ञात्वा स्वाध्यायाध्यापको देवैरपि स्तूयते। तस्मात्कारणात्प्रयत्नतो मन्त्रे मन्त्रे देवता वेद्या ज्ञेयाः ॥

देवताज्ञानस्य प्रयोजनान्तरमप्याह ॥

मन्त्राणां देवताज्ञानान्मन्त्रार्थमधिगच्छति ॥

मन्त्राणां देवताज्ञानात् मन्त्रार्थं जानाति ॥

मन्त्रार्थज्ञानेन किं भवतीत्यत आह ॥

मन्त्रार्थज्ञानात्तु विधूतपाप्मा नाकमभ्येति ॥

मन्त्रार्थज्ञानात् विधूतपाप्मा निरस्तपापः क्षीणपापः सन् नाकमभ्येति स्वर्गं प्राप्नोति ॥

देवतामज्ञात्वा कर्म कुर्वाणः कर्मणां फलमपि न प्राप्नोतीत्याह ॥

न हि कश्चिदविज्ञाय याथातथ्येन देवताः श्रौतानां कर्मणां विप्रः स्मार्त्तानां चाश्नुते फलम् ॥

कश्चिद्विद्वान् मेधावी याथातथ्येन परमार्थत्वेन अस्य मन्त्रस्येयमिव निश्चिता देवता अस्येयं अस्येयं इत्येवं देवता अविज्ञाय अज्ञात्वा श्रौतानां कर्मणां स्मार्त्तानां च कर्मणां फलं न हि अश्नुते । नैव प्राप्नोतीत्यर्थः । हि हेताववधारण इत्यमरः । अथापि हेतौ अवधारणे वा हीति व्याख्येयम् । हि यतः देवतामज्ञात्वा कर्मणां फलं नाश्नुते तस्माद्देवता ज्ञात्वैव कर्माणि कार्याणीति । अवधारणार्थं तु प्रागेव व्याख्यातम् ॥

अनादिष्टमध्वरादौ सवान्तकर्मणि परिभाषितं मन्त्रगणं वक्ष्यामः ॥

अध्वरादौ सवान्तकर्मणि अनादिष्टं परिभाषितं मन्त्रगणं वक्ष्यामः ॥

सर्वमाग्नेयं गायत्रं गौतमीयम् ॥

सर्वमग्निदेवतं गायत्रछन्दस्कञ्च मन्त्रगणं गौतमीयं जानीयात् । अग्निदेवतस्य गायत्रछन्दस्कस्य मन्त्रगणस्य गौतमऋषिर्ज्ञेय इत्यर्थः । अध्वरादिसवान्ते काण्डत्रयविहिते कर्मण्येतद्देवतैतच्छन्दस्कस्य ऋचगादेशे अयमृषिर्ज्ञेय इति भावः । एवमेवाग्नेयमाग्नेयमपि सूत्राणि व्याख्येयानि । अथ ऋषिदेवतछन्दसामेकैकस्यानादेशे अन्यतराभ्यामादिष्टाभ्यामन्यतरस्यानादिष्टस्य निर्णयः क्रियते । तद्यथा यद्गायत्रं गौतमीयञ्चानादिष्टदेवताकं तदाग्नेयमग्निदेवत्यं भवति । यच्चाग्नेयं गौतमीयं चानादिष्टछन्दस्कं तद्गायत्रं यच्चाग्नेयं गायत्रं चानादिष्टर्षिकं तद्गौतमीयं भवतीति । एवं वक्ष्यमाणेषु सूत्रेषु द्रष्टव्यम् ॥

सर्वं० साविषमौष्णिहं भारद्वाजम् ॥

अध्वरादौ सवान्ते कर्मणि सवितृदेवत्यमुष्णिक्छन्दस्कं सर्वमन्त्रगणमनादिष्टर्षिकं भारद्वाजं जानीयात् ॥

सर्वं० सौम्यमानुष्टुभमाथर्वणिकम् ॥

सोमदेवत्यमनुष्टुब्छन्दस्कं सर्वमन्त्रगणमनादिष्टर्षिकमाथर्वणिकं जानीयात् । अथर्वा तस्य ऋषिरित्यर्थः ॥

सर्वं बार्हस्त्यं बार्हतमाङ्गिरसम् ॥

बृहस्पतिदेवतं बृहतीछन्दस्कं सर्वमन्त्रगणमाङ्गिरसञ्जानीयात् । तस्याङ्गिरा ऋषिर्ज्ञेय इत्यर्थः ॥

सर्वं वारुणं पाङ्क्तमालम्बायनीयम् ॥

वरुणदेवत्यं पङ्क्तिछन्दस्कं सर्वमन्त्रगणमालम्बायनीयं जानीयात् । तस्यालम्बायन ऋषिर्ज्ञेय इत्यर्थः ॥

सर्वमैन्द्रं वैष्टुभं याज्ञवल्कीयम् ॥

इन्द्रदेवत्यं त्रिष्टुब्छन्दस्कं सर्वं मन्त्रगणं याज्ञवल्कीयं विद्यात् । याज्ञवल्क्यस्तस्य ऋषिरित्यर्थः ॥

सर्वमादित्यदेवतं जागतं कौत्सम् ॥

आदित्यदेवतं जगतीछन्दस्कं सर्वमन्त्रगणं कौत्सं विद्यात् । कुत्सस्येदं कौत्सम् । कुत्सोऽस्य ऋषिरित्यर्थः । अध्वरादौ सवान्तकर्मणि अनादिष्टं मन्त्रगणमित्येतल्लक्षणमपि सूत्रेष्वनुवर्त्तत एव । उदाहरणान्यभियुक्तैः प्रयत्नतो गवेषणीयानि ॥

ज्योतिष्टोमे दीक्षाप्रभृति वक्ष्यामः ॥

ज्योतिष्टोमे दीक्षाप्रभृति दीक्षात आरभ्य सर्वाङ्गानां प्रधानानां च ऋषिदेवतछन्दांसि वक्ष्यामः । आमन्त्ररूपाण्यामपि

दीक्षादिकर्मणामुदवसानीयातिरात्रांतानामाद्यादिप्रानारम्भविशेषो भवति । तथा च श्रूयते । यद्वै दीक्षन्तेऽग्नाविष्णू एव देवते यजन्तेऽग्नाविष्णू देवते भवन्ति अग्नाविष्ण्वोः सायुज्यꣳ० सलोकतां जयतीत्यादि स पापीयान् भवति श्रेयार्थꣳ० स आत्मनेत्यन्तम् । अथाकुर्हरिस्वामिनः । एतदपि कर्मसु देवताविद्याब्राह्मणं प्रसङ्गमेव । अग्नाविष्णू देवते भवन्त्यभेदर्शिनः । अग्नाविष्ण्वोः सायुज्यꣳ० सलोकतां जयन्ति देवदर्शिनः । तत्रापि प्रकृष्टविद्याः सायुज्यं जयन्ति । मन्दविद्याः सलोकतामिति विशेषः । एवं मुत्तरत्रापि वाच्यम् ॥

दीक्षायां भृगुरग्नाविष्णू गायत्री ॥

दीक्षायां भृगुऋषिः अग्नाविष्णू देवते गायत्री छन्दः ॥

प्रायणीय आङ्गिरसोऽदितिरुष्णिक् ॥

प्रायणीये आङ्गिरस ऋषिः अदितिर्देवता उष्णिक् छन्दः ॥

क्रये विश्वामित्र सोमोऽनुष्टुप् ॥

सोमक्रये विश्वामित्र ऋषिः सोमो देवता अनुष्टुब्छन्दः ॥

आतिथ्ये वसिष्ठो विष्णुर्बृहती ॥

आतिथ्ये कर्मणि वसिष्ठ ऋषिः विष्णुर्देवता बृहती छन्दः ॥

प्रवर्गे कश्यप आदित्यः पङ्क्तिः ॥

प्रवर्गे कश्यप ऋषिः आदित्यो देवता पङ्क्तिश्छन्दः ॥

उपसत्स्वात्रेय उपसद्देवता त्रिष्टुप् ॥

उपसत्स्वात्रेय ऋषिः । उपसद्देवता त्रिष्टुब्छन्दः ॥

अग्नीषोमीयेऽगस्त्यो ऽग्नीषोमौ जगती ॥

अग्नीषोमीयेऽगस्त्य ऋषिः अग्नीषोमौ देवते जगती छन्दः ॥

प्रायणीयेतिरात्र आग्निवेश्योऽहोरात्रे अति-जगती ॥

प्रायणीयेतिरात्रे आग्निवेश्य ऋषिः । अहोरात्रे देवते । अति-जगती छन्दः ॥

चतुर्विंऽहःत्यहे शौकरायणः संवत्सरः शक्करी ॥

चतुर्विंऽहःत्यहे शौकरायण ऋषिः । संवत्सरो देवता । शक्करी छन्दः ॥

अभिप्लवे षडहे सावर्णो ऽर्धमासा मासाश्चाति-शक्करी ॥

अभिप्लवे षडहे सावर्ण ऋषिः । अर्धमासा मासाश्च देवताः । अतिशक्करी छन्दः ॥

पृष्ठ्ये षडहे सायकायन ऋतवो ऽष्टिः ॥

पृष्ठ्ये षडहे सायकायन ऋषिः । ऋतवो देवता । अष्टिश्छन्दः ॥

अभिजिति प्रियव्रतो ऽग्निरत्यष्टिः ॥

अभिजिति प्रियव्रत ऋषिः । अग्निर्देवता । अत्यष्टिश्छन्दः ॥

स्वरसामसु सरस्वत्यापो धृतिः ॥

स्वरसामसु सरस्वती ऋषिः । आपो देवता । धृतिश्छन्दः ॥

विषुवति रौहिणायन आदित्योऽतिधृतिः ॥

विषुवति रौहिणायन ऋषिः । आदित्यो देवता । अतिधृति-श्छन्दः ॥

विश्वजिति सौभर इन्द्रः कृतिः ॥

विश्वजिति सौभर ऋषिः । इन्द्रो देवता । कृतिश्छन्दः ॥

गोआयुषोर्वार्कलिर्मित्रावरुणौ प्रकृतिः ॥

गोआयुषोर्वार्कलिर्ऋषिः । मित्रावरुणौ देवते । प्रकृतिश्छन्दः ॥

दशराचे आचार्यो विश्वेदेवा आकृतिः ॥

दशराचे आचार्य ऋषिः । विश्वेदेवा देवताः । आकृतिश्छन्दः ॥

दशराचिके षष्ठ्ये षडहे भालुवेयो दिशो विकृतिः ॥

दशराचिके दशराचसम्बन्धिनि षष्ठ्ये षडहे भालुवेय ऋषिः । दिशो देवताः । विकृतिश्छन्दः ॥

छन्दोमेषु शौल्वायन इमे लोका संकृतिः ॥

छन्दोमेषु शौल्वायन ऋषि । इमे लोका देवताः । संकृतिश्छन्दः ॥

दशमेऽहनि पराशरः संवत्सरोऽभिकृतिः ॥

दशमेऽहनि अविवाक्ये पराशर ऋषिः । संवत्सरो देवता । अभिकृतिश्छन्दः ॥

महाव्रते शैलिनः प्रजापतिरुत्कृतिः ॥

महाव्रते शैलिन ऋषिः । प्रजापतिर्देवता । उत्कृतिश्छन्दः ॥

उदयनीयेतिरात्रे भौवायनो वायुश्छन्दार्ठंसि सर्वाणि ॥

उदयनीये अतिरात्रे भौवायन ऋषिः । वायुर्देवता । सर्वाणि गायत्र्यादीन्युत्कृतिपर्यन्तानि छन्दांसि ॥ १२ ॥

ऋषिभिरुपलक्षितं वाक्यम् ॥

ऋषिभिः परमेष्ठ्यादिभिर्मन्त्रवाक्यमुपलक्षितं ज्ञापितं विद्यमानमेव प्रकटीकृतम् ॥

ऋषयश्छन्दोभिरुपलक्षिताः ॥

परमेष्ठ्यादय ऋषयश्च तत एतं परमेष्ठी प्रजापतौ यज्ञमपश्यदर्शपूर्णमासौ, इत्यादिभिश्छन्दोभिर्वेदवाक्यैरुपलक्षिताः ज्ञापिताः ॥

देवता मन्त्रवर्णादृग्यजुषयोर्विनियोगतश्च विज्ञेयाः ॥

ऋग्यजुषयोर्मन्त्रवर्णादृग्यजुषयोर्विनियोगाश्च मन्त्राणां देवता ज्ञेयाः । मन्त्रवर्णात्तावत् । इन्द्रो वीर्यमकृणोदित्येवमादौ । विनियोगाच्च । यथा निवेशनः संगमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठत इति । अत्र गार्हपत्योपस्थाने विनियोगादृक्षा गार्हपत्योऽग्निर्देवतेति ज्ञेयम् ॥

सर्वमेतच्छन्दो दैवतमार्षं च विज्ञाय यत्किञ्चित्तप्पहोमादि करोति तस्य फलमश्नुते ॥

एतच्छन्दो दैवतमार्षञ्च विज्ञाय विशेषतो ज्ञात्वैवास्य मन्त्रस्यायं ऋषिः इयं देवता इदं छन्दः इत्येवं ज्ञात्वैव यत्किञ्चिज्जपहोमयागाध्ययनाध्यापनयाजनादिकं कर्म करोति तस्य कर्मणः फलमश्नुते प्राप्नोति नान्यथा ॥

ब्रह्मयज्ञारम्भे यथाविधि ज्ञात्वा छन्दःपुरुषमेनोनिर्णोदनठ० शरीरे न्यसेत् ॥

ब्रह्मयज्ञारम्भे स्वाध्यायारम्भे यथाविधि अथातो नित्यस्नानं मयादावित्यत्रोक्तप्रकारेण स्नात्वा स्नानं कृत्वा छन्दःपुरुषं वेदपुरुषमेनोनिर्णोदनं पापक्षयकरं सर्वोपद्रवनाशनं शरीरे न्यसेत् । स्वदेहे न्यसेत् ॥

कीदृशश्छन्दःपुरुष इत्यपेक्षायां तत्स्वरूपमाह ॥

तिर्यग्बिलश्चमस ऊर्ध्वबुध्नः ॥

तस्य छन्दःपुरुषस्य तिर्यग्बिलस्तिर्यग्छिद्रमिदमेव शिरश्चमसः चम्यतेऽन्नमनेन रसा इति चमसः कीदृशः ऊर्ध्वबुध्नः । ऊर्ध्वबन्धनः । उपरि स्रवस्थितमेतदन्धनमस्य शरीरस्य । एतद्धियोगे हि विस्रस्यते शरीरमनेनास्य शिर उत्तमम् । एवंविधमेतच्छन्दःपुरुषस्य शिरः । तस्य मुखे न्यासः कर्तव्यः । तिर्यक् बिलं मुखं यस्य स तथा । ऊर्ध्वं बुध्नं यस्य स तथा । श्रुतिरप्यमुमेवार्थमाह । अर्वाग्बिलश्चमस ऊर्ध्वबुध्नमितीदं तच्छिर एष अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति ॥

तथाक्ष्णी गौतमभरद्वाजौ ॥

तस्य छन्दःपुरुषस्य गौतमभरद्वाजावृषी ज्ञेयौ । तच्च न्यासे प्रकारद्वयम् । मुखं स्पृष्ट्वा तिर्यग्बिलश्चमस ऊर्ध्वबुध्नं, इति पठितव्यम् । अक्षिणी स्पृष्ट्वा गौतमभरद्वाजाविति । एकोऽयं प्रकारः । मुखं स्पृष्ट्वा तिर्यग्बिलाय चमसायोर्ध्वबुध्नाय नमः । अक्षिणी स्पृष्ट्वा गौतमभरद्वाजाभ्यां नम इति । ततश्च यथारुच्यनुष्ठेयम् । एवं वक्ष्यमाणेष्वपि प्रकारद्वयं द्रष्टव्यम् ॥

श्रोत्रे विश्वामित्रजमदग्नी ॥

तस्य छन्दःपुरुषस्य विश्वामित्रजमदग्नी श्रोत्रे कर्णौ ॥

नासिके वशिष्ठकश्यपौ ॥

तस्य छन्दःपुरुषस्य वसिष्ठकश्यपौ नासिके ज्ञेये ॥

वागत्रिः ॥

अत्रिर्ऋषिस्तस्य वाग् ज्ञेया ॥

गायत्रीं छन्दाग्निदेवतां शिरसि विन्यसेत् ॥

ततो गायत्रीं छन्दाग्निदेवतां शिरसि विन्यसेत् । गायत्र्यै नमोऽग्नये नम इति ॥

एवमेवोष्णिहꣳ सवितारं ग्रीवासु ॥

विन्यसेदिति शेषः । उष्णिहं छन्दः सवितारं देवतामेवमेव ग्रीवासु विन्यसेत् । उष्णिहे नमः सवित्रे नम इति ॥

अनूके हृहतीं हृहस्पतिम् ॥

हृहतीछन्दो हृहस्पतिदेवताश्चानूके पृष्ठवंशे विन्यसेत् । हृहत्यै नमो हृहस्पतये नम इति ॥

बाह्वोर्बृहद्रथन्तरे द्यावापृथिवी ॥

हृहद्रथन्तरे छन्दसी बाह्वोर्न्यसेत् । हृहद्रथन्तराभ्यां नमो द्यावापृथिवीभ्यां नम इति ॥

मध्ये त्रिष्टुभमिन्द्रम् ॥

मध्ये उदरे त्रिष्टुभं छन्द इन्द्रं देवतां न्यसेत् । त्रिष्टुभे नम इन्द्राय नम इति ॥

श्रोण्योर्जगतीमादित्यम् ॥

जगतीं छन्द आदित्यं देवतां श्रोण्योः कट्योर्न्यसेत् । जगत्यै नम आदित्याय नम इति ॥

मेढ्रेऽतिच्छन्दसं प्रजापतिम् ॥

अतिच्छन्दसं छन्दः प्रजापतिं देवतां मेढ्रे शिश्ने न्यसेत् । अतिच्छन्दसे नमः प्रजापतये नम इति ॥

पायौ यज्ञायज्ञियं वैश्वानरम् ॥

यज्ञायज्ञियं छन्दो वैश्वानरं देवतां पायावपाने न्यसेत् । यज्ञायज्ञियाय नमो वैश्वानराय नम इति ॥

जवोरनुष्टुभं विश्वान्देवान् ॥

अनुष्टुभं छन्दो विश्वान्देवान् देवता जवौ: सक्थ्योर्न्यसेत् । अनुष्टुभे नमो विश्वेभ्यो देवेभ्यो नम इति ॥

अष्ठीवतोः पङ्क्तिर्मरुतः ॥

पङ्क्तिश्छन्दो मरुतो देवता अष्ठीवतोर्जान्वोर्न्यसेत् । पङ्क्तये नमो मरुद्भ्यो नम इति ॥

पादयोर्द्विपदां विष्णुम् ॥

द्विपदा छन्दो विष्णुं देवताश्च पादयोर्न्यसेत् । द्विपदाय नमो विष्णवे नम इति ॥

प्राणेषु विच्छन्दसं वायुम् ॥

प्राणेषु चक्षुःश्रोत्रादिषु सर्वेषु प्राणेषु प्राणायतनेषु विच्छन्दसं वायुञ्च न्यसेत् । विच्छन्दसे नमो वायवे नम इति ॥

न्यूनातिरिक्तेष्वङ्गेषु न्यूनाक्षरं छन्दो आपो देवतेति ॥

न्यूनाक्षरं छन्द आपो देवता न्यूनातिरिक्तेष्वङ्गेषु न्यसेत् । न्यूनाक्षराय छन्दसे नमोऽद्भ्यो नम इति च ॥

एवꣳ सर्वाङ्गेषु योजयित्वा वेदमयः सम्पद्यते ॥

एवमनेन प्रकारेण सर्वाङ्गेषु सर्वेषु शिरोग्रीवादिष्ववयवेषु योजयित्वा छन्दोदेवतन्यासं कृत्वा स्वयं वेदमयः सम्पद्यते वेदरूपो भवति ॥

तथा प्रापानुग्रहसमर्थो भवति ॥

तव धनादिहानिर्भवित्रित्येवमादिरूपप्रापेषणायां तथा तव पुत्रधनविद्यादिसम्पत्तिर्भवत्वित्येवमादिरूपे अनुग्रहे शोभनेषणायाञ्च समर्थो भवति ॥

ब्राह्मं तेजश्च वर्द्धते ॥

अथ ब्राह्मं तेजो ब्रह्मवर्चसं वर्द्धते ॥

न क्षुतक्षिद्भयं विन्दति ॥

अयं क्षुतक्षिदपि चौरव्याघ्रादेर्भयं न विन्दते न प्राप्नोति ॥

ऋङ्मयो यजुर्मयः साममयस्तेजोमयो ब्रह्ममयोऽष्टतमयः सम्भूय ब्रह्मैवाभ्येति ॥

ऋग्मयादिरूपो भूत्वा ब्रह्मैवाभ्येति मुक्तिं प्राप्नोतीत्यर्थः ॥

तस्मादेतन्नाव्रह्मचारिणे नातपस्विने नासंवत्सरोषिताय नाप्रवक्त्रे ऽनुब्रूयात् ॥

तस्मात्कारणादेतत्पूर्वोक्तसृष्यनुक्रमणमव्रह्मचारिणे न ब्रूयात् । अतपस्विने च न ब्रूयात् । तपो विद्यते यस्यासौ तपस्वी अतपस्विने न ब्रूयात् । तथा ऽसंवत्सरोषिताय यः संवत्सरं समीपे नोषितो न स्थितस्तस्मा एतन्न ब्रूयात् । तथा ऽप्रवक्त्रे यः स्वयं ज्ञात्वाऽन्यान्न पाठयति तस्मै च नानुब्रूयात् ॥

अनेनाधीतेन चान्द्रायणाब्दफलमवाप्नोति ॥

अनेन सर्वानुक्रमणिकाख्येन ग्रन्थेनाधीतेन पठितेन चान्द्रायणाब्दस्य फलमवाप्नोति प्राप्नोति । चान्द्रायणव्रतसम्बन्धी अब्दः संवत्सरश्चान्द्रायणाब्दः । संवत्सरं चान्द्रायणव्रताचरणेन यावत्फलं तावदेतद्ग्रन्थाध्ययनमात्रेण प्राप्नोतीत्यर्थः ॥

अनेन च सम्यक्ज्ञातेन ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्याप्नोति ॥

अनेन च प्रागुक्तेन ग्रन्थेन सम्यक्ज्ञानेन यथार्थं बुद्धेनावगतेन ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोति । अत्रापि प्रकृतविद्याः सायुज्यं प्राप्नोति मन्दतरः सलोकतामिति विशेषः । द्विरभ्यासोऽध्यायपरिसमाप्तिसूचनार्थः ॥

इति श्रीविरूपाक्षविद्यारण्यभट्टारकपादविरचितकृष्णयजुर्ब्राह्मणसहायाग्निकश्रीप्रजापतिसुतसहायाग्निकश्रीदेवव्रते ऽनुक्रमणीव्याख्याने चतुर्थोऽध्यायः ॥

अथ छन्दांसि ॥

अभिधीयन्त इति शेषः । अथानन्तरं छन्दांस्यभिधीयन्ते । अथ तेषां छन्दसां नामान्याह ॥

गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगती-शक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतयः कृतिप्रकृत्याकृति-विकृतिसङ्कृत्यभिकृत्युत्कृतयः ॥

गायत्र्यादय उत्कृतिपर्यन्ता एकविंशतिशब्दाश्छन्दसां संज्ञाः । संज्ञाकरणं समिधाग्नेय्यवत्स्त्री गायत्र्य इत्यादौ संव्यवहारार्थम् । अथैतेषामेव छन्दसामक्षरसंख्यामाह ॥

चतुर्विंठ्यत्यक्षरादीनि चतुरुत्तराणि ॥

एतानि गायत्र्यादीन्युत्कृतिपर्यन्तानि एकविंशतिसंख्यानि छन्दांसि चतुर्विंशत्यक्षरादीनि चतुर्विंशत्यक्षरात्मकं गायत्रीसंज्ञं छन्द उपक्रम्य चतुरुत्तराणि भवन्ति। पूर्वपूर्वछन्दोऽपेक्षया उत्तरमुत्तरं छन्दश्चतुर्भिश्चतुर्भिरक्षरैरधिकं भवतीत्यर्थः । तथाहि । गायत्री चतुर्विंशत्यक्षरा । तदपेक्षया चतुर्भिरक्षरैरधिकोष्णिगष्टाविंशत्यक्षरा । उष्णिगपेक्षयानुष्टुप्चतुर्भिरक्षरैरधिका द्वात्रिंशदक्षरा । अनुष्टुबपेक्षया चतुर्भिरक्षरैरधिका बृहती षट्त्रिंशदक्षरा । एवमेव प्रतिच्छन्दः पूर्वपूर्वापेक्षया चतुरक्षरवृद्धिर्ज्ञेया । चत्वारिंशदक्षरा पङ्क्तिः । चतुश्चत्वारिंशदक्षरा त्रिष्टुप् । अष्टाचत्वारिंशदक्षरा जगती । द्वापञ्चाशदक्षरा अतिजगती । षट्पञ्चाशदक्षरा शक्वरी । षष्ट्यक्षरा अतिशक्वरी । चतुःषष्ट्यक्षरा अष्टिः । अष्टषष्ट्यक्षरा अत्यष्टिः । द्वासप्तत्यक्षरा धृतिः । षड्सप्तत्यक्षरा अतिधृतिः । अशीत्यक्षरा कृतिः । चतुरशीत्यक्षरा प्रकृतिः । अष्टाशीत्यक्षरा आकृतिः । द्वानवत्यक्षरा

विकृतिः । षष्टनवत्यक्षरा सङ्कृतिः । शताक्षरा ऽभिकृतिः । चतु-रधिकशताक्षरोत्कृतिरिति । एतेषामुदाहरणानि प्रागेव दर्शितानि ॥

ऊनाधिकैनैकेन निहङ्कुरिजौ ॥

पूर्वोक्तानां नियताक्षराणां गायत्र्यादीनामुत्कृतिपर्यन्तानां छन्दसामेकेनाक्षरेणोनेन न्यूनेनैकेनाधिकेनातिरिक्तेन यथाक्रमं निहङ्कुरिगित्येते सञ्ज्ञे भवतः । तद्यथा । गायत्री चतुर्विंशत्यक्षरा सैकेनाक्षरेणोना त्रयोविंशत्यक्षरा निहदित्युच्यते । सैवैकाधिका पञ्चविंशत्यक्षरा कुरिगित्युच्यते । एवमनुष्टुबादुत्कृतिपर्यन्तानां ज्ञेयम् ॥

द्वाभ्यां विराट्स्वराजौ ॥

सर्वेषां छन्दसां द्वाभ्यामक्षराभ्यां न्यूनाभ्यां विराट्सञ्ज्ञा भवति । द्वाभ्यामक्षराभ्यामधिकाभ्यां स्वराट्सञ्ज्ञा भवति । अनूनाधिकैनेत्यनुवर्तते । तदूनाधिकाभ्यामिति विपरिणम्य द्वाभ्यामित्यनेन सम्बध्यते । तद्यथा द्वाविंशत्यक्षरा गायत्री विराट् । षड्विंशत्यक्षरा स्वराट् । एवं त्रिंशदक्षरा विराडनुष्टुप् । चतुस्त्रिंशदक्षरा स्वराट् । षड्विंशत्यक्षरा विराडुष्णिक् । त्रिंशदक्षरा स्वराडुष्णिगिति । एवमुत्कृतिपर्यन्तेषूह्यम् । अत्र शास्त्रे निहदादिसञ्ज्ञाचतुष्टयस्य क्वचिदप्यनुक्तिर्लाघवार्था । अन्यथा सर्वत्र न्यूनाधिकाक्षरत्वस्य विद्यमानत्वेन निहदादिसञ्ज्ञोपपन्ने सति शास्त्रं गुरुतरं स्यादतः स्वयमेवोहित्वा यथासम्भवमेतत्सञ्ज्ञाचतुष्टयं ज्ञेयम् ॥

अथ न्यूनाक्षरेष्वक्षरपूरणोपायमाह ॥

पादपूरणार्थन्तु क्वैप्रसंयोगैकाक्षरीभावान्व्यूहेत् ॥

न्यूनाक्षरेषु पादेषु पादपूरणार्थं क्वैप्रसंयोगानेकाक्षरीभावांश्च

व्यूहेत् । त्रिप्रे संहितायां भवः सन्धिः त्रैप्रः । त्रैप्रः संयोगो वक्रा दवकारसंयोगः । वक्रसंयोग इत्यपरे । तदुक्तम् ।

समानाक्षरमन्तस्थां स्वामकस्थं स्वरोदयम् ।
न समानाक्षरे स्वे स्वे ते त्रैप्राः प्राक्ततोदयाः ॥ इति ।

ते सन्धयः त्रैप्रा इत्यर्थः । एकः पूर्वपरयोरित्यधिकारे यः सन्धिरादुणो हरिरेचीत्यादिभिर्दयोरचोः स्थाने य एकादेशः स एकाक्षरीभावः । अनेकाक्षरस्यैकाक्षरभाव एकाक्षरीभावः । एतान्पादपूरणार्थं व्यूहेत् । पृथक्कुर्यात् । तदुक्तम् । व्यूहेदेकाक्षरीभावान्पादेष्वनेषु सम्पदे । अनेषु पादेषु सम्पदे सम्पदर्थं एकाक्षरीभावान् सन्धीन्व्यूहेत् । पृथक्कुर्यादित्यर्थः । तथा । त्रैप्रवर्णांश्च संयोगान्व्यवेयाल्लक्षये स्वरैरिति । अस्यार्थः । त्रैप्रवर्णान् संयोगानन्तस्थासंयोगानित्यर्थः । व्यवेयात् । व्यवधानं कुर्यात् । कैः लक्षये: समानस्थानैर्वर्णैः । तद्यथा । त्रियम्बकं यजामहे । तत्सवितुर्वरेण्यमिति । अत्र यकारस्य समानस्थानेनेकारेण व्यवायेन पादपूरणम् । तथा दुवंनः सर्पिरासुतिरिति । सुवर्धामसोहजनस्य गोपामिति । अत्र वकारस्य समानस्थानेनोकारेण व्यवायः । पिङ्गलोऽपि । पादद्वयादिपूरण इति यकारस्य समानस्थानेनेकारेण व्यवायमाह । आदिशब्देनोवादि गृह्यते । क्वचिद्रेफमपि व्यूहेत् । अयं समानस्थानैः स्वरैर्व्यवायः स्वाभाविकेष्वेव यकारवकारसंयोगेषु भवति । यदा समग्रपर्यायरन्ति नो नर इति । यणादेशेन कृतेषु यकारवकारसंयोगेषु तु अप्सु अन्तरमृतमिति वामं प्रयति अध्वर इत्येव पदप्रकृत्या व्यूहः कर्त्तव्यः । यकारवकारसंयोग एवायं व्यवाय इष्यते । रेफलकारसंयोगयोस्तु नेष्यत इति प्रातिशाख्यभाष्ये । गायत्रविधाने । प्राक्ततसन्ध्ययोः सन्देहे सन्ध्यो विक्रम्यः । सदृशयोस्तु परो विक्रम्य इति । यत्र तु दिवादिव्यूहस्थानानि तत्र पूर्वव्यूहेनैव पाद-

पूरये सिद्धे द्वितीयादौ न व्यूहेत् । अथैकाक्षरीभावव्यूहोदाहरणानि । प्र द्यता जयता नर, इत्यनुष्टुप् इत्येकादेशस्य गुरुस्य व्यूहेन पूरणम् । प्र ऐतु ब्रह्मणस्पतिरित्यत्रैधत्यूढ्वमिति ह्रस्वैकादेशस्य व्यूहः । परिभाग्ने दुश्चरितादित्यत्राकः सवर्णे दीर्घ इत्यनेन ह्रस्वैकादेशस्य दीर्घस्य व्यूहः । अधिब्रवन्तु ते अवस्त्वमानित्यत्रैकः पदान्तादिति एकादेशस्य पूर्वरूपस्य व्यूहः । छन्दोगपरिभिष्टेऽपि । सर्वछन्दःस्वेकेन पश्चाक्षरेण यद्गुमती भवत्यत्रैकाक्षरहीना निह्रदेकाधिका भुरिक् । दध्यूना विराट् । ह्रस्वाधिका स्वराडस्त्रीयोमध्या विपात्पिपीलिकमध्या भूयोमध्या यवमध्येति । यत्राभ्यां यकारवकारविकर्षेण न्यूनानि छन्दांसि पूरयेत्तांयब्देन च नदश्च वर्जम् । पदप्रकृत्या च । त्वयब्दे न्यूनत्वे तु यब्दपूरण इति । तदेवं यत्र व्यूहः सम्भवति तत्र व्यूहेन पूरणम् । यत्र तु व्यूहेनापि न पूर्यन्ते तत्र निह्रदुरिग्विराट्स्वराडादिसञ्ज्ञा । यत्र तु सन्देहो जायते यद्वा क्वचिदृष्टाधिकाक्षराणि भवन्ति । तत्र किमियं ह्रस्वती वा ह्रस्वाधिका । अथवा पङ्क्तिर्न्यूनेति । तत्र विकल्पो ह्रस्वती वा पङ्क्तिर्वेति । तथा च सूत्रकारः । ऋतवो ह्रस्वती पङ्क्तिर्वा । उपज्मं जगती चिष्टुब्वा । चतुश्चिठं०यहर्मदेवत्या पङ्क्तिश्चिष्टुब्वेति । एवं पित्र्यलोकेष्वपि छन्दःसूक्तिपर्यन्तेषु सन्देहे विकल्पो द्रष्टव्यः । अधिकाक्षरं पूर्वं छन्दो न्यूनाक्षरञ्चोत्तरमिति । तथा ॥

अक्षराण्येव सर्वत्र निमित्तं बलवत्तरम् ।
विद्याद्विप्रतिपन्नानां पादह्रस्वाक्षरैरृचाम् ॥ इति ।

अस्यार्थः । पादैर्वृत्तैरक्षरैश्च विप्रतिपन्नानामृचां सर्वत्र बलवत्तरं निमित्तमक्षराण्येव विद्यात् । यद्वा मोऽष्टमेति पादैर्विप्रतिपन्ना अक्षरैश्चिष्टुबध्यवसीयते । यद्येषा ते अग्ने समिदिति ह्रस्वैर्विप्रतिपन्ना ऽक्षरैरनुष्टुबवसीयते । यदा क्वाचित्षड्विंशत्यक्षरा

क्रमवति । तत्र सन्देहः किमियं स्वराट् गायत्री उत विराडुष्णिगिति । एवं सर्वछन्दःसु संशय जन्यः । तदा निर्णयोपायमाह पिङ्गलः । आदितः सन्दिग्धे । सन्दिग्धे छन्दस्यादितः प्रथमपादा छन्दो निश्चेतव्यम् । यदा प्रथमः पादोऽष्टाक्षरस्तदा सा गायत्री । यदा द्वादशस्तदोष्णिगिति । एवं सर्वेषु । तथा देवतादितः । सन्दिग्धं छन्दो देवतादिभिर्निश्चेतव्यम् । तद्यथा । यदा सन्दिग्धे छन्दस्यग्निर्देवता भवति तदा सा गायत्री । यदा सविता तदोष्णिक् । यदा सोमस्तदानुष्टुबित्यादि ॥

आद्ये तु सप्तवर्गे पादविशेषात्सञ्ज्ञाविशेषः ॥

तुशब्दोऽवधारणे । गायत्र्यादीनामेकविंशतिसंख्यानां छन्दसां त्रयः सप्तवर्गाः । तेषां त्रयाणां सप्तवर्गाणां मध्ये आद्य एव सप्तवर्गे गायत्र्युष्णिगनुष्टुबृहतीपङ्क्तित्रिष्टुजगतीत्येतेषां सप्तानां छन्दसां वर्गे समूहे पादविशेषात् पादानां चतुरक्षरपञ्चाक्षरषडक्षरसप्ताक्षराष्टाक्षरनवाक्षरत्वादिरूपविशेषात् सञ्ज्ञाविशेषाः पद्पङ्क्त्यादयो भवन्ति न द्वितीयतृतीयसप्तवर्गयोः ॥

तानानुक्रामन्त एवोदाहरिष्यामः ॥

तान्प्रकृतसञ्ज्ञाविशेषानानुक्रामन्त एव ऋष्याद्यनुक्रमणं कुर्वन्त एवोदाहरिष्यामः । पदपाङ्क्तो नवमः । अन्त्या तु पादनिवृत् । उपरिष्टाज्ज्योतिःषष्टीत्येवम् ॥

विराड्रूपा विराट्स्थानाश्च बह्वृना अपि त्रिष्टुभ एव ॥

नवको वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थानेति । एकादशिनस्त्रयोऽष्टकश्च विराड्रूपेति च वक्ष्यति । तत्रेदमुच्यते । त्रिष्टुभश्चतुश्चत्वारिंशदक्षरत्वादिराड्रूपाया एकपदा-

रिंशदक्षरत्वाद्विराट्स्थानाय चैकोनचत्वारिंशदक्षरत्वाय चत्वारिंशदक्षरत्वाद्वा त्रिष्टुप्त्वं न भवियतीति ग्रहायामाह। विराड्रूपा विराट्स्थानाय ऋचो बहवो ऽपि बहुभिरक्षरैरूना अपि त्रिष्टुभ एव। जगत्यक्षरत्वात्त्रिष्टुभो न भवन्तीति ग्रहा न कार्येत्यर्थः। किं च स्यात्। एकोनचत्वारिंशदक्षरायाः त्रिष्टुप्त्वाच्चत्वारिंशदक्षरायाः पङ्क्तित्वमेकचत्वारिंशदक्षरायाः भुरिक्पङ्क्तित्वं स्यात् तस्मा भूदित्येवमर्थमस्यारम्भः॥

इत्युद्देशः॥

इतिशब्दः प्रकारे। इति अनेन प्रकारेण सर्वछन्दसामुद्देशः। एकद्विबह्वक्षरैरूनानामपि खलनाम्नैव सङ्कीर्तनम्। सैव सञ्ज्ञा ज्ञेयेत्यर्थः। उद्दिश्यते ऽभिधीयते ऽनेनेत्युद्देशः सञ्ज्ञा। यथा विराड्रूपादीनां न्यूनाक्षराणामपि त्रिष्टुप्त्वमेव। एवमितरेषामपि छन्दसां न्यूनाधिकत्वेऽपि तत्तच्छन्दस्त्वमेव भवति। न वाक्षरैश्छन्दांसि वियन्ति न द्वाभ्यामिति श्रुतेः। तथा गायत्र्याच्छन्दो ह्येवैकत्रिंशाक्षरं द्वाभ्यामिति श्रुतेश्च। यथा त्रयः सप्तकाः पादा निहदिति त्रिभिरूनापि गायत्र्येव॥

तत्र दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागताः

इति सञ्ज्ञाः॥

तत्र छन्दसां पादविशेषेषु सञ्ज्ञाविशेषाभिधाने दशाक्षरैकादशाक्षरद्वादशाक्षराणां पादानां यथाक्रमं वैराजत्रैष्टुभजागताः इति तिस्रः सञ्ज्ञाः। दशाक्षराणामित्यत्र पादानामिति शेषः। अक्षरशब्दस्य प्रत्येकं सम्बन्धः। तेन दशाक्षरस्य पादस्य वैराज इति सञ्ज्ञा। एकादशाक्षरस्य त्रैष्टुभ इति। द्वादशाक्षरस्य जागत इति। सञ्ज्ञाकरणं संव्यवहारार्थम्। संव्यवहारश्च गवादौ

वैराजस्तोदुमर्चेति त्रिजागतोर्ऽहतीत्येवमादौ । पिङ्गलोऽपि । पादः । इत्यादिपूरणम् । गायत्र्या वसवः । जगत्या आदित्याः । विराजो दिशः । त्रिष्टुभो रुद्रा इत्यादि । दशाक्षरा विराट् । एकादशाक्षरा त्रिष्टुप् । द्वादशाक्षरा वै जगतीत्यादिश्रुतिरपि पादाक्षराभिप्रायेणैव ॥

अनादेशे ऽष्टाक्षराः पादाः ॥

अनादेशे ऽक्षरसङ्ख्यानुक्तौ पादा अष्टाक्षरा भवन्ति ॥

चतुष्पदाश्चर्चः ॥

चकारादनादेशे ऽनुक्तपादसङ्ख्या ऋचश्चतुष्पदा भवन्ति ॥

प्रथमं छन्दस्त्रिपदा गायत्री ॥

चतुर्विंशत्यक्षरं प्रथमं छन्दो गायत्री । सा च त्रिपदा भवति । त्रयः पादा यस्याः सा त्रिपदा । पादस्य लोपोऽहस्यादिभ्य इत्यन्तलोपः । टाङ्योरिति टाप् । पादः पत् । अस्या उदाहरणं समिधाग्निन्दुवस्यतेत्यादिकम् । अस्या अष्टाक्षरात्रयः पादाः । तथा च छन्दोगानम् । त्रयोऽष्टकाः स्वभावस्थिति । गायत्रीति प्रागुष्णिहोऽधिकारः ॥

पञ्चकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्को वा पदपङ्क्तिः ॥

गायत्रीत्यनुवर्त्तते । पञ्चाक्षराणि परिमाणमस्यासौ पञ्चकः । सङ्ख्याया अतिशदन्तायाः कन् । एवं षट्कादयोऽपि । पञ्चकाः पञ्चाक्षराश्चत्वारः पादाः । एकः षट्कः षडक्षरः । अथवा चतुर्थः पादश्चतुष्कश्चतुरक्षरः सा षड्विंशत्यक्षरा पञ्चविंशत्यक्षरा वा पदपङ्क्तिर्गायत्री । अग्न्याग्नम इति प्रथमपञ्चकोदाहरणम् । चतुर्थश्चतुष्को वेत्यस्योदाहरणमग्ने तमेवेति । तदुक्तं पिङ्गले । पदपङ्क्तिः पञ्च । चतुष्कषट्की चयवेति ॥

षट्सप्तैकादशा उष्णिग्गर्भा ॥

गायत्रीत्येव । यस्याः षडक्षरसप्ताक्षरैकादशाक्षराः क्रमेण त्रयः पादाः सा चतुर्विंशत्यक्षरोष्णिग्गर्भा गायत्री भवति । उदाहरणमृग्वेदे । ता मे अस्य यामम् ॥

त्रयः सप्तकाः पादनिहृत् ॥

यस्या गायत्र्याख्यः सप्ताक्षराः पादा सैकविंशत्यक्षरा पादनिहृत्संज्ञा गायत्री । अभीषुणः सखीनामित्युदाहरणम् । तथा च पिङ्गलः । क्वचित्त्रिपाद्विभिः । सा पादनिहृदिति । त्रिपात् पादनिहृत्संज्ञका सप्ताक्षरैरिति छन्दोगानाम् । अत्र पिङ्गले विशेषः । आद्यचतुष्पादतुभिरिति । आद्यं प्रथमं गायत्रीसंज्ञं छन्द ऋतुभिः षडक्षरैश्चतुर्भिः पादैश्चतुष्पान्नवति । छन्दोगानां च । चतुष्पाच्छ्रायत्री षडक्षरैरिति ॥

मध्यमः षट्कश्चेदतिनिहृत् ॥

यस्या आद्यतृतीयौ सप्ताक्षरौ मध्यमः षट्कः षडक्षरः सा त्रिंशत्यक्षराऽतिनिहृद्गायत्रीति संज्ञा । उदाहरणमृग्वेदे । पुरुत्तमं स्तोतृणामिति ॥

दशकश्चेद्यवमध्या ॥

गायत्रीत्यनुवर्त्तते । यस्या गायत्र्याः प्रथमतृतीयौ सप्ताक्षरौ पादौ मध्यमो दशाक्षरः सा चतुर्विंशत्यक्षरा यवमध्या गायत्री । उदाहरणम् । ससुन्वेयो वसूनामिति । तदुक्तम् ॥

आद्ये पादे तृतीये च सप्तके मध्यमो यदि ।
दशाक्षरः सा गायत्री यवमध्या प्रकीर्त्तितेति ॥

यस्यास्तु षट्कसप्तकाष्टकाः सा वर्द्धमाना ॥

गायत्रीत्यनुवर्त्तते । यस्या आद्यः पादः षडक्षरो द्वितीयः

सप्ताक्षरस्तृतीयोऽष्टाक्षरः सा वर्धमाना गायत्रीति सञ्ज्ञा भवति । उदाहरणम् । अग्निमद्वेषम् । षट् सप्ताष्टौ च वर्धमानेति छन्दोगानाम् ॥

विपरीता प्रतिष्ठा ॥

या पूर्वोक्तविपरीता प्रथमोऽष्टाक्षरो द्वितीयः सप्ताक्षरस्तृतीयः षडक्षर इत्येवंविधा सैकविंशत्यक्षरा प्रतिष्ठासञ्ज्ञा गायत्री । उदाहरणम् । त्वमग्ने व्रतपा इति । पुरीष्योसि विश्वभरा इति च । तदुक्तं विद्वत्से । अष्टौ सप्त षट् चेति प्रतिष्ठा । एवैव विपरीता वर्धमानेति । छन्दोगानामपि । अष्टसप्तषड्भिः प्रतिष्ठेति ॥

द्वौ षट्कौ सप्तकश्चेति कृसीयसी ॥

गायत्रीत्यनुवर्तते । यस्या द्वौ पादौ षडक्षरावेकः सप्ताक्षर एवंविधा सैकोनविंशत्यक्षरा कृसीयसी गायत्रीसञ्ज्ञा भवति । उदाहरणमन्त्रभेदे । श्रेष्ठमुग्नियाणामिति । एवं दश गायत्र्यः सञ्ज्ञाः । तदुक्तम् । इति पादविभागेन दश गायत्र्य ईरिता इति ॥

द्वितीयमुष्णिक्पदा ॥

अष्टाविंशत्यक्षरं द्वितीयं छन्द उष्णिक् सा त्रिपदा भवति । त्रयः पादा यस्याः सा त्रिपदा । उष्णिगित्ययमधिकारः प्रागनुष्टुब्धिकारात् ॥

अन्त्यो द्वादशकः ॥

अस्यास्त्रिपदाया उष्णिहोऽन्त्यस्तृतीयः पादो द्वादशकः । द्वादशाक्षरादि परिमाणमस्यासौ द्वादशकः । प्रथमद्वितीयौ त्वष्टाक्षरावेव । उदाहरणम् । अग्ने याजस्य गोतम इति । तदुक्तम् । उष्णिग्या यस्त्री जागतश्चेति । छन्दोगानाञ्च । उष्णिगष्टाक्षरौ द्वादशकश्चेति ।

अनाह पिङ्गलः । परोष्णिक् परत इति । छन्दोगानाञ्च । स एवोपरिष्टात्पर उष्णिगिति । स इति द्वादशाक्षरः पादः ॥

आद्यश्चेत्पुर उष्णिक् ॥

यस्या उष्णिह आद्यः पादो द्वादशाक्षरः । अन्त्यावष्टाक्षरौ । सा पुरउष्णिक्संज्ञा भवति । आदौ भव आद्यः । आद्यः प्रथमो द्वादशकश्चेत्सा पुर उष्णिगिति सूत्रार्थः । तदुक्तम् । पुर उष्णिक् परत इति । छन्दोगानामपि । स पुरश्चेत्पुर उष्णिगिति । स इति द्वादशकः । उदाहरणम् । अस्रन्तरमृतमिति ॥

मध्यमश्चेत्ककुप् ॥

उष्णिहो मध्यमः पादो द्वादशकश्चेत्सा ककुबुष्णिगिति संज्ञा भवति । तदुक्तम् । ककुन्मध्ये चेदन्त्य इति । छन्दोगानामपि । स चेन्मध्ये ककुब्भवतीति । उदाहरणम् । भद्रो नो अग्निराहुत इति ॥

त्रैष्टुभजागतचतुष्काः ककुब्न्यङ्कुश्चिरा ॥

यस्या उष्णिहस्त्रैष्टुभजागतचतुष्काः क्रमेण पादाः । त्रैष्टुभ एकादशाक्षरः प्रथमः । ततो जागतो द्वादशाक्षरो द्वितीयः । ततश्चतुरक्षरस्तृतीयः । सा सप्तविंशत्यक्षरा ककुब्न्यङ्कुश्चिरेतिसंज्ञा उष्णिग्भवति । उदाहरणम् । ददीरन्न इति ॥

एकादशिनोः परः षट्कस्तनुश्चिरा ॥

यस्या उष्णिह एकादशिनोरेकादशाक्षरयोर्द्वयोः पादयोः परस्तृतीयः पादः षट्कः षडक्षरः सा तनुश्चिरेतिसंज्ञा उष्णिक् । अष्टाविंशत्यक्षरा । एकादशिनोरिति व्रीह्यादित्वादिनिः । पञ्चम्यर्थे व्यत्ययेन षष्ठी । प्रयाघोषित्युदाहरणमन्त्रभेदे ॥

मध्ये चेत्पिपीलिकमध्या ॥

अयं षडक्षरः पादो मध्ये चेत्साष्टाविंशत्यक्षरा पिपीलिकमध्योष्णिगुच्यते । अग्ने स्वाहा क्रतुरीत्युदाहरणम् ॥

आद्याः पञ्चकत्रयोऽष्टका अनुष्टुब्गर्भा ॥

यस्या उष्णिहः आद्याः पादाः पञ्चकाः पञ्चाक्षरस्तत्त्रयः पादा अष्टकाः अष्टाक्षराः सा एकोनत्रिंशदक्षरा अनुष्टुब्गर्भेतिसंज्ञा उष्णिक् । अस्या उदाहरणम् । पितुनस्तोषमिति ॥

चतुःसप्तकोष्णिगेव ॥

या चतुःसप्तकाः चत्वारः पादाः सप्तकाः सप्ताक्षराख्यस्याः सा चतुःसप्तका । साष्टाविंशत्यक्षरा उष्णिगेवोच्यते । केवलोष्णिक्शब्दवाच्या सैवेत्यर्थः । प्यायुषञ्चमदग्नेत्युदाहरणम् । पिङ्गलः । चतुष्पादृषिभिरिति । ऋषिभिः सप्ताक्षरैः पादैरिति । छन्दोगानामपि । चतुष्पाच्चेत्सप्ताक्षरैरिति । इत्यष्टावुष्णिह उक्ताः । तदुक्तम् । उष्णिहोऽष्टौ समुद्दिष्टाः सम्यक् पादविभागत इति ॥

तृतीयमनुष्टुप् ॥

द्वात्रिंशदक्षरं तृतीयं छन्दोऽनुष्टुब्संज्ञं भवति । चतुष्पदाश्चेत्युक्तत्वात्ता चतुष्पदा भवति । पादाश्चाष्टाक्षराः । अनादेशेऽष्टाक्षराः पादा इति प्रागुक्तत्वात् । अस्या उदाहरणम् । अयन्ते योनिर्ऋत्विय इति । येषामध्येतीति च । पिङ्गलः । अनुष्टुब्गायत्रैरिति । छन्दोगानाञ्च । अनुष्टुब्चत्वारोऽष्टका इति । अनुष्टुबित्ययमधिकारः प्राक् बृहत्यधिकारात् ॥

पञ्च पञ्चकाः षट्कश्चैको महापदपङ्क्तिः ॥

यस्या अनुष्टुभः पञ्च पञ्चकाः पञ्चाक्षराः पञ्च पादा एकः पादः षट्कश्च षडक्षरश्च सैकत्रिंशदक्षरा महापदपङ्क्तिरिति संज्ञा । तव स्वादिष्ठादीत्युदाहरणमृग्वेदे ॥

जागतावष्टकश्च कृतिः ॥

द्वौ पादौ जागतौ द्वादशाक्षरौ तृतीयश्चाष्टकोऽष्टाक्षरो यस्याः सा कृतिसंज्ञा ऽनुष्टुप्। सा कस्मै धातमित्युदाहरणम् ॥

मध्ये चेदष्टकः पिपीलिकमध्या ॥

कृतिरित्यनुवर्त्तते। जागताविति च। अयमष्टकः पादो जागतयोर्द्वादशाक्षरपादयोर्मध्ये चेद्भवति प्रथमो द्वादशको द्वितीयोऽष्टकस्तृतीयो द्वादशक इत्येवं तर्हि सा पिपीलिकमध्याकृतिरित्येवंसंज्ञा ऽनुष्टुब्भवति। अजीजनोहीत्युदाहरणम्। अत्र पिङ्गलः। त्रिपात्कचिज्जागताभ्याञ्च मध्ये ते चेति। छन्दोगानामपि। त्रिपदाप्यष्टाक्षरौ द्वादशौ चेति ॥

नवकयोर्मध्ये जागतः काविराट्।

यस्या नवकयोर्नवाक्षरयोः पादयोर्मध्ये जागतो द्वादशाक्षरः पादः सा द्वात्रिंशदक्षरा काविराट्संज्ञा ऽनुष्टुब्भवति। ना विहांसाहवामह इत्युदाहरणमृग्वेदे ॥

नववैराजत्रयोदशैर्नष्टरूपा ॥

